जन्मान्तरेऽपि तथा- विच्छेदनमभिमनता परोपकारकरणपरेण
भवितव्य तस्येव पुरुषस्योत्कर्षाविभावकत्वात् । यत परोपकार
सम्यक् क्रियमाणो धीरतामभिवर्द्धयति दीनतामपकर्षति उदार-
चित्ततां विधत्ते चात्मम्भरितां मोचयति चेतोवैमल्यं वितनुते
प्रभुत्वमाविर्भावयति ततोऽसौ प्रादुर्भूतवीर्याभाव प्रवृष्टदोर्म
परोपकारकरणपर पुरुषो जन्मान्तरेष्वप्युत्तरोत्तरक्रमेण

[illegible]

[illegible]

[illegible]

यथाच्छन्देन कादम्बरीप्रभृतीभिरिव स्वानन्दसन्दोहदायिनीभिरेव कथा-
भिरेव विधास्यते । तथैव स्थिते भो भव्या शृणुता भवद्भिरिदमप्र-
स्तुतं । यथा तेनापि रोरेण तथा प्रयुक्त तद्भेषजत्रयमुपादाय ये
रोगिणः सम्प्रत्यभ्युपेते ते नीरोगतामास्कन्दन्ति युज्यते च तत्तेषां
यथोक्तं तस्य तच्चैव रोरोपकारमयतं । तथा मादृशापि भगवद्व-
चनोक्तभावातिमहत्प्रादप्रसादेन तदनुभावाविर्भूतसद्बुद्धितया यदस्यां
कथायां विरचयिष्यते ज्ञानादित्रयं तत्रास्ते सन्ति ये जीवास्तेषां
मद्रागादिभावरोगनिवारणं कृतमेव एव न खलु वक्तृगुणदोषावुपेक्ष्य
बाध्या पदार्थाः स्वात्मसाधने प्रवर्तन्ते । तथा हि । यद्यपि स्वय
मुपायाच्च पुरुषः स्वामिसम्बन्धिनमाहारविशेषं तदादेशेनैव तदु-
चितपरिजनाय प्रकटयन् भोजनायोपतिष्ठते कथयति तथाप्यसावा-
हारविशेषः परिजन तपयत्येव न वक्तृदोषैः स्वरूपं विरचयति
तदेवापि ढोकनीयम् । तथा हि । स्वयं ज्ञानाद्यपरिपूर्णेनापि
मया भगवदागमानुसारेण निवेदितानि ज्ञानादीनि ये भव्यसत्वा
ग्रहीष्यन्ति तेषां रागादिबुभुक्षोपशमेन स्वास्थ्यं करिष्यन्त्येव स्वरूप
हि तत्तेषामिति ।

किं च ।

यद्यपि भगवत्सिद्धान्तमध्यमध्यासीनमेकैकं पदमाकर्ण्यमानं भा-
वत सकल रागादिरोगजालं समुन्मूलयितुं पटिष्ठमेव स्वाधीनं च
तदाकर्णनं भवतां तथा यद्यपि चिरन्तनमहापुरुषोपनिबद्धकथा-
प्रबन्धश्रवणेनापि सद्भावनया क्रियमाणेन रागादित्रोटनं सुन्दरतर
मभवत्येव तथाप्यनुनोपायेन संसारसागरं तरितुकामे मयि परम-

सन्मार्गविशेषमासादयति न पुनस्तत् प्रतिपततीति तदिदमत्रेद्य स्वयमुपेत्यापि ज्ञानादिस्वरूपमात्मने यथाशक्ति प्रवर्त्तितव्य न पराभ्यर्थनमपेक्षणीयमिति ततोऽयं जीवोऽत्र भगवन्मते वर्त्तमानो देशकालाद्यपेक्षयापरापरस्थानेषु परिभ्रमन् महता प्रयत्नेन कुरुते सर्वेभ्यो ज्ञानदर्शनचारित्ररूपमार्गप्रतिपादन सैव घोषणा विज्ञेया। ततस्तया कथयतोऽस्मात् प्रस्तुतजीवाद् मन्दतरमतयो तदुपदिष्टानि ज्ञानादीनि कदाचिद् गृह्णीयु ये पुनरस्यातत्वलेशामेव दोषपुञ्जतो प्राक्तनीनामस्यानुसरता वाच्यत्वाय प्रतिभासते लोकोचितस्य तेषामयं जीव। यत्तु न लोकस्यास्मि न तेषामे तृष्णो न पुनरस्येति। ततोऽयं चिन्तयति कथं पुनरयं ज्ञानादुपदेशः सानुग्राह्यो भविष्यतीति। तत सद्बुद्धिबलादेवेद मयस्ति। यदुत न ममास्य दीयमानोऽयमसौ समस्तलोकानामुपादेयतो प्रतिपद्यते। तस्मादेव करिष्ये। यदुत यान्येतानि ज्ञानदर्शनचारित्राणि भगवन्मतमार्गभूतानि प्रतिपाद्यानि तानि न स्वयं पञ्चरत्नौ भेषजद्धयानुरूपार्थविवेचने चित्रपरिचयलोकभण्डारसचस्य सम्पाद्य ततस्तो पञ्चरत्नमिव सौनीनं प्रयत्नमदनमन मुख्यस्तो मुद्राणि ततस्तां वस्तूनानि सर्वे समस्तवाङ्मयानि भविष्यन्ति।

१६ च।

यदेदमन्ति समाप्तानि मानं परिवमद् ममकृत्यमी कि च दर्शनिति। स्वदेशाय च तत्र औचित्यपूर्वमनिमात्रया ...

यथाच्छेदेन काष्ठपात्रीस्थानीयाभिहितज्ञानदर्शनचारित्रभेषजत्रया-
त्मकैव विधास्यते । तथैव स्थिते भो भव्या श्रूयतां भवद्भिरियमभ्य-
र्थना । यथा तेनापि रोरेण तथा प्रयुक्तं तद्भेषजत्रयमुपादाय ये
रोगिणः सम्यगुपभुञ्जते ते नीरोगतामास्कन्दन्ति युज्यते च तत्तेषां
ग्रहीतुः तस्य ग्रहणे रोरोपकारसम्पत्ते । तथा मादृशापि भगवदव-
लोकनयावाप्तसद्गुरुपादप्रसादेन तदनुभावाविर्भूतसद्बुद्धितया यदस्यां
कथायां विरचयिष्यते ज्ञानादित्रयं तल्लास्यन्ति ये जीवास्तेषां
तद्रागादिभावरोगनिबर्हणमुपपन्नत एव न खलु वक्तुर्गुणदोषावपेक्ष्य-
वाच्याः पदार्था स्वार्थसाधने प्रवर्त्तन्ते । तथा हि । यद्यपि स्वयं
बुभुक्षाक्षामः पुरुषः स्वामिसम्बन्धिनमाहारविशेषं तदादेशेनैव तदु-
चितपरिजनाय प्रकटयन् भोजनायोत्सङ्गे कलयति तथाप्यसावा-
हारविशेषस्तं परिजनं तर्पयत्येव न वक्तृदोषेण स्वरूपं विरहयति
तथेहापि योजनीयम् । तथा हि । स्वयं ज्ञानाद्यपरिपूर्णेनापि
मया भगवदागमानुसारेण निवेदितानि ज्ञानादीनि ये भव्यसत्त्वा
ग्रहीष्यन्ति तेषां रागादिबुभुक्षोपशमेन स्वास्थ्यं करिष्यन्त्येव स्वरूपं
हि तत्तेषामिति ।

किं च ।

यद्यपि भगवत्सिद्धान्तमध्यमध्यासीनमेकैकं पदमाकर्ण्यमानं भा-
वतः सकलं रागादिरोगजालं समुन्मूलयितुं पटिष्ठमेव स्वाधीनं च
तदाकर्णनं भवतां तथा यद्यपि चिरन्तनमहापुरुषोपनिबद्धकथा-
प्रबन्धश्रवणेनापि महात्मना क्रियमाणेन रागादित्रोटनं सुन्दरतरं
सम्भवत्येव तथाप्यमुनोपायेन समारब्धागरं तरितुकामे मयि परम-

कल्पैकरताः सन्तः प्रस्तुतकथासम्बन्धमपि सर्वेऽपि भवन्तः श्रोतुमर्हन्तीति। तदेवमेतत्कथानकं प्रायः प्रतिपदमुपनीतं यत्पुनरन्तरान्तरा किञ्चिन्नोपनीतं तन्मार्गेणैवानुसारेण स्वबुद्ध्योपनयः कार्यः। सास्त्रेव गृहीतसङ्केतानामुपमानदर्शनादुपमेयप्रतीतिरत एवेदं कथानकमादावस्यैवार्थस्य दर्शनार्थमुपन्यस्तं यतोऽस्यां कथायां न भविष्यति प्रायेण निरुपनयः पदोपन्यासस्ततोऽवगमिष्यितामो सुखेनैव तदन्तर्भविनोऽर्थमलमतिविस्तरेणेति ।

इह हि जीवमपेक्ष्य मया निजं
यदिदमुक्तमदः सकले जने ।
लगति सम्भवमात्रतया ततो
गदितमात्मनि चारु विचार्यताम् ॥
निष्पुण्यकः प्रवचने परमः प्रभावो
रागादिदोषगणरोगमनिष्टता च ।
प्राक्सत्यतामतिकृतश्च भवप्रपञ्च
सम्प्रापितः सकलमेतदिहात्र पीठे ॥
संसारेऽत्र गिरादिभिः विचरता जीवेन दुःखाकरे
जैनेन्द्रं मतमाप्य दुर्लभतरं ज्ञानादिरत्नत्रयम् ।
कार्यं तत्र निरर्गलादरवता भाव्यं सदा सद्गुरौ
सर्वेषां करुणाकरेण भवतामित्येतदावेदितम् ॥

इत्युपमितिभवप्रपञ्चायां कथायां पीठबन्धो
नाम प्रथमः प्रस्तावः समाप्तः ।

अथ द्वितीयः प्रस्तावः ।

अस्तीह लोके दुरन्तसंसारचक्रदर्शिना तीर्थकृद्भिः प्रथमम्
रक्षिता चक्र लगरवत्र सर्वेषामुत्पत्तौ विनयशीलप्रवृत्ते मनु
ष्यलोकेष्वसत्   प्रत्यन्तप्रत्यन्तवासिना   निरन्तरमुपरि
अवष्टब्धा सुसंवृतविशालोन्नतप्राकारा प्रत्यन्तनिवेश नगरी ।
सा च नोट्टी   कर्मभूमिरचना   संवरसंवृत   सर्व   वास्तव
वास्तु सौन्दर्य सह सर्वेषु नानि वि । दक्षिणपश्चिमेदिक्तरानि
विचित्रवर्णचित्रपिच्छिकादि   सम्यक्त्वादिनिवासा   दशरथा-
न्तानि गीतवादित्र पुस्तकानि । यस्यां चानेकाद्भुतवस्तु-
स्थानभूतकार्पण्यादिवासा   विविधविशिष्टतरपुरसमिता
भरतादिक्षेत्ररूपा   पाटका । अनुचरा   सुवर्णाकारा   पाटक
दर्शिता । यस्यां लप्रभावनो दीर्घतराकारो विस्तारपाटक
धर्मधर्मवाशिनो महापुरुषवरसमवसरण   सुभासुभपुण्यानुरूप
दक्षाभरेणुगतानिवहरूपो विभक्ताग । यस्यां निषधगन्धा-
दिदादिदर्शनसमनयासीन   परवत्रमपनायामानुषोत्तरपर्वताकार
प्राकार । तथापरतो यस्यां विस्तीर्णगभीरा समुद्ररूपा परिखा ।
यस्यां च वरा विशुभावासिनानि भद्रशालवनादिरूपाणि नाना
कानमानि । यस्यां च बहुविधजन्तुसमागमसम्पूर्णवाहिन्यो महा
नदीरूपा   महारथ्या ।   यस्यां   च   समस्तव्यापारारम्भती
लवणकालोदसमुद्ररूपौ द्वावेव महाराजमार्गौ । यस्यां च महा
राजमार्गप्रविभक्तानि   जम्बूद्वीपधातकीखण्डपुष्करवरद्वीपार्द्धरूपाणि

वसन्ति चौर्येव पाटकमण्डलानि। यस्यां च लोकसुखहेतव समुचितस्थानस्थायिन कल्पद्रुमरूपा भूयांस स्थानान्तरीयनृपतय इति।

अपि च।

तस्या क कोटिजिह्वोऽपि गुणसभारगौरवम।
शक्तो वर्णयितु लोके नगर्या किमु मादृश ॥
यस्या तीर्थकृतोऽनन्तास्सिद्धिकेशवशौरिण ।
सञ्जाता भजनिष्यन्ते जायन्तेऽद्यापि केवन ॥
या चेह सवशास्त्रेषु लोके लोकोत्तरेऽपि च।
अनन्तगुणसपूर्णा दुर्लभत्वेन गीयते ॥
उच्चावचेषु स्थानेषु हिण्डित्वा आन्तजन्तव ।
प्राप्ता खेदविनोदेन लभन्ते यत्र निवृतिम ॥
विनीता शुचयो दक्षा यस्या धन्यतमा नरा ।
न धममपहायान्यन्नून चेतसि कुवते ॥
यस्यां नार्य सदानायकार्यवजनतत्परा ।
पुण्यभाज सदा धम जैनेन्द्र पर्युपासते ॥
किंवाथ बहुनोक्तेन वस्तु भाति जगत्त्रये।
तस्यां निवसतां सम्यक् पुसां यन्नोपपद्यते ॥
सा हि रत्नाकरे पूर्णा सा विद्याद्रुमिरुत्तमा।
सा मनोनयनानन्दा सा दुखौघविनाशिका ॥
साखिलाश्चर्यभूयिष्ठा सा विशेषसमन्विता।
सा मुनीन्द्रसमाकीर्णा सा सुश्रावकभूषिता ॥
सा जिनेन्द्राभिषेकादितोषिताखिलभव्यका।

आचरन्ति भवन्तो मा व्यवहारं पापिनाम् ॥
जीवोऽजीवसमा पुच्छपादा अस्ति नेति वा ।
अथ विचारं प्रथित मत्कानेव विदित ॥
यस्मात्सापि यथासो नराणां पुरुषाधम ।
न युज्यते इवैकोऽकै दोऽन्य इति गच्छते ॥
तौ विमुच्य न कोऽपि व्याममनोव मानवा ।
अयुक्ते एव जाये पुरुषायचतुष्टयम् ॥१२॥

अस्ति च मनुजगतो नगर्यामतुलबलपराक्रम स्त्रीयांकाम-भुवनय ब्रह्मादिभिरमतिवनमस्थिमयर कमपरिणामो नाम महानरेन्द्र ।

यो नीतिमार्गमनुसृत्य प्रतापैकरस सदा ।
तृणतुल्य जगत्सर्वं विलोकयति हेलया ॥
निर्दयो निरनुक्रोश सर्वावस्थासु देहिनाम् ।
स दण्डमादनो दण्ड पातयत्यनपेक्षया ॥
स च केलिप्रियो दुष्टो लोभादिभिटवेष्टित ।
नाटकेषु परं काष्ठां प्राप्तोऽत्यन्त विचक्षण ॥
नास्ति मत्तो जगत्यन्यो मनेति मदविक्लव ।
स राजोपद्रव कुर्वन्धनायति कस्यचित् ॥
ततो वाक्यपरो लोकान् नानाकारैर्विडम्बनै ।
सर्वान्विडम्बयन्मुख्यैर्नाटयत्यात्मनापत ॥
तेऽपि लोका महान्तोऽपि प्रतापभयविह्वल ।
तस्य पापदर्शी दक्षि तत्तत्सर्वं प्रकुर्वते ॥

ततश्च।

कांश्चित्तारकरूपेणाक्रोशन्तो वेदनातुरान्।
नर्त्तयत्यात्मन प्रीतिं मन्यमानो मुहुर्मुहुः॥
यथा यथा महादुःखैर्विक्लवास्तानुदीक्षते।
तथा तथा मनस्युच्चैरसावत्रैव तोषत॥
कश्चिद्योद्धुरो भूत्वा स इत्थं बत भाषते।
भयविक्लवचित्तत्वाद्राज्ञानिर्दिष्टकारकान्॥
अरे रे तिर्यगाकारं गृहीत्वा रङ्गभूमिषु।
कुरुध्वं नाटकं तूर्णं मम चित्तप्रमोदकम्॥

ततश्च।

काकरासभमार्जारमूषकाकारधारकाः।
सिंहचित्रकशार्दूलमृगवेषविडम्बकाः॥
गजोष्ट्राश्वबलीवर्दकपोतश्येनरूपिणः।
यूकापिपीलिकाकीटमत्कुणाकारधारिणः॥
अनन्तरूपास्तिर्यञ्चो भूत्वा तच्चित्तमोदनम्।
ते नाटकं महाहास्यकारणं नाटयन्ति वै॥
कुब्जवामनमूकान्धदद्रुव्याधिपरागतैः।
तथान्यमानुषैः प्राचैर्नाटकं नाटयत्यसौ॥
ईर्ष्याशोकभयप्रद्वेषैर्विविधवेषविडम्बकैः।
विचित्रं नाटकं दृष्ट्वा स तुष्टो बत जायते॥
तथा यथेष्टचेष्टोऽसौ पुनस्तानेव सुन्दरे।
आकारैर्योजयत्युच्चैर्लोकान्नाटककाम्यया॥

विद्यमानमनाले तेन मालिन प्रभविष्णुना ।
चातारमार्गेण कश्चिन्न जायते कदाचन ॥
न हि विज्ञापमानेन स्वतन्त्रो यश्चिकीर्षति ।
तत्करोत्येव केनापि न निषिद्धो निवर्त्तते ॥

तथा ।

कचिदिष्टवियोगार्त्तं कचित्सङ्गमसुन्दरम् ।
कचिद्रोगभराक्रान्तं कचिद्दारिद्र्यदूषितम् ॥
कचिदापद्गतानेकसम्भ्रमघातदारुणम् ।
कचित्सम्पत्समुद्भूतमहानन्दमनोहरम् ॥
विभ्रम्य कुलमर्यादां प्रधानकुलपुत्रके ।
अन्यायकार्यकारित्वात् कचिद्दर्शित विस्मयम् ॥
कचिदनुरक्तभर्त्तारं मुञ्चद्भि कुलटागणे ।
नीचगामिभिरायत्तं दधाने कुकुलोद्भवे ॥
कचिद्धृतचमत्कारं नृत्यद्भिर्हास्यहेतुभिः ।
स्नातकोत्तीर्णकृत्स्नागमकपालकमण्डले ॥
तदेवंविधदृष्टान्तप्रतिबद्धमनाकुलम् ।
संसारनाटकं जीव नाटयत्येव लीलया ॥
रागद्वेषाभिधानौ द्वौ मुरजौ तत्र नाटके ।
दुष्टाभिसन्धिनामा तु तयोरास्फालको मतः ॥
मानक्रोधादिनामानो गायना कलकण्ठकाः ।
महामोहाभिधानस्तु सूत्रधारः प्रवर्त्तकः ॥
रागाभिलाषसञ्ज्ञोऽत्र नान्दीमङ्गलपाठकः ।

अनेकरूपनेपथ्यकरः कामनामा विदूषकः ॥
इत्यादिभिर्गीयमानो वचसा पापमण्डला ।
येऽपि प्रविस्फारयन्तो भेदस्य मायाप्रयम् ॥
भवादिमया विज्ञेया कल्पितापात्र नाटके ।
लोकाकाशोदरो नाम विशाला रङ्गभूमिका ॥
पुद्गलस्कन्धनामानः प्रेक्षोपस्करसंचयाः ।
इत्थं समस्तसामग्रीयुक्ते नाटकपेटके ॥
अनाद्यनन्तरूपा चाकोरविडम्बितम् ।
अपरापररूपेण कुर्वाणोऽसौ प्रमोदते ॥
कदाच बहुलोकेन नास्ति तस्य किञ्चन ।
यदसौ मनसोऽभीष्टं न करोति यथारुचि ॥

तत्र चैवंविधे विलसन्नटितनर्त्तिते इव [illegible] [illegible] विचरतो यथाभिलषितकारिणः [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] कुमुदिनी कुमुदिनीनामिव [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] प्रधानतमा [illegible] [illegible] [illegible] । सा च तस्य [illegible]

मिति। अतएव चन्द्रिकामिव शशधरो रतिमिव मकरध्वजो
लक्ष्मीमिव केशव पार्वतीमिव त्रिनयनस्तां कालपरिणतिं महा-
देवी कर्मपरिणामो महानरेन्द्रो विरहकातरतया न कदा-
चिदेकाकिनीं विरहयति। किं तर्हि सदैव गच्छंस्तिष्ठंश्चात्मा-
नुवर्त्तिनीं धारयति। सापि च दृढमनुरक्ता भर्त्तरि न तद्वचनं
प्रतिकूलयति। परस्परानुकूलतया हि दम्पत्योः प्रेम निरन्तर
मुपपद्यते नान्यथा। ततस्तथा वर्त्तमानयोस्तयोर्गाढं निरूढमाग-
तम्। प्रेमाविच्छिन्ना तद्विरहनाशका। ततश्चासौ कालपरिणति
गुरुतया महाराजप्रसादस्योन्मादकारितया यौवनस्य तुच्छतया
स्त्रीहृदयस्य चञ्चलतया तत्स्वभावानां कुटिलतया तथाविधविट-
जनस्य सर्वत्र सर्वप्रकारं प्रभवामीति मन्यमाना युक्ता सुषम-
दुःषमादिभिः शरीरभूताभिः प्रियसखीभिः परिवेष्टिता समयाव-
लिका-मुहूर्त्तप्रहरदिनाहोरात्रपक्षमासायनवत्सरयुगपल्योपमसाग-
रोपमावसर्पिण्युत्सर्पिणीपुद्गलपरावर्त्तादिना परिकरेण विविध-
कार्यकरणसमर्थास्मि कोऽहमिति सञ्जातोत्सेकामिवैव कर्मपरि-
णाममहाराजप्रवर्त्तिते विश्वविस्तारनाटके सदैव राज्ञो निकटोपविष्टा
सती सूत्रधारमेव निमन्त्रयति। यदुत यान्येतानि योनिजव-
निकायवर्त्तितानि पात्राणि तिष्ठन्ति मद्वचनेन निर्गच्छन्तु गर्भ-
नेतानि निर्गतानि उत्तानादिव्यापाराणि रटन्तु मातुःस्तनं
पुनर्धूलीधूसराणि रगन्तु भूमौ पुनर्लुठमानानि पदे पदे परिस्ख-
लन्तु चरणाभ्याम्। कुर्वन्तु मृत्पुरीषविमर्दनबीभत्समात्मानम्।
पुनरतिक्रान्तबाल्यभावानि धारयन्तु कुमारताम्। क्रीडन्तु नाना

विधक्रीडाविब्बोके । अभ्यस्यन्तु सकलकलाकलापकौशलम् । पुनरतिलङ्घितकुमारभावान्यध्यासयन्तु तरुणता दर्शयन्तु मन्मथगुरूपदेशानुसारेण सकलविवेकिलोकहास्यकारिणोऽनपेक्षितनिजकुलकलङ्काद्यपायान् कटाक्षविक्षेपादिसारान् नानाकारविलासलासविशेषानिति । प्रवर्त्तन्तां पारदार्यादिष्वसायकार्येषु । पुनरपगततारुण्यानि स्वीकुर्वन्तु मध्यमवयस्ताम् । प्रकटयन्तु सत्त्वबुद्धिपौरुषपराक्रमप्रकर्षम् । पुनरतिवाहितमध्यमवयोभावानि श्रयन्तु जराजीर्णताम् । दर्शयन्तु वलीपलिताङ्गभङ्गकरणविकललमलजबालाविलशरीरताम् । समाचरन्तु विपरीतस्वभावताम् । पुनश्च कवलितसकलजीवितभावानि देहत्यागेन नाटयन्तु मृतरूपताम् । तत पुन प्रविशन्तु योनिजवनिकाभ्यन्तरे । अनुभवन्तु तत्र गर्भकलमलान्तर्गतानि विविधदुःखम् । पुनश्च निगच्छन्तु रूपान्तरमुपादाय कुशलैश्चमनन्तवारा प्रवेशनिर्गमनम् । तदेव सा कालपरिणतिमहादेवी तेषां ससारनाटकान्तर्गतानां समस्तपात्राणामवस्थितरूपेण क्षणद्वयमप्यासितु न ददाति किं तर्हि क्षणे क्षणे वराकाणि तान्यपरापररूपेण परावर्त्तयति । किं च तेषां नृत्यतां यान्युपकरणानि पुद्गलस्कन्धनामानि पूर्वमाख्यातानि तान्यप्यतिचपलस्वभावतया सात्मन प्रभुत्व दर्शयन्ती क्षणे क्षणे अपरापररूप भाजयति । तानि च पात्राणि किं क्रियते तत्र राजाधस्था वशवर्त्ती न चान्योऽस्ति कश्चिदात्मनो मोचनोपाय इति विचिन्त्य निगतिकानि सन्ति । यथा यथा सा कालपरिणतिराज्ञापयति तथा तथा नानाकारमात्मानं विडम्बयन्तीति । किं च । क्रमपरिणामादपि सर्वासामवस्था

कालपरिणतिरासमन्ताधिकतर प्रभुत्वमावेदयन्तीव स्वर्गति । तथा-हि । क्रमपरिणामस्य सभारनाटकाभिनयस्तुत्यानापरापररूपकर-णगोचर एव प्रभाव । तस्मा पुन कालपरिणते सभारनाटकाथ-निकरानीतरूपेष्वपि निवृतिनगरीनिवासिलोकेषु क्षणे क्षणे अप-रापराश्चर्यकरत्वात्पुनरु समस्तदेशगत या प्रशान्तोत्सेकातिरेका किम कुर्यादिति । तदेवमनवरतप्रवृत्तेन परमाद्भुतभूतेन तेन नाटकेन तयोर्देवीनृपयोर्विलोकितेन उपचते मम प्रमोद । तदनन्तरमेव तौ स्वराज्यसमवबुध्येते इति ।

तयोश्च निवृतोरेवमन्यदा रहसि स्थिता ।
स्वस्थ वीक्ष्य राजान सा देवी समवोचत ॥
भुक्त यथाय भोक्तव्य पीत यत्पेयमप्यमा ।
मानित यन्मया मान्य साभिमान च जीवितम् ॥
नाटकेन तदुत्र लोके यस्य नास्वादितो रस ।
प्राप्त समस्तकल्याण प्रसादे देवपादयो ॥
दृष्ट द्रष्टव्यमप्यत्र लोके यच्चापि सुन्दरम् ।
किन्तु पुत्रमुख देव मया नाद्यापि वीक्षितम् ॥
यदि तद्देवपादानां प्रसादादेव जायते ।
ततो मे जीवित साध्यमन्यथा जीवित वृथा ॥

नरपतिरुवाच ।

साधु साधूदित देवि रोचते मह्यमप्यद ।
समदुःखसुखो देव्या वत्सात्र मत्कथस ॥

काले दारकस्य नरनाथेन सविशेषेण पर्यालोच्य यतोऽस्य गर्भाव-
तारकाले जननी मनुजसुन्दर नर वदनेन प्रविशन्तं दृष्टवती ततो-
ऽस्य भवतु भव्यपुरुष इति नाम । ततस्तदाकर्ण्य देवी राजानमु-
वाच देवाहमपि पुत्रकस्य किञ्चिन्नाम कर्तुमभिलषामि तदनुजा-
नातु देव इति । नृपतिराह । देवि कः कार्येषु विरोधोऽभि-
धीयतां यदभीप्सितमिति । ततस्तयोक्तं यतोऽस्य गर्भस्थे मम सुमन-
स्कारणपरिणतिनी मतिरभूत्ततोऽस्य भवतु सुमतिरित्यभिधानम् ।
ततो द्वे चैते मत्स्येपकल्पमेतद्देवीकौशलेन मया यद्भव्यपुरुषस्य
च सुमतिरित्यभिधानान्तरमिति ब्रुवाण परितोषमुपागतो राजा
विहितवान् नामकरणमहोत्सवं कारयामास । इतश्चास्ति तस्यैव
सज्जनानां मध्यमप्रवीणमहेला नाम ब्राह्मणी । सा जनादेन
सर्वानुपूर्वनमस्कारकरणाभ्यासतया यशो प्राप्ता । प्रिय-
वदिका महादेव्ये यत्र यच्छ्रूयते सर्वार्थं जाने यथा कार्यस्व-
रूपमहं देवी भव्यपुरुषनामानं दारकं प्रसूतेति । तत महाविभाव
[illegible] विवर्ण विमनायन्तम् । मध्यबुद्धिर्वदत्याह । यतो मयाप
[illegible] [illegible] [illegible] निर्गत [illegible]
। इदमपि [illegible] । इदानीं पुनरेत
। [illegible] सुमन इति मत्सादर्थम् । [illegible] ।
[illegible] यथा न [illegible] परमार्थं ।
[illegible] इति नाम
[illegible] इति [illegible] इति [illegible] । इदमपि
[illegible] देव [illegible]

र्णाभिरुक्तेति लोके प्रख्यापित । तथाहि । यावन्तः केचिदिह जन्तवो जायन्ते तेषां सर्वेषामेतावेव देवीनृपौ परमवीर्ययुक्ततया परमार्थतया जननीजनकौ ।

अन्यच्च ।

किं न दृष्टं श्रुतं वा कदाचिदपि प्रियसख्या अनयोर्नाटकं प्रवर्त्तो-द्दामकाव्यम् । यदुत राजा कर्मपरिणामः स्वेच्छया नारकतिर्यङ्नरामरगतिभवचक्रवाराणामनेकयोनिलक्षं भवजन्तुरूपेण नाटयति । महादेवी पुनस्तेषामेव महाराजजनितानारूपाणां समरूपाणां गर्भवसतिबालकुमारतरुणमध्यमजराजीर्णमृतगर्भप्रविष्टनिष्क्रमादिरूपावस्थाकारा कारयतीति । अगृहीतसङ्केताह । प्रियसखि श्रुतमेतत्कथा किन्तु यदि नाम कर्मपरिणामस्य राज्ञः समस्तपापवपरावर्त्तने सामर्थ्यं कालपरिणतेर्वा महादेव्यास्तेषामेवापरापरावस्थाकरणशक्तिः तत्किमेतावतैतयोर्जननीजनकत्वं समर्थ्यते । प्रज्ञाविशालाह । अयि प्रियसखि अत्यन्तमुग्धासि यतो गौरवीडाङ्कितमवबुध्यते स पुनः परिस्फुटमपि कथ्यमानं न जानीषे । यत अपारप्रवाह परमार्थतो नाटकम् । तस्य च यौ जनकावेतौ परमार्थत एव जननीजनकाविति । अगृहीतसङ्केताह । प्रियसखि यदि समस्तजन्तुजननीजनकयोरपि देवीनृपयोर्देवा सम्बन्धात् नृपस्य निर्बीजत्व दुर्जनवदुर्दोषभयादविवेकादिभिरभिभि प्रख्यापितं लोके तत्किमित्यधुनाय भवदुक्तयोरनयोः पुत्रतया महोत्सवकल्लोलेन प्रख्यापित इति ।

प्रज्ञाविशालाह । समाकर्णयाक्ष प्रख्यापने कारणम् । अत्र-

अस्यामेव नगर्यां शुद्धसत्त्ववादी समस्तसत्त्वसङ्घातहितकारी सर्वभाव-
स्वभाववेदी अनयोश्च कालपरिणतिकर्मपरिणामयोर्देवीनृपयो
समस्तरहस्यस्थानेष्वत्यन्तभेदज्ञः सदागमो नाम परमपुरुषः । अस्ति
च तेन सार्द्धं मम घटना । सचान्यदा दृष्टो मया सहर्षं । पृष्टो
निर्बन्धेन हर्षकारणम् । तेनोक्तम् । आकर्णय भद्रे यदि कुतू-
हलम् । येयं कालपरिणतिर्महादेवी अनया रहसि विज्ञापितो
राजा यदुत निर्विषादमनेनात्मनोऽङ्गीकृतवन्ध्याप्रवादेन । यतो-
ऽहमनन्तापत्यापि दुर्जनचतुर्दोषभयाद्विवेकादिभिरस्मिभिर्वन्ध्येति
प्रख्यापिता लोके ममैवापत्यान्यन्यजनापत्यतया गीयन्ते । सोऽयं
खेदजननिमित्तेन नाटकत्यागन्यायः । तदिदं वन्ध्याभावलक्षणं ममा-
यशःकलङ्कं क्षालयितुमर्हति देव । ततो नृपेणोक्तम् । देवि ममापि
निर्बीजतया समानमेतत् केवलं धीरा भव । लब्धो मया अयम-
पत्यलाभोपायः । देव्याह । कतमोऽसौ । प्रभुराह । देव्यस्या-
मेव मनुजगतौ महाराजधान्यां वर्त्तमानया भवत्या सन्निमण्डल-
वचनमपेक्ष्य प्रकाश्यते प्रधानपुरुषस्य जन्म । क्रियते महानन्द-
कलकलः । ततश्चिरकालरूढमप्यावयोर्निर्बीजत्ववन्ध्याभावलक्षणम-
यशःकलङ्कं क्षालितं भविष्यतीति । तत इतीयत्या प्रतिपन्नं महा-
राजवचनं देव्या कृतं च यथोचितं ताभ्याम् । ततः प्रज्ञाविशाले
योऽयं भव्यपुरुषो जातः स ममात्यन्तवल्लभः । अस्य जन्मनाऽहमा-
त्मानं सफलमवगच्छामीत्यतो हर्षमुपागत इति । ततो मयोक्तम् ।
शोभनं ते हर्षकारणम् । ततोऽयमनेन कारणेन भव्यपुरुषो देवी-
नृपपुत्रतया प्रकाशित इति । अगृहीतसङ्केतयोक्तम् । साधु वयस्ये

साधु सुन्दरमाख्यातं भवत्या नाशितो मे सन्देहः । यदा च त्वत्समीपमुपगच्छन्त्या मया हट्टमार्गे समाकर्णितो लोकप्रवाद-स्तदा देवीनृपयोः चालितसेवायत्नकमहमवगच्छामि । प्रज्ञा-विशालयोक्तम् । किमाकर्णितं प्रियसख्या । तयोक्तम् । दृष्टो मया तत्र सकललोकमध्ये सुन्दराकारः पुरुषः स च सविनयं पृष्टः पौर-महत्तमैः । भगवन् य एष राजदारको जातः स कीदृग्गुणो भवि-ष्यतीति । तेनोक्तम् । भद्राः शृणुत । समस्तगुणभारभाजनमेष बहुना कालक्रमेण भविष्यतीत्यतो न शक्यन्तेऽस्य सर्वे गुणाः कथयितुम् । कथिता अपि न पार्यन्तेऽवधारयितुम् । तथापि लेशोद्देशेन कथयामि । भविष्यत्येष निदर्शनं रूपस्य निलयो यौवनस्य मन्दिरं लावण्यस्य दृष्टान्तः प्रश्रयस्य निकेतनमौदार्यस्य निधिर्विनयस्य सदनं गाम्भीर्यस्य आलयो विज्ञानस्य आकरो दाक्षिण्यस्य जन्म-भूमिर्दाक्ष्यस्य इयत्तापरिच्छेदः स्थैर्यस्य मर्यादागोचरो सन्नाथः सदाचारस्य विषयप्रागल्भ्यस्य भर्ता प्रतिसंविन्निष्ठाविविदिषादि-सुन्दरीणामिति । अन्यच्चानेकभराभ्यस्तकुसुमशरतया बालकालेऽपि प्रवर्तमानोऽयं न भविष्यति कलिप्रियः दर्शयिष्यति जने वत्सलतां समाचरिष्यति गुरुविनयं प्रकटयिष्यति धर्मानुरागं न करिष्यति लोलतां विषयेषु विजेष्यते कामक्रोधादिकमान्तरं अरिषड्वर्गं नन्दयिष्यति भर्तारं चिरकालमिति । ततस्तदा वचः श्रुत्वा हृष्टैः च दृष्टा निरीक्षमाणैः पौरैरभिहितमहो विषमतोऽलकया समस्तजनविस्मयहेतुभूतयापि कालपरिणत्या कथपरिणामेन चेह लोके सुन्दरमाचरितम् । यदाश्चर्यमनेकदेशविख्यातायां मनु

जन्तौ नगर्यामेव भव्यपुरुषः सुमतिर्जनित । चालितान्येतस्मान्-
मेनाभ्यासमात्रेन समस्तदुश्चरितान्यपुष्पायमस्येति । तदिदं समस्त-
मत्रचिन्तितया मयाकर्णितं तत एव सञ्जातो मे मनसि वितर्कः
कथं पुनरनयतया प्रभिन्नयोर्वीणुपयोः पुत्रोत्पत्तिः । को वैव
पुरुषः सत्य एव भविष्यत्कालभाविनो राजदारककथ्यता समस्ता
कथयतीति । ततश्चिन्तितं मया प्रियमसौमेतद्द्वयमपि प्रक्ष्य-
ग्यामि । कुमत्ता हि सा मांसलतामाना तथापनीतो भवया
प्रथम सन्देहः साम्प्रतं मे द्वितीयमपनयतु भगवती । प्रज्ञाविशाला
लोकम् । वयस्ये कार्यद्वारेणाहमगच्छामि स एव मम परिचित
परमपुरुषः सदागमनामा तदाचचाणोऽवलोकितो भावया । अत
स यातीतानागतवर्तमानकालभाविनो भावान् करतलगतामलक
मिव प्रतिपादयितुं पटिष्ठो नापर । यतो त्रिलोकेऽस्मिन् मनुष्य
न्तो नगर्यामन्योऽपि तादृशा अभिनिबोधावधिमनःपर्यायकेवल
नाम सञ्ज्ञाः परमपुरुषाः केवलं न तेषां परप्रतिपादनसा-
मर्थ्यं । मूका हि ते चत्वारोऽपि स्वरूपेण । तेषामपि स
न्दृश्यमानसमस्तमान परगुणप्रकाशनध्यमनितया लोकमध्य-
मेव एव सदागमो भगवान्प्रकाशयति । भव्यजीवमहतयोऽस्य
वचसा हि पुनः कारणेन राजदारको च सदागमस्यास्य समीपेऽ
पि वैश्वानरनाम्नासमयं समन्तमागच्छतीति योऽनुभिज्ञासि
प्रज्ञाविशालसन्तस्म । एष हि सदागमतया समस्तं पदार्थ
करतलगतवत् समस्तवस्तुता विनिमाघवत्या । ऋजुमीते पापि
ष्ठा श्रवणं नापि वचनं श्रवणं ते हि न कथयन्ति पराङ्गं यत्

भगवतो माहात्म्यम्। ततस्तेभ्यो हितमुपदिशन्तमप्येनं सदागमं
केचिद् दूषयन्ति केचिदपकर्णयन्ति केचिदुपहसन्ति केचिदुपदिष्टा-
करणप्रत्निमात्मानो दीपयन्ति केचित्तद्वचनाद्दूरत एव नश्यन्ति
केचिच्च प्रतारकधिया शङ्कन्ते केचित्तद्वचनमादित एव नावबुध्यन्ते
केचित्तद्वचनं श्रुतमपि न रोचयन्ति केचित्तद्रोचितमपि नानु-
तिष्ठन्ति केचिन्नुष्ठानमधिकृतमपि पुनः शिथिलयन्ति ततश्चैवं
स्थितेनास्य सम्यक् सम्पद्यते परोपकारकरणलक्षणा समीहितसिद्धिः।
ततोऽयमनया सततं प्राणिनामपात्रतया गाढमुद्वेजितः भवत्येव
हि गुरूणामपि निष्फलतया कुपात्रगोचरो महाप्रयासश्चित्तखेद-
हेतुरयं तु राजदारको भव्यपुरुष इति पात्रभूतोऽस्य प्रतिभासते।
भव्यपुरुषः सन्नपि यदि दुष्कृती स्यात् ततो न पात्रतां लभेत।
अयं तु राजदारको यतः सुमतिरतः पात्रभूत एवेति कृत्वामुष्य
सदागमस्यात्यन्तवल्लभः।

अन्यच्चायं सदागमो मन्यते यतोऽस्य दारकस्यैकरूपतया
जनकत्वादेव सुन्दरः कर्मपरिणामः। जननीत्वादेव चानुकूला
कालपरिणतिः। ततोऽयं विमुक्तबालभावः सुन्दरतया निजस्वभा-
वस्य प्रत्यासन्नतया कल्याणपारम्पर्यस्य प्रमोदहेतुस्तथैवंविधपुरु-
षाणां मद्वचनमत्यनुपलभ्य नियमेनास्य भविष्यति मनस्येवं विधो
वितर्कः। यथा सुन्दरोऽयं मनुजगतिनगरी यस्यामेवं सदागमः
परमपुरुषः प्रतिवसति। ममाप्यस्ति प्रायेण योग्यता काचित्तथा-
विधा यया तेन सह मीलकं घटते। ततोऽमुं परमपुरुषं विन-
येनाराध्यास्य सम्बन्धि ज्ञानमभ्यस्यामि। ततोऽनुगुणत्वाज्जननीजन-

कयोद्वाभ्यां ममपिता भविष्यति ममैव शिष्यः । ततोऽहमत्र
सकामितमित्रग्राम कृतकृत्यो भविष्यामीति बुध्याय सदागमोऽस्य
सुमतेर्भव्यपुरुषस्य जन्मना सफलमात्मानमवगच्छतीति । अत एव
सञ्जातपरितोषतया जनममुं राजदारकगुणानेव वर्णयति । अगृ-
हीतसङ्केतयोक्तम् । प्रियमसि किंपुनरस्य भगवतः सदागमस्य मात्राश्च
यदेते पापिष्ठलोका नावबुध्यन्ते । अनवबुध्यमानाश्च नास्य वचने
वर्त्तन्ते इति । प्रज्ञाविशालयोक्तं वयस्ये समाकर्णय । य एष सर्वत्रा-
निवारितशक्तिप्रसरः कर्मपरिणामो महाराजो यथेष्टचेष्टया संसार-
नाटकमावर्त्तयमानः सततमीश्वरान् दरिद्रयति सुभगान् दुर्भग-
यति सुरूपान् कुरूपयति पण्डितान्मूर्खयति शूरान् क्लीवयति
मानिनो दीनयति तिरश्चो नारकायति नारकान्मनुष्ययति मनु-
ष्यान्देवयति देवान् पशुभावमानयति नरेन्द्रमपि कीटयति चक्र-
वर्त्तिनमपि द्रमकयति दरिद्रादीश्वरादिभावान् प्रापयति किम्ब-
हुना यथेष्टं भावपरिवर्त्तनं विदधानो न क्वचित्प्रतिहन्यते ।
स्वयमप्यस्य भगवतः सदागमस्य सम्बन्धिनोऽभिधानादपि बिभेति
गन्धादपि पलायते । तथाहि । तावदेष कर्मपरिणाम एतान्सम-
स्तलोकान्संसारनाटकविडम्बनया विडम्बयति । यावदस्य सदागमो
भगवान् हुङ्कारयति । यदि पुनरेष हुङ्कारयेत्ततो भयातिरेकग्रस्त-
समस्तगात्रो महासमरसङ्घट्टे कातरनर इव प्राणान् स्वयमेव समस्ता-
नपि मुञ्चेत् । मोचिताश्चानेनामुष्मादनन्ताः प्राणिनः । अगृहीत-
सङ्केतयोक्तम् । ते किमिति न दृश्यन्ते । प्रज्ञाविशालाह । अस्ति
कर्मपरिणाममहाराजभुक्तेरतिक्रान्ता निर्वृतिनाम महानगरी ।

ततस्ते सदागमाग्रद्वारेण कर्मपरिणाममप्रभवन्तमात्मन्युपलभ्य मोचिताः। अथ सदागमेनेति मत्वा कर्मपरिणामस्यैरपि पादद्वारद्वारेणोड्डीय तस्यां गच्छन्ति। गतास्तस्यां सकलकालं समस्तोपद्रवरहिता परमसुखिनस्तिष्ठन्ति। तेन कारणेन ते नेह दृश्यन्ते। यच्चैतदप्येतयोक्तम्। यदुत किमित्येष सर्वलोकान्न मोचयति। कदर्थिता ह्येते वराकाः सर्वेऽप्यनेनातिविषमशीलतया कर्मपरिणामराजेन। ततो युक्तमस्य महापुरुषस्येदृशस्य सत्त्वानेवंविधान्को तत्कदर्थनस्योपेक्षणमिति। प्रज्ञाविशालाह। सत्यमेतत्केवलं प्रकृतिरियमस्य भगवतः सदागमस्य। यया वचनविपरीतकारिषु कृपालेशमवधीरणां विधत्ते। ततस्तेनावधीरिताः सन्तो नाथरहिता इति मत्वा गाढतरं कर्मपरिणामराजेन कदर्थ्यन्ते। ये तु पापभीरुतयास्य निर्देशकारिणो भवन्ति तानेव स्वां प्रकृतिमनुवर्तमानः कर्मपरिणामकदर्थनाया अवश्यं मोचयति। येऽपि लोका भगवतोऽस्य सदागमस्योपरि भक्तिमन्तोऽप्यस्य सम्बन्धिवचनं तथाविधशक्तिविकलतया सम्पूर्णमनुष्ठातुं न शक्नुवन्ति किं तर्हि तन्मध्याद्बहुतम बहुतर बहुस्तोक स्तोकतर स्तोकतम वा कुर्वन्ति भक्तिमात्रक वास्योपरि विदधति। नाममात्र वास्य श्रद्दधन्ति। यदि वा येऽस्य भगवतः सम्बन्धिनि वचने वर्तन्ते महात्मानस्तेषामुपरि धन्याः कृतार्थाः पुण्यभाजः सुलब्धजन्मान एते इत्यादि वचनलिङ्गम्य पक्षपातं कुर्वन्ति। यदास्य भगवतोऽभिधानमात्रमप्यजानाना प्रकृत्यैव ये भद्रका भवन्ति। ततश्च मार्गानुसारिसदन्धन्यायेनानाभोगतोऽप्यस्य वचनानुसारेण वर्तन्ते तानप्ययं विधानमस्य विकलत्वान् लोका

नैष कर्मपरिणामो महानरेन्द्रो यद्यपि स्वमारम्भाटके कियन्तमपि कालं नाटयति तथापि सदागमस्याभिप्रेत एव इति मत्वा माध्यस्थभावं नारकतिर्यङ्मानुषकदमररूपं तेषां विधत्ते।

किन्तर्हि केषाञ्चिदनुत्तरसुररूपं दर्शयति। केषाञ्चिद् ग्रैवेयकामराकारं प्रकटयति। केषाञ्चिदुपरितनकल्पोपपन्नदेवरूपतां जनयति। केषाञ्चिदधस्तनकल्पोत्पन्नमहर्द्धिलेखकरणं कारयति। केषाञ्चिद्भुवि भूरूपतां लक्षयति। केषाञ्चिच्चक्रवर्तिमहामण्डलिकादिप्रधानपुरुषभावं भावयति। सर्वथा प्रधानपात्ररूपतां विहाय न कदाचिद्रूपान्तरेण तान्नर्त्तयति। तत्पश्यास्मैतावतास्य भगवतः सदागमस्य माहात्म्येन। यदेवंविधमास्थयुक्तोऽप्येष कर्मपरिणामो महानृपतिरेतद्भयाक्रान्तहृदयः खल्वेव वर्त्तते।

अन्यच्च कथ्यते तुभ्यं कौतुकं यदि विद्यते।
रूपं सदागमस्यास्य तद् बुध्यस्व मृगेक्षणे॥
एष एव जगन्नाथो वत्सलः परमार्थतः।
एष एव जगच्चक्षुरेष एव सुबान्धवः॥
एष एव विपद्गर्त्ते पततामवलम्बनम्।
एष एव भवाटव्यामटतां मार्गदेशकः॥
एष एव महावैद्यः सर्वव्याधिनिवर्हणः।
एष एव भवोच्छेदकारणं परमौषधम्॥
एष एव जगद्दीपः सर्ववस्तुप्रकाशकः।
प्रमादराक्षसात्त्रूनमेष एव विमोचकः॥
एषोऽविरतिजम्बालकम्पपत्तालनक्षमः।

एष एव च योगानां दृष्टानां वरयोगतः ॥
हृदादिवरटाणां स्नायुबन्धने क्षमे ।
सर्वो भगवानेव नान्यस्य विमोचने ॥
एष एव महाघोरनरकोद्धरणक्षमः ।
परात्मद् सम्पातानामायकोऽप्येष देहिनाम् ॥
एष एव क्षुधानुत्पद्दुःखविच्छेदकारणम् ।
एष एव कुदेवजन सन्तापनाशकः ॥
महानदविच्छेदे एष एव कुठारकः ।
एष एव महानिद्राद्रावणः प्रतिबोधकः ॥
एष स्वाभाविकानन्दकारणेन गीयते ।
मातापातोदयोत्पाद मिथ्याबुद्धिविधूनकः ॥
एष एव हृत्क्रोधवह्निविध्यापने जलम् ।
एष एव महामानपर्वतोद्दलने पविः ॥
एष मायामहाव्याघ्रीपातने शरभायते ।
एष एव महालोभनीरदे शोषणानिलः ॥
एष हास्यविकारस्य गाढ प्रशमनक्षमः ।
एष मोहोदयोत्पाद्यां रतिं निशामयत्यलम् ॥
एष एवाभिपन्ने जनेऽधिकजगन्नायते ।
एष एव भयोद्भ्रान्तसत्त्वशरणक्षमः ॥
एष शोकभराक्रान्तं सधीरयति देहिनम् ।
एष एव जुगुप्सादिविकारं शमयत्यलम् ॥
एष कामपिशाचस्य दृढमुच्चाटने पटुः ।

एष एव च मार्तण्डो मिथ्यात्वध्वान्तसूदनः ॥
एष एव चतुर्भेदजीवितोच्छेदकारणम्।
यतो जीवं ततोऽतीते नयत्येष शिवालये॥
शुभेतरेण या नाम्ना कृता लोकविडम्बना।
छिन्ते तामेष लोकानामनङ्गस्यानदानतः ॥
सर्वोत्तमत्वं भक्तानां विधायाक्षयमव्ययम्।
एष एव छिनत्युच्चैनीचैर्गोत्रविडम्बनाम् ॥
एष एव च दानादिशक्तिसन्दोहकारणम्।
एष एव महावीर्ययोगहेतुरुदाहृतः ॥
अन्यच्च ये महापापा निर्भाग्याः पुरुषाधमाः।
न ते सदागमस्यास्य नामापि बहु मन्यते ॥
ततस्तेन नरेन्द्रेण ते पूर्वोक्तविधानतः।
संसारनाटकैर्नीचैः कदर्थ्यन्ते निरन्तरम् ॥
ये एव भाविकल्याणाः पुण्यभाजो नरोत्तमाः।
ते सदागमनिर्देशं कुर्वन्ति महदादरात् ॥
ततोऽपकथ्य राजानं ते विडम्बनकारिणम्।
संसारनाटकान्मुक्ता मोदन्ते निर्वृतौ गताः ॥
राजभुक्तौ वसन्तोऽपि राजानं क्षपतुल्यकम्।
सदागमप्रसादेन मन्यन्ते ते निराकुलाः ॥
किंवात्र बहुनोक्तेन नास्ति तदस्य किञ्चन।
सदागमेऽस्मिन् भक्तानां सुन्दरं यन्न जायते ॥
तदेतदस्य माहात्म्यं किञ्चिल्लेशेन वर्णितम्।

विशेषेण पुनः कोऽस्य गुणानां वर्णनक्षमः ॥
ततः प्रज्ञाविशालाया वाक्यमाकर्ण्य विस्मिता ।
हृदये चिन्तयत्येव सा सन्देहमुपागता ॥
यदिदं प्रियसख्या मे विहितं गुणवर्णनम् ।
यदि सत्यमिदं तेन नास्ति तुल्यस्ततोऽपरः ॥
अतः पश्यामि न तावत्करोमि स्वविनिश्चयम् ।
परप्रत्ययतो ज्ञाते न सन्देहो निवर्तते ॥

ततश्चैव विचिन्त्य तया अगृहीतसङ्केतयाभिहिता प्रज्ञाविशाला। प्रियसखि सुनिश्चितं सत्यवादिनीमपि भवतीमधुनाहमनेन सदागमस्याश्लाघनीयगुणवर्णनेनासङ्गतभाषिणीमिव परिकल्पयामि। भवन्ति च मे मनसि विकल्पाः किल परिचितमिति कृत्वा एषा वर्णयति। अन्यथा कथं कर्मपरिणामो महानरेन्द्र कुतश्चिदभिधात्। कथं वैकत्र पुरुषे एतावान् गुणसङ्घातः सम्भाव्येत। न च प्रियसखी कदाचन मां विप्रलम्भयति। ततः सन्देहापन्नं दोलायते मे मनः अतस्तमात्मपरिचितं परमपुरुषं विशेषतो दर्शयितुमर्हति मे भवती।

प्रज्ञाविशालाह। सुन्दरमेतदभिप्रेतमेव मे हृदयस्याभिगमनीयो द्रष्टव्य एवासौ भगवान्। ततो गते द्वे अपि तन्मूलम्। दृष्टश्च ताभ्यां तत्र महाविजयरूपापणपङ्क्तिभिर्विराजितस्यानेककापुरुषाकीर्णस्य महाविदेहरूपस्य विपणिमार्गस्य मध्ये वर्तमानः प्रधानजनपरिकरितो भूतभवद्भविष्यद्भावस्वभावाविर्भावनं कुर्वाणो भगवान् सदागमः। ततः प्रत्यासन्नीभूय प्रणम्य तच्चरणयुगलमुप-

विष्टे ते तन्निकटे। तदाकृतिदर्शनादेव सवङ्कमान मुञ्चमुक्षवि शोकनादमगृहीतमहेताया प्रनष्ट इव सन्देहो वर्द्धितचित्तानन समुत्पन्नो विश्रम्भो मतात्मन कृतार्थता तद्दर्शनेनेति। तत प्रज्ञाविशाला प्रत्यभिहितमनया।

अपि च।

धन्यासि त्वं महाभागे सुन्दरं तव जीवितम्।
यस्याः परिचयोऽनेन पुरुषेण महात्मना॥
अहं तु मन्दभाग्यास्मि वञ्चितास्मि पुरा यया।
न दृष्टोऽयं महाभाग पुरुषः पूतकल्मषः॥
नाधन्या प्राप्नुवन्तीमं भगवन्तं सदागमम्।
निर्लक्षणनरो नैव चिन्तामणिमवाप्नुते॥
सजाता पूतपापाहमधुना मृगलोचने।
तव प्रसादाद्दृष्टेऽयं महाभाग सदागमम्॥
त्वया कमलपत्राक्षि येऽस्य सवर्णिता गुणाः।
ते तथैव मया सर्वे दर्शनादेव निश्चिताः॥
नाहं विशेषतोऽद्यापि वेद्म्यस्य गुणगौरवम्।
नास्त्यन्यः पुरुषोऽनेन तुल्य एतत्तु लक्षये॥
आसीन्मे मन्दभाग्याया पुरेमं प्रति संशयः।
गुणेषु दर्शनादेव सांप्रतं प्रलयं गतः॥
निगूढचरितासि त्वं यस्य सद्भाववर्जिता।
यया न दर्शितः पूर्वं ममैषः पुरुषोत्तमः॥
तस्मात्तत मयात्यन्तं भवत्या सह सुन्दरि।

दिने दिने समागत्य कर्णेया पर्युपासना ॥
कृता स्वरूपमाचार चित्ताराधनमुत्सुके ।
तथास्य सर्वे चावद्भि ज्ञात कालेन भूयसा ॥
अतो ममापि तत्सर्वं निवेद्य वस्तुभाषिणि ।
येनाहमेनमाराध्य भवामि तव सन्निभा ॥
तत प्रज्ञाविशालाह चारुचारुद्दित प्रिये ।
यदैव कुरुषे यत्न सफलो मे परिश्रम ॥
अहो विशेषविज्ञानमहो वचनकौशलम् ।
अहो कृतज्ञता गुर्वी तवैव चारुलोचने ॥
अद्वैताभावतो भद्रे न जानीषे सदागमम् ।
तथापि परमार्थेन योग्यता तव विद्यते ॥
एव च कुर्वती नित्य मया सार्द्धं विचारणम् ।
अज्ञातपरमार्थापि ज्ञाततत्त्वा भविष्यसि ॥
तत सञ्जाततोषे ते नमस्कृत्य सदागमम् ।
प्रियसख्यौ गते तावत्स्वस्थान तत्र वासरे ॥
एव दिने दिने सख्यो कुर्वत्यो सेवना तयो ।
सदागमस्य गच्छन्ति दिनानि किल लीलया ॥
अथान्यदा विशालाक्षी प्रोक्ता सा तेन धीमता ।
प्रज्ञाविशाला सानन्द पुरुषेण महात्मना ॥
एव सद्गुणाधारो भवत्या खेदनिर्भर ।
बालकालात्समारभ्य कश्चयो राजदारक ॥
गत्वा राजकुल भद्रे विधाय दृढसङ्गतम् ।

आवर्ज्य जननीचित्त धात्री भव कथञ्चन ॥
त्वयि सञ्जातविश्रम्भो येनाय राजदारक ।
सुख विवर्द्धमानोऽपि प्रयाति मम वश्यताम् ॥
ततो निश्चित्य निःशेषमात्मीय ज्ञानकौशलम् ।
सुपात्रेऽत्र भविष्यामि कृतकृत्योऽहमञ्जसा ॥
ततो यदादिशत्यार्य इत्युक्त्वा नतमस्तका ॥
प्रज्ञाविशाला तद्वाक्यमनुतस्थौ कृतादरा ॥
अथासौ भव्यपुरुषस्ता धात्री प्राप्य सुन्दराम् ।
लाल्यमान सुखेनास्ते देववद्दिवि निर्भरा ॥
क्रमात्प्रवर्द्धमानोऽसौ कल्पपादपसन्निभ ।
सञ्जात सर्वलोकाना लोचनानन्ददायक ॥
ये ते सदागमेनोच्चैर्भाविनो वर्णिता गुणा ।
आविर्भूता समस्तास्ते कौमारे तस्य तिष्ठत ॥
तत परिचय कर्त्तुं तया प्रज्ञाविशालया ।
नीत सदागमाभ्यर्णं सोऽन्यदा राजदारक ॥
स च त वीक्ष्य पुण्यात्मा महाभाग सदागमम् ।
आविर्भूततया धन्य पर हर्षमुपागत ॥
तत प्रणम्य सद्भक्त्या निषण्णोऽसौ तदन्तिके ।
आकर्णित मनोहारि तद्वाक्यममृतोपमम् ॥
आवर्जितो गुणैस्तस्य शशाङ्ककरनिर्मलै ।
स भव्यपुरुषश्चित्ते ततश्चेदमचिन्तयत् ॥
अहो वाक्यमाधुर्यमहो रूपमहो गुणाः

यस्तो हि धन्यता येन नरोऽयमवलोकितः ॥
धन्येव नगरी यस्यां वसत्येव सदागमः ।
अज्ञानं प्रलयं यातोऽद्य दर्शनादस्य धीमतः ॥
गुणैरेव सद्भूतभावविभावविभावनम् ।
भाषते भगवानुच्चैः करोत्येष सदागमः ॥
तदेष मदुपाध्यायो यदि सम्पद्यते मम ।
ततोऽहमस्य नेदिष्ठो भवामि भक्त्या कृती ॥
तत्र प्रज्ञाविशालायाश्चित्ताकूतं निवेदितम् ।
कर्मोत्सुक्ययोगत्वात् तयापि कथितं वचः ॥
मादृर्शनतयाप्तोऽथ प्रविधाय महोत्सवम् ।
ततः समर्पितस्तस्मै सोऽन्यदा शुभवासरे ॥

कथम् ।

कृतकौतुकसत्कारः परिपूज्य सदागमम् ।
स भव्यपुरुषस्तस्य स्निग्धत्वेन निवेदितः ॥
सिताम्बरधरो धीरः सितभूषणभूषितः ।
सितपुष्पभराकीर्णः सितचन्दनचर्चितः ॥
ततो महाप्रमोदेन विनयेन विनेयताम् ।
प्रपन्नस्तस्य पुण्यात्मा कलाग्रहणकाम्यया ॥
ततो दिने दिने याति स पार्श्वे तस्य धीमतः ।
सदागमस्य जिज्ञासुः सार्द्धं प्रज्ञाविशालया ॥
अन्यदा बहुमार्गेऽसौ लीलयास्ते सदागमः ।
स भव्यपुरुषोऽभ्यर्णे युक्तः प्रज्ञाविशालया ॥

स भूरिनरसङ्घातपरिवारितविग्रहः।
अशेषभावसद्भाव वदन्नास्ते सदागम ॥
अथागृहीतसङ्केता सख्या पार्श्वे समागता।
नत्वा सदागम सापि निषण्णा शुद्धभूतले ॥
पृष्टा प्रियसखीवार्ता मानितो राजदारक।
स्थिता सदागममुख पश्यन्ती स्तिमितेक्षणा ॥

इतश्चैककालमेवैकस्या दिशि समुल्लसितो वा कलकल। श्रूयते निरसविषमडिण्डिमध्वनि। समाकर्ण्यते दुदान्तलोकहतोद्घोष।
तत पातिता तदभिमुखा समस्तपर्षदा दृष्टि। यावद्विलिप्तसमस्त गात्रो भस्मना चर्चितो गैरिकहस्तकै खचितस्तृणमषीपुण्ड्रकैर्विना-टितो लम्बमानया कणवीरसुमदामालया विडम्बितो वक्षस्थले घूर्ण-मानया शरावमालया धारितातपत्रो जरत्पिटकखण्डेन बद्धलोप्त्रो गलैकदेशे आरोपितो रासभे वेष्टित समन्ताद्राजपुरुषै निन्द्यमानो लोकेन प्रकम्पमानशरीर तरलतारमितस्ततश्चातिकातरया भयोद्-भ्रान्तहृदयो दशापि दिशो निरीक्षमाणो नातिदूरादेव दृष्ट ससारिजीवनामा तस्कर।

त च दृष्ट्वा सञ्जाता प्रज्ञाविशालाया करुणा। चिन्तितमनया यदि परमस्य वराकस्यामुष्मात् सदागमात्मकाशात् त्राण नान्य-स्मात्कुतश्चित्ततो गता तदभिमुखम्। दर्शितोऽस्मै यत्नेन सदागमो ऽभिहित च। भद्रामु भगवन्त शरण प्रतिपद्यस्वेति। स च सदा-गममुपलभ्य सहसा सञ्जाताश्वास इव किञ्चिच्चिन्तयन्नाख्येयमन्त-स्थान्तर वेदयमान। पश्यतामेव लोकानां निमीलिताक्ष पतितो

धरणीतले । स्थितः कियन्तमपि कालं निद्रया । किमेतदिति विस्मिता नागरिकाः । लब्धा कथञ्चिच्चेतना तेन समुत्थाय सदागमसुहृद्ग्रामी त्रायध्वं त्रायध्वमिति महता शब्देन पूत्कृतवान् । ततो माभैषीरभयमभयं तवेत्याश्वासितोऽसौ सदागमेन ।

ततस्तदाकर्ण्य प्रपन्नोऽयं सदागमस्य शरणम् । अङ्गीकृतश्चानेन जातो न गोचरोऽधुना राजग्राह्यस्येति विचिन्त्य विदितसदागममाहात्म्याः सभयाः मत्तकपर्दैरुपहताः कम्पमानाङ्गा राजपुरुषाः स्थिता दूरदेशे । ततो विश्रब्धीभूतो मनाक् संसारिजीव इतोऽगृहीतसङ्केतया । भद्र कतमेन व्यतिकरेण गृहीतस्त्वमेभिः कृतान्तदूतै राजपुरुषैरिति ।

सोऽवोचदलमनेन व्यतिकरेण । अनाख्येय एवैष व्यतिकरः । यदि वा जानन्त्येवामी व्यतिकरं भगवन्तः सदागमनाथाः किमाख्यातेन । सदागमेनोक्तम् । भद्र महत्कुतूहलमस्यास्तदपनोदाय कथयतु भवान् को दोषः । संसारिजीवेनोक्तं यद्याज्ञापयन्ति नाथाः । केवलं जनसमक्षमात्मविडम्बनां कथयितुं न पारयामि । ततो विविक्तमादिशन्तु नाथा इति । ततः सदागमेन विलोकिता परितः स्थिता गता दूरदेशे । प्रज्ञाविशालाप्युत्तिष्ठन्ती समस्याः कथयस्वेति भणित्वा धारिता सदागमेन । तथाच निकटवर्तिसदागमवचनेनैव भव्यपुरुषोऽपि स्थित एव । ततस्तेषां चतुर्णामपि पुरतः केवलमगृहीतसङ्केतामुद्दिश्य प्रजल्पितोऽसौ संसारिजीवः ।

अस्तीह लोके आकाशप्रतिष्ठमनन्तजनाकुलमसंव्यवहारं नाम नगरम् । तत्र सर्वस्मिन्नेव नगरेऽनादिवनस्पतिनामानः कुलपुत्रकाः

प्रतिवसन्ति । तस्मिंश्चापरे कर्मपरिणामस्य महानरेन्द्रस्य नियोगा-
दत्यन्ताबोधतीव्रमोहोदयनामानौ सकलकालव्यापिनौ बलाधि-
कृतमहत्तमौ प्रतिवसतः । ताभ्यां । [illegible]
तत्र नगरे वास्तव्या लोकाः सर्वेऽपि कर्मपरिणाममहाराजादे-
शेनैव सुप्ता इवात्यन्तचैतन्यतया मत्ता इव कार्याकार्यविचारशून्य-
तया मूर्च्छिता इव परस्परं लोलीभूततया मृता इव मध्यमाभि-
मिष्टचेष्टाविकलतया निगोदाभिधानेष्वपवरकेषु निबिडसंपिण्डि-
ताः सकलकालं धार्यन्ते । अत एव च ते लोका गाढमूढतया
न किञ्चिच्चेतयन्ति । न भाषन्ते । न विशिष्टं चेष्टन्ते । नापि ते
छिद्यन्ते । न भिद्यन्ते न दह्यन्ते । न ग्राह्यन्ते । न कुथ्यन्ते । न
प्रतिघातमापद्यन्ते । न व्यक्तां वेदनामनुभवन्ति । नाप्यन्यं कञ्चन
लोकव्यवहारं कुर्वन्ति । इदमेव च कारणमुररीकृत्य तन्नगरमसं-
व्यवहारमिति नाम्ना गीयते । तत्र नगरे संसारिजीवनामा
वास्तव्यः कुटुम्बिकोऽभूवम् । गतश्च तत्र वसतो ममानन्तः कालः ।
अन्यदा दृष्टा-स्थाने तीव्रमोहोदयमहत्तमे तन्निकटवर्तिनि चा-
त्यन्तताबोधबलाधिकृते प्रविष्टा समुद्रवीचिरिव मौक्तिकनिकरवा-
हिनी प्रावृट्काललक्ष्मीरिव समुन्नतपयोधरा मलयमेखलेव चन्दन-
गन्धधारिणी वसन्तश्रीरिव रुचिरपत्रतिलकाभरणा तत्परिणतिनाम
प्रतीहारी ।

तया चावनितलन्यस्तजानुहस्तमस्तकया विधाय प्रणामं विर-
चितकरपुटमुकुलया विज्ञापितं देवैव सुगृहीतनामधेयस्य देवस्य
कर्मपरिणामस्य सम्बन्धी तन्नियोगो नाम दूतो देवदर्शनमभिलषन्

प्रतीहारभूमौ तिष्ठति सदेवमवस्थिते देव प्रमाणमिति । ततो निरीक्षित तीव्रमोहोदयेन सम्भ्रममत्यन्ताबोधवदनम् । स प्राह । शीघ्र प्रवेशयतु त भवती । ततो यदाज्ञापयति देव इत्यभिधाय प्रवेशित प्रतिहार्या तन्नियोग । तेनापि सविनयमुपसृत्य प्रणतो महत्तमो यथाभिहितयाभिनन्दितश्चाभ्यां दापितमासनम् ।

उपविष्टोऽसौ कृतोचिता प्रतिपत्ति । ततो विमुच्यासन बध्वा करमुकुल कृत्वा ललाटतटे तीव्रमोहोदयेनोक्तम् । अपि कुशल देवपादानां महादेव्या देवपरिजनस्य च । तन्नियोगेनोक्तम् । सुकुशलम् । तीव्रमोहोदयेनोक्तम् । अनुपयोगमस्माक यदत्र भवत देवपेनानुज्ञाता वय देवपादैरित्यत कथय यदागमनप्रयोजन-मिति । तन्नियोगेनोक्तम् । कोऽन्यो भवन्त विहाय देवपादानाम-मुपहार्हं । आगमनप्रयोजन पुनरिदम् । अस्ति तावदिदिनैव भवतां विदितैव भावनीया प्रवृत्त्या सत्प्रयोजनेषु अनहनीयवाक्या अचिन्त्यमाहात्म्या च भगवती लोकस्थितिनाम देवपादानां मह-त्तमभगिनी ।

तस्याश्च तुष्टैर्देवपादै सकलकालमेषोऽधिकारो वितीर्ण । यथास्ति तावदेषोऽस्माक सर्वदा परिपन्थी कथञ्चिदुन्मूलयितुमशक्य सदागम परमगुरु । ततोऽयमपाहृत्यमभिभूय कश्चिदामनान्तरा लब्धप्रसरस्तथाप्यदीयभुक्तोऽनवारयति कापिलिकाय । अपवर्गं चास्माकमगम्यायां निर्वृतौ नगर्याम् । एवं च स्थिते विरलीभवि-ष्यत्येव कालेन लोक । तत प्रकटीकरिष्यन्त्यस्माकमयशस्तम दुष्ट-रमेतत् । अतो भगवति लोकस्थिते त्वयेद विधेयम् । अस्ति

ममाविचलितरूपमेतदेव प्रयोजनमपेक्ष्य मरक्षणीयमसंव्यवहार नाः
नगरम्। ततो यावन्त सदागमेन मोचिता सन्तो मदीयभुक्ते
निर्गत्य निर्वृतिनगर्यां गच्छन्ति लोकास्तावन्त एव भगवत्या तस्मा
दसंव्यवहारनगरादानीय मदीयविषयस्थानेषु प्रचारणीया। तत
प्रचुरलोकतया मत्स्थानानां सदागममोचितानां न कश्चिद्वात्तामपि
प्रश्नयिष्यति। यतो न भवत्यस्माक छायाक्षानिरिति। तत
महाप्रसाद इति कृत्वा प्रतिपन्न सोऽधिकारो लोकस्थित्या। अ
च यद्यपि देवपादोपजीवी तथापि विशेषतो लोकस्थिते प्रतिबद्ध
अतएव तद्द्वारेण तन्नियोग इति प्रसिद्धोऽह लोके। मोचिताश्च
कियन्तोऽपि साम्प्रत सदागमेन लोका। ततोऽह भगवत्या
लोकस्थित्या युष्मन्मूल तावता लोकानामानयनायेह प्रहित
इति। एतदाकर्ण्य भवन्त प्रमाणम्। ततो यदाज्ञापयति भग-
वतीति प्रतिपन्न तच्छासन महत्तमेन बलाधिकृतेन च। ततो
महत्तमेनोक्तम्। भद्र तन्नियोग तावदुत्तिष्ठ दर्शयामो भद्रस्यास-
व्यवहारनगरलोकप्रमाणम्। येन गत सन् निवेदयसि त्व देव-
पादेभ्य। कालान्तरेऽपि येन न भवति तेषां लोकविरलीभवनचिन्ता।
तन्नियोगेनोक्त यदाज्ञापयत्यार्य। तत समुत्थितास्त्रयोऽपि नगर
निरीक्षितुम्। दर्शिता समुत्थितकरेण पर्यटता तीव्रमोहोदयेना-
सङ्ख्येया गोलकनामान प्रासादास्तन्नियोगस्य। तन्मध्यवर्त्तिनश्चास-
ङ्ख्येया एव दर्शिता निगोदनामानोऽपवरका। तेच विद्वद्भि साधा-
रणशरीराणीत्यभिधीयन्ते। तदन्तर्भूताश्च दर्शिता अनन्ता लोका।
ततो विस्मितस्तन्नियोग उक्तो महत्तमेन भद्र दृष्ट नगरप्रमाणम्।

[illegible]

[illegible]

स्वयमपि परिचितेन मर्त्त्येन कल्पीनं मम । यतोऽहमस्मिन्नेव कस्मिंचिद्दृष्टं स्थानान्तरम्। यतो न जानासि तत्रत्यानपि विभू-सायानुकूलताम् । तथापि इदानीं भाग्यं यस्मात् प्रतिपत्तव्य-मन्यते। तत्र नादिमनत्रैश्च कदाचिदा दारुण मेत्र्यमपि विगत। तथा हि। पश्यतु भद्रो येन लोका एकैकस्मिन्नवसरे तत्तत् उर्तिविपरीतयाभावो गाढ समन्नागुपस्थायना समत्वमुत्पन्न। समक नियमभि। समकमाहारयन्ति। समक निवर्तयन्ति। एक-स्मिन्ध्रियमाणे सर्वे म्रियन्ते। एकस्मिन् जीवति सर्वेऽपि जीवन्ति। तत्कथमेते स्वाभाकारगुणसागररहिता यत्र विधर्मसमुद्भासमस्य मेव सत्रसिंध्यन्ते। तस्मादपर कश्चित्स्वामी स्थितमीक्षपरिज्ञानेप-पदिन्दती भजतेति। तत पयाकुम्भीमुनो यथाधिहत किमव गिवे-चमिति। इतश्चास्ति भवितव्यता नाम मम भार्या सा च स्वाटिका बहु सुभटो वर्तते । यतोऽह नाममात्रेणैव तस्या भर्त्तेति प्रसिद्धः। परमाथत पुन सेव भगवती मदीयगृहस्य शेषलोकस्थानां च सर्वस्मिन्नो समस्तामपि कर्मशतां सम्पयति । यत सा अचिन्त्य माहात्म्यतया स्वयमभिप्रायितमर्थं घटयन्ती नापेक्षतेऽन्यसम्बन्धिन पुरुषकारं सहायतया। न विचारयति पुरुषानुकूलप्रतिकूलभावम्। न गणयत्यवसरम्। न निरूपयत्यापद्गतम्। न निवार्यते सुरगुरु-णापि बुद्धिविभवेन । न प्रतिस्खल्यते विबुधपतिनापि पराक्रमेण। नोपलभ्यते योगिभिरपि तस्याः प्रतिविधानोपायोऽत्यन्तमसम्भाव-नीयमप्यर्थं सा भगवती स्वकरतलवर्त्तिनमिव लीलया सम्पादयति। स्थापयति च प्रत्येकं समस्तलोकानां यस्य यदा यत्र यथा यावच्च

प्रयोजनं कर्तव्यं तत्कथं यदा तत्र तथैव तावत्तदेव प्रयोजनं कृतवन्तो न त्रिभुवनेनापि निवारयितुं पार्यते । किं च यदि कुरुवकस्पर्शदोहदानामपि कथ्यते यथा मल्लिका भवतामुपरि भविष्यतीति । ततोऽपि तुष्यन्ति हृदये 'दाडिमानि कुसुमभारं विधारयन्ति विलोक्यते' इदमि कदकाय पारितोषिकं कुसुमदामानि बहु मानं धारयन्ति तदीयार्थं 'बाटपन्दामन्दन्दुभि विमानपन्दानन स्तवकदन्तीमन्दनो दयन कम्पेति । किं पुनः प्रियजनोक्ता इति । अथ तेषामपि कुरुवकस्पर्शदोहदानां कथ्यते यथा न मल्लिका भवतामुपरि भविष्यतीति । ततस्ते कथन्ते भयातिरेकेण । प्रतिपद्यन्ते दीनताम् । मुञ्चन्ति स्वेन कुसुमम् । निमीलयन्ति नीचवै इयन्ति कदकाय । समाचाद्यन्ते विषादा । श्रद्दधते दुःखवशेन । परित्यजन्ति शोकातिरेकेणेतिकर्तव्यताम् । आलोचयन्ति तत्प्रमादापनेतोपायान् । किं बहुना । न लभन्ते तथामनुष्ठायां मनागपि चित्तनिर्वृतिम् । कथमेषापि पुनः प्रसूनीभविष्यतीत्युद्वेगेन । किं पुनः सामान्यजना इति । या पुनर्भगवती यदात्मने रोचते तदेव विधत्ते । न परं विज्ञापयन्त्या विलपन्त्या प्रतिकूलमाचेष्टन्ते । स्वयमपि तद्वयोद्यानविभो यदैव सा किञ्चित्कुरुते यथेच्छया चेष्टया तदैव बहु मन्यमानमनसा पतिरपि कपकार इव जय देवि जय देवीति भवाय्यितासि ।

अपि च ।

सा मम कलोद्योगा सा ज्ञातभुवनोचिता ।

सा आगमि प्रसूनेषु सा मम निरूपिका ॥

सा केवलं जगत्यत्र विचरन्ती निराकुला।
न कुतश्चिद्विभेत्युच्चैर्मत्तावद्वधहस्तिनी॥
सा कर्म्मपरिणामेन महाराजेन पूजिता।
यतोऽनुवर्त्तयत्येव तामेषोऽपि प्रयोजने॥
तथान्येऽपि महात्मान कुर्वन्ति स्व प्रयोजनम्।
यान्तोऽनुकूलतां तस्या यत एतदुदाहृतम्॥
बुद्धिरुत्पद्यते तादृग् व्यवसायश्च तादृश।
सहायास्तादृशाश्चैव यादृशी भवितव्यता॥

तस्याश्च मदीयस्टहिण्या भवितव्यताया सम्बन्धिनमेन गुणवन्दोह जानात्येव सोऽत्यन्तावोधो बलाधिकृत। ततस्तस्य तदा पर्यालोचयतश्चेतसि परिस्फुरितम्। अये किमहमेव सत्यप्युपाये चिन्तयात्मानमाकुलयामि। यतो जानात्येव सा ससारिजीवपत्नी भवितव्यता येऽत्र प्रस्तापनोचिता लोकास्तेषां स्वरूपमिति। अतस्तामेवाहूय पृच्छामि। तत कथितस्तीव्रमोहोदयाय तेन स्वाभिप्राय सुन्दरमेतदिति बहुमत तस्यापि तस्या आकारणम्। तत प्रहित पुरुष समाहूता भवितव्यता। समागता वेगेन प्रवेशिता प्रतिहाराया। महाप्रभावेय सर्वापि स्त्री किल देवतेति विचिन्त्य कृत तस्या पादपतन वाचिक महत्तमबलाधिकृताभ्याम्। अभिनन्दितौ तौ तयाशीर्वादेन। दापितमासन उपविष्टा भवितव्यता। ततो बलाधिकृताभिमुख महत्तमेन चालिता भूलता। ततस्तेन कथयितुमारब्धस्तस्यैतद्वियोगप्रतिकार। ततो हसित तया। स प्राह। भद्रे किमेतत्। भवितव्यताह। न किञ्चित्। बलाधि-

कृतेनोक्तं तस्मिन्प्रस्तावे हसितम्। भवितव्यताह। अतएव यतो न किञ्चिदिदम्। कर्माधिकृतेनोक्तम्। कथं भवितव्यताह सदा-गमज्ञाबोधोऽपि पश्यमेनमपि व्यतिकरं मह्यं कथयसि। इतो-दोनारस्मैवविधेषु व्यतिकरेषु। अद्याम्दनन्तकालभाविनोऽपि सत्र-व्यतिकरान्तरम्। किं पुनः संप्रतिकाम्। यतो निष्प्रयोजनत्वाच्च किञ्चिदेतदहृदीयकथनं ममेति। सदागमाबोध आह। सत्यमिदम्। विज्ञप्तं मे तावक मारात्म मोऽयम्योऽयमेकोऽममापराधो भवत्या।

अन्यच्च प्रज्ञापय मनेव यत्र प्रज्ञापनीयिता लोका। किं मो व्यापारेण। भवितव्यतयोक्तम्। एकस्तावदेव एव मदीयो भर्त्ता प्रज्ञापनयोग्यः तथाऽन्ये च ये तन्त्रातीया। कर्माधिकृतेनोक्तम्। समेव जानीये तन्निकमयोकेन। ततो निगता भवितव्यता आगता मम समीपे वर्णितो व्यतिकरः। मयोक्तं यद्देवी जानीते। तत अनुज्ञातोऽहमन्ये च मत्प्रातीयास्तन्नियोगाभिमतसहायानुचारेण। इतौ च भवितव्यतया महत्तमबलाधिकृतौ। यदुत मया युवाभ्यां जानीमि एव यातव्यम्। यतो भर्तृदेवता जानीति न मोक्तव्यो मया संसारिजीवो यतदास्ति युवयोरपि प्रतिजागरणीयमेका-क्षनिवासं नाम नगरम्। तत्रासीभिर्लोके प्रथमं गन्तव्यम्। यतो ५
उक्ते युवाभ्यां महेवासीयो तथापिति मान्यथा। ततो यद्ध-वतो जानीत इत्यभिधाय प्रतिपन्नं तद्वचनं महत्तमबलाधिकृता-भ्याम्। प्रहता सर्वोऽपि समागतास्तदेकाक्षनिवासं नगरम्। तत्र च नगरे महान्तः पञ्च पाटका विद्यन्ते। ततोऽहमेकं पाटकं करोमि दृष्ट्वा तीव्रमोहोदयेनाभिहित। भद्र संसारिजीव

तिष्ठ समम पाटके । यतोऽयं पाटकोऽसंव्यवहारनगरेण सकलं तुल्यो वर्तते ।

ततो भविष्यत्यत्र तिष्ठतो धृतिरिति । तथाहि । यथा तत्रा-संव्यवहारनगरे गोलकाभिधानासु प्रासादासु मध्यवर्तिनो ये निगोदाभिधाना अपवरकास्तेषु ये लोकाः प्रत्येकमनन्ता अवो-चिता येषामुपस्थेन प्रतिवसन्ति तथापि पाटके बहुतमा लोका-स्तथैव प्रतिवसन्ति । केवलमसंव्यवहारनगरमध्यस्थितो न कश्चिदेव व्यवहारेऽन्तरमेति असंव्यावहारिका उच्यन्ते । ते हि यदि पर मूयमित भगवत्या लोकस्थितेरादेशेन सकृदेवान्यस्थानेषु गच्छन्ति नान्यथा । एते एतेन पुनरस्य पाटकस्य मध्यस्थितलोका मुञ्चन्ति लोकव्यवहारम् । समाचरन्ति नित्यस्थानेषु गमागमं तेन सांव्यवहा-रिका इत्यभिधीयन्ते । तथा तेषामसंव्यवहारनगरसन्निविष्टानामपि वनस्पतय इति सामान्यापि साधारणाभिधानम् । एतत्पाटकमध्यनिवासि-नां वनस्पतय इत्येतावत् स्थितम् । तथा प्रत्येकचारिणोऽपि साधा-रणशरीरतया वर्तिता मूलकर्मचारेणाप स्थिताः तेऽप्यत्र लोक-स्थितेः समम पूर्वापरिचितनगरमध्ये एताय पाटकमी ततो भवतोऽत्र चापलापयति देव । तत त्वापितोऽयमेकस्मि-न्नरे इत्यकोऽशु वनस्पतिरितिविधानेनैव त्वापिताकवेऽत्र स-र्वानुभवकारक । कैभिस्तुतनीता पाटकान्तरेऽति । ततं अब बाधनकमशरीरमाधि मध्ये अपवरके पुराणस्थितेव युत इव । इव ... इव ... ... ते अरिविडतेभ्यो बमसगुण । वमह ... बमहमात्र देवम् बमह निषादण (खिलोऽस्म

कालमिति । अन्यदा कर्मपरिणाममहाराजादेशो नैवानुमतो ममसमयज्ञाधिष्ठिताभ्यां निवारितस्ततोऽपवरकान्नायाद् भवितव्यतया धारितस्तत्रैव पाटके पुनरनन्तकालं प्रत्येकचारितयेति । एवञ्च पूर्वमेव कर्मपरिणाममहाराजेन परिस्पष्टं लोकस्थितिं समालोच्य मम कालपरिणत्या ज्ञापयित्वा नियतियदृच्छादीनामनुमते भवितव्यतया । अपेक्ष्य विविधाकारं लोकस्वभावमात्मीयसामर्थ्यप्रभवे परमाणुभिर्निष्पादिता सर्वार्थकारिणी एकभववेदनीया प्रधानगुटिका । समर्पिता भवितव्यतायाः । सा चाभिहिता तेन । यदा भद्रे समस्तलोकव्यापारकरणोद्यता त्वं श्रान्तासि समस्तलोकानां क्षणे क्षणे नानाविधसुखदुःखादिकार्याणि सम्पादयन्ती ततो ह्यायामुगुडिका । ततस्त्वया तस्यामेकैकस्य सत्त्वस्य जीर्णायां जीर्णायामेकैकस्यां गुटिकायामन्या दातव्या । तत सम्पादयन्तीं स्वयमेव विविधमप्येकत्र जन्मनायके भवतु प्रत्येकं यस्मिन् तवेष्टं कार्ये प्रयोजनमिति भविष्यति ते निराकुलता । तत प्रतिपन्नं भवितव्यतया तद्राजशासनम् । विधत्ते च सकलकालं समस्तसत्त्वानां तथैव सा त गुटिकाप्रयोगम् । ततोऽहं यदा तत्रासंव्यवहारनगरेऽभूवं तदा मम जीर्णायां जीर्णायामपरां सा गुटिकां दत्तवती । सकल एकमेव मे रूपमेकाकारं सर्वदा तत्प्रयोगेण विहितवती । तत पुनरेकाक्षनिवासनगरे समागता तीव्रमोहोदयात्यन्ताबोधयो दुहितरमिव दृष्टवन्तौ । तेन गुटिकाप्रयोगेण ममानेकाकारं रूपं प्रकटयति स्म ।

यत इतोऽहं तत्र पाटके समागत कस्मिंश्चिदपरे सन्ततं ।

तथापि कश्चित्पर्याप्तकरूप: कश्चिदपर्याप्तकरूप: । तथा कश्चित्
विहितोऽह बादराकार । तथापि कश्चित्पर्याप्तकरूप: कश्चिदपर्याप्त-
करूप । तथा बादर सन् कश्चिदपवरकवर्त्ती कश्चित्प्रत्येकचारी
अथापि कश्चिदङ्कुराकारधारक । कश्चित्कन्दरूप । कश्चिन्मूलभागी ।
कश्चित्त्वक्धारी । कश्चित्स्कन्धवर्त्ती । कश्चिच्छाखाचर ।
सागत । कश्चित्प्रवालमचरिष्णु । कश्चित्पत्राकार । कश्चित्पुष्पस्व
कश्चित्फलात्मक । कश्चिद्बीजस्वभाव । तथा कश्चिन्मूलबीज । कश्चि-
दग्रबीज । कश्चित्पर्वबीज । कश्चित्स्कन्धबीज । कश्चिद्बीजरुह ।
कश्चित्सम्मूर्च्छनज । तथा कश्चिद्वृक्षाकार । कश्चिद्गुल्मरूप । कश्चि-
ल्लतात्मक । कश्चिद्वल्लीस्वभाव । कश्चिद्धरितात्मक इति । तथाकर्पेण
च वर्त्तमान मामुपलभ्यान्त्यग्रामनगरसम्बन्धिनो लोका
भवितव्यतायाः समक्षमेव छिन्दन्ति भिन्दन्ति दलन्ति पिषन्ति
मोटयन्ति लुञ्चयन्ति तक्षन्ति दहन्ति नानाकदर्थनाभि कदर्थ-
यन्ति तथापि भवितव्यता तत्रोपेक्षा कुरुते ।

ततोऽतिवाहिते तथाविधदु खैरनन्तकाले जीर्णाया
कालदत्ताया गुडिकायां दत्ता भवितव्यतया समान्या गुडिका
तत्प्रभावात्ततोऽह द्वितीयपाटके तत्र पार्थिवसंज्ञया लोका प्रतिव
सन्ति । ततोऽहमपि तेषां मध्ये सपन्न पार्थिव । विडम्बितश्च
भवितव्यतयापरापरगुडिकादानद्वारेण सू
क्ष्मरूपतया कृष्णनीलश्वेतपीतलोहितवर्णादिरूपतया ।
लवणहरितालमन शिलाञ्जनगन्धपृथिव्याद्याकारतया चासङ्ख्येय
तितिचितानि च तत्र पाटके वसता मया भेदनदलनचूर्णन

अन्तर्दशादीनि दृश्यानि। तत्र प्रथमगुटिकासरणावसाने द्वया र्धचन्द्राकारा द्वितीया गुटिका। ततोऽत्र तस्याश्चाधस्तृतीये पाटके। तत्र वाय्वभिधाना दुन्दुभिः प्रतिवसन्ति। ततो समादि तत्र नगरं चतुरस्राकारम्। त्रिकोणिताकाशाद जौर्णायां जौर्ण-पाशपरायां गुटिका द्वयाकाराकार मध्यप्रदेशा भविष्यतया चतुर्दिक्षु भ्रमणम्।

तथापि। यतोऽत्रमन्त्रायुष्मद्विकारकरग्रन्थोदकाद्यनेक-भेदभिन्नो वस्तुतन्त्रभेदेन विविधाकारतया। गौडानि च तत्र पाटके वर्तमानेन सदा नीतोऽप्याकारवत्तयानेकसंख्यया-न्यानि नानाद्व्याणि। ततस्तत्राकृष्टमये जौर्णायामन्यगुटिकायां द्वया समापरा गुटिका भविष्यन्तया। ततोऽत्र तत्रैव चतुर्थे पाटके तथाप्यन्तःप्राकारेणासनपरमात्मा ब्राह्मणा प्रतिवसन्ति। ततोऽत्रापि तेषां मध्ये भास्करो वर्णेन उष्णः स्पर्शेन द्वाराणक कायेन गुलिकया ध्यानेन सप्तशृङ्गस्वामी ब्राह्मण। महत्तर मम तत्र यतो व्याघ्रशरीरसुरासिरमानवुद्भिविद्युद्वर्णाग्निप्रभ-मयो वसन्ति। आगतानि विद्यापयादितो नानाद्व्याणि। क्षिप्र शून्यावरणपर्यन्तप्रभापर्यन्तप्रकटपततया विरतमानोऽसंख्येय कालम्। द्वया च तदन्ते समापरा गुटिका पञ्चमगुटिका सरणावसाने भवि-ष्यन्तया। ततोऽत्र तदुपयागेन पञ्चमपाटके। तथाप्यसंख्येया वायु-कायाभिधाना पक्षिणः प्रतिवसन्ति। ततोऽत्रापि तत्र गत पुष्पात स्पर्शेन चक्रवत्समवृत्ता ध्वजेव पताकाकारं ध्यानेन वक्राले वायवीय पक्षिणः। आहतय तत्र वसमानोऽप्युत्कलि

कायातो मण्डलिकायातो गुञ्जायातो झञ्झावात महावातो घनवातस्तनुवात शुद्धवात इत्यादिभिरभिधानैः। समुद्भूतानि तत्र मे शस्त्राभिघातनिरोधादीनि नानादुःखानि। विनाटितस्तत्रापि सूक्ष्मबादरपर्याप्तकापर्याप्तकाकाररूपतया घूर्णमानोऽसंख्येयं कालं भवितव्यतया।

इतश्चैवं वर्तमाने जाते पर्यन्तगुटिकाजरणे दत्तापरा गुटिका पुनर्नीतोऽहं प्रथमपाटके भवितव्यतया। स्थितस्तत्र पुनरनन्तं कालम्। ततः पुनरपरापरगुटिकाप्रयोगेणैव प्रापितो द्वितीयादिषु पाटकेषु। स्थितश्चैकैकस्मिन्नसंख्येयं कालम्। तदेवानेन प्रकारेण निखिलेष्वेकाक्षनिवासे नगरे कारितोऽहमनन्तवारा समस्तपाटकेष्वटनिकाम् तीव्रमोहोदयात्यन्ताबोधयोः समक्षं भवितव्यतया। अन्यदा मनाक् समुपजातयाऽभिहितं यथार्यपुत्र स्थितो भूयांसं कालं त्वमत्र नगरे ततोऽपनयामि भद्र स्थानान्तरम्। मयाभिहितं यदार्या आज्ञापयति देवी। ततः प्रदत्ता गुटिका भवितव्यतया। इतश्चास्ति विकलाक्षनिवासं नाम नगरम्। तत्र च त्रयस्तावत्पाटका विद्यन्ते। तस्य नगरस्य परिपालनकर्ता परिणामसमाचारनिपुणः प्रकोपनामा महत्तमः। तत्र च माया नाम महिषी। ततोऽहं गुटिकासामर्थ्येन प्रापितः प्रथमे पाटके। तस्मिंश्च शङ्खकपर्दिकाजलौकादिभिरभिधानैः कृम्यादिरूपतया परिवर्तितः। ततोऽहमपि तत्रैव संख्येयं कालम्। तत्र च सर्वतः प्रवृत्तमकस्मादसद्वेद्यतीव्रवेदनया विविधदुःखैः पीडितः।

ततश्च।

कृतोऽहं गुडिकादानद्वारेणैव ततस्तया।
कृमिरूपोऽथ विण्माने महापापः स्वमायया॥
मूत्रान्त्रमेदश्लेष्मपूरिते जठरे स्थितम्।
मां पश्यन्ती विशालाक्षी तत्र सा परितुष्यति॥
कदाचिच्चारमेयादिदुर्गन्धिव्रणकोटरे।
मामन्यकृमिजालेन सयुतं वीक्ष्य मोदते॥
दर्वीपथधराद्येषु लोलमानं सुदुःखितम्।
मां दृष्ट्वा कृमिभावेन तुष्टाभङ्गवितव्यता॥
उलूकाभावमापाद्य गुडिकादानतस्तया।
ममेत्य चाकरोद्दुःखं दधन्ती सह मायया॥
माये पश्य मदीयस्य भर्त्तुः सामर्थ्यमीदृशम्।
स्वमुक्तिमार्गोपदेशेन भर्त्तात्मा येन गर्विता॥
क्षुधार्त्तो चारके क्षिप्तस्ततो निगद्य मत्पतिं
निःशेषं कथयत्येष मयारि चौर्ययोगतः॥
अन्यच्च त्यागसामर्थ्यं पश्य भर्त्तुर्ममेदृशम्।
यदेष रक्तवस्त्रं ददते हस्तधारिणे॥
ततोऽगृहीतसङ्केते भद्रे भार्याविडम्बितः।
उपहासेन तेनाहं द्विगुणं दुःखमागतः॥
पुनश्च गुडिकां दत्त्वा कृत्वा मत्स्यं महोदधौ।
मामेषा ग्राहिकैश्छिन्नं रटन्तं वीक्ष्य तुष्यति॥
तदेव पाठके तत्र वर्त्तमानं स्वमायया।

अपरापररूपेण सख्यातीत विडम्बित ॥

अन्यदा पुनर्यथेष्टचेष्टयैव प्रयुक्ता भवितव्यतया ममान्यगुडिका। नीतोऽह सत्सामर्थ्येन द्वितीये पाटके। तत्र चाष्टकुलकोटिलक्षा-यिनोऽसख्येयाख्लिकरणनामानो गृहपतयोऽधिवसन्ति। ततोऽहमपि तेषां मध्ये सपञ्चख्लिकरणो गृहपति।

ततश्च।

यूकामत्कुणमत्कोटकृमुरूपविवर्त्तिनम्।
पिपीलिकादिरूप च कृत्वा मा भवितव्यता ॥
पर्यटन्त बुभुचार्त्त पिश्यमाण च बालकै।
दग्ध दृष्ट्वा तथा तोषादानन्दमवगाहते ॥
तदेव पाटके तत्र गुडिकादानपूर्वकम्।
असख्यवारा पापोऽह कारितो नैकरूपताम् ॥
अथान्यदा पुनर्दत्ता गुडिका मे ऽवहेलया।
तृतीये पाटके नीतस्तयैवोचितहेलया ॥
कोटिलक्षकुलाना च वसन्ति नव तत्र ये।
असख्यास्तेषु विद्यन्ते चतुरक्षा कुटुम्बिन ॥
ततोऽहमपि सञ्जातश्चतुरक्ष कुटुम्बिक।
पतङ्गमक्षिकादशमशकाकारधारक ॥
सोढानि तत्र दुःखानि नानाकाराणि तिष्ठता।
निर्विवेकजनादिभ्यो मर्दनादिविधानत ॥
जीर्णे जीर्णे पुनर्दत्त्वा गुडिकामपरापराम्।
असख्यरूपेस्तत्रापि पाटके नाटितस्तया ॥

भूयो भ्रमय तेष्वेव पाटकेषु विरूपकम् ।
कालानीतानि सर्वाणि भवस्थाने विधापित ॥

एवं च स्थिते ।

अविस्पष्टरूपेण तथापर्याप्तरूपक ।
तेषु विष्वपि पश्चाद् पाटकेषु विनाटित ॥
अथान्यदा प्रकृष्टेन चेतसा भवितव्यता ।
तुष्टा तदुचिते काले तत चैतदभाषत ॥
आर्यपुत्र भवन्तं किं नयामि नगरान्तरम् ।
विकलाक्षनिवासेऽत्र नगरे नास्ति ते धृतिः ॥
मयोक्तं देवि यत्तुभ्यं रोचते तद्विधीयताम् ।
किमत्र बहुना त्वं मे प्रमाणं सर्वकर्मसु ॥
ततो जीर्णां मम ज्ञात्वा गुडिकामन्तवर्त्तिनीम् ।
नगरान्तरयानाय प्रयुक्ता गुडिका तया ॥
अथोर्ध्वमार्गोपदेशस्थ प्रतिजागरणे स्थितम् ।
पञ्चाक्षपशुसंस्थानं नामास्ति नगरं परम् ॥
तत्र प्राङ्गुलिपर्याप्तकोटीलक्षप्रमाणके ।
वसन्ति कुलसंघाते लोकाः पञ्चाक्षनामकाः ॥
जलस्थलनभश्चराः स्पष्टचैतन्यसंयुताः ।
गर्भजास्तेऽभिधीयन्ते गर्भजा इति वा बुधैः ॥
ये पुनस्तत्र विद्यन्ते स्पष्टचैतन्यवर्जिताः ।
सम्मूर्छिम इति ख्यातास्ते सम्मूर्छनजा जनाः ॥
ततोऽहं तेषु सञ्जातः स्पष्टचैतन्यवर्जितः ।

पञ्चाक्षो नाम विख्यातो गुटिकाया प्रभावत ॥
रटन्नुच्चैर्विना काय दर्दुराकारधारक ।
केलिप्रियतया तत्र भार्ययाह विनाटित ॥

तत्र च सम्मूर्च्छनजमध्ये ।

रूपैरेवमसंख्येयैर्भ्रमयित्वा ततस्तया ।
विहितो गर्भजाकारधारकोऽह महेलया ॥

ततश्च जलचरेषु वर्त्तमान ।

गृहीतो धीवरैस्तत्र बिभ्राणो मत्स्यरूपताम् ।
छेदपाकादिभिर्दु ख प्रापितोऽह सहस्रश ॥

तथा चतुष्पदस्थलचरेषु वर्त्तमानस्य ।

शशसूकरसारङ्गरूपमाबिभ्रतो मम ।
व्याधैर्भिल्लै शरैर्गात्रे कृता नाना विकर्त्तना ॥

तथा भुजपरिसर्पोरपरिसर्पेषु वर्त्तमानेन ।

गोधाहिनकुलादीना रूप धारयता चिरम् ।
अन्योन्यभक्षणाद्दु ख प्राप्त क्रूरतया मया ॥

तथा ।

काकोलूकादिरूपाणा पक्षिणा मध्यचारिणाम् ।
सङ्ख्यातीतानि दु खानि सोढानि सुचिर मया ॥
असंख्यजनसङ्कीर्णे तदेव तत्र पत्तने ।
जलस्थलनभश्चारी सजातोऽह कुले कुले ॥

अन्यच्च तस्मिन् पञ्चाक्षपशुसंस्थाने नगरे ।

सप्ताष्टवाराद्रूपाणि नैरन्तर्येण कारित ।
नीतस्ततोऽन्यस्थानेषु तत्रानीत पुनस्तया ॥

एव च क्रिते ।

देवेषु सर्वस्थानेषु यथा यथाकारान्तरा ।
यथा तव पुरेऽभवत् तथा रूपविडम्बना ॥

कामनग ।

क्षितच मेरुमध्ये च परं पञ्चोपमवदम् ।
कथ तव पुरे किं विद्याधिक पुरकोटिभि ॥
कथञ्चिच्छिल्पेन पर्याप्तमभेदन ।
तदेव नगरे तव नानाकारैर्विडम्बित ॥

अम्बरा सुरद्रुम उपादितोऽत्र भवितव्यतया । ततो यूथमध्ये सरजितसारं भयेन निरीक्षमाणो दृश्यापि दिश अनुसरमाणरत्नप्रिभराणीतदेहत्य पर्यटामि । यावदेकेन लुब्धककुमारकेण कुञ्जर्भनिका प्रारब्ध गीतम् । तत्क्षणेनाक्षिप्त मृगयूथम् । परिणिशनुसरण । निरुद्धा चेष्टा । निर्यालीतनानि लोचनानि । निष्पन्द देवेन्द्रियव्यापार । अज्ञात कर्णेन्द्रियमात्रनिमग्नोऽन्तरात्मा । ततो निष्पन्दमन्दीभूत तत्क्षण वरिणयूथमवलोक्याभ्यर्णीभूतो व्याध । सङ्घीहत कोदण्डम् । अभिनवश्च शिलीमुख । सहुमालोक्य व्यापकम् । ईषदाकुञ्चिता कन्धरा । समाहतो वाण कर्णान्त यावत् । ततो मुक्तेन तेनाराद्रागे वर्तमानोऽहं निर्भिद्य पातितो भूतले । अत्रान्तरे जीर्णा मे पूर्वदत्ता गुटिका । ततो जीर्णायां तस्यां करिणभवनिबन्धनभूतायामेकभववेद्यायां गुटिकायां दत्ता समास्वादा गुटिका भवितव्यतया । अपमस्तम्भाद्वारश्येमाच करिवरूप । वर्द्धित कालक्रमेण सञ्जातो यूथाधिपति । तत्र

स्वभावसुन्दरेषु मन्दिरेषु धर्मोत्तमेषु सर्वत्रैकलक्षणेषु [illegible]
कमनीयेषु सर्वविभागेषु परिकल्पित करेणुशृङ्गेण विमान-
मन्दोदयारम्भगर्भसमाश्रो यथेच्छया विचरामि ।

अन्यदैकदाकालेन एव मयका सञ्चरिणा तम् । सर्वाणि सन्त-
दानि । स्फुरति मे गुल्मोदरम् । प्रसर्पितं धूमजालम् । ततः कि-
मेतदिति निरीक्षितो मया पर्यन्तभाग । यावदिकस्मिभूता ज्व-
लामालाकुलो दवानलस्तत प्रादुर्भूतं मे मरणभयम् । परित्य-
क्तं पौरुषम् । सञ्जातं दैन्यम् । समाश्रिता चात्मम्भरिता । व्य-
गतोऽहङ्कार । परित्यक्तं यूथम् । पलायितो मन्दो नैकां दिशम् ।
गत स्तोकं भूभागम् । तत्र चासौ चिरन्तनतामयप्रत्यग्रन्थो विशाल-
तृणोऽन्ध कूप । स च तटविनिर्गततृणच्छादिततया भयाकुलतया च
न लक्षितो मया धावता वेगेन । ततः प्रविष्टौ मम तत्रापरौ ।
तद्विराजमानतया पयसा पश्चाद्भाग । ततः पतितोऽहमुत्तानशरीर-
स्तत्रान्धकूपे । सञ्चूर्णितो गात्रभारेण मूर्च्छितः क्षणमात्रं स्थित्वा कथ-
ञ्चिच्चेतना यावच्च चालयितुं शक्नोमि शरीरं प्रादुर्भूता च महा-
पीडा तीव्रवेदना ततः सञ्जातो मे पश्चात्ताप । चिन्तितं च मया ।
यथेदृशमेव बुध्यते मादृशानाम् । ये प्रतिपन्नभ्रष्टभावं चिरकाल-
परिचितमुपकारकमपि समग्रमनुरक्तमात्मवर्गं परित्यज्य कृतघ्नतया
कुक्षिम्भरितामुररीकुर्वन्त पलायन्ते । अहो मे निर्लज्जताद्यापि
किल यूथाधिपतिशब्दो रूढः । तत्किमनेनाधुना स्वचेष्टितानुरूप-
मेवेदं मम सम्पन्नमतो न मया मनसि खेदो विधेयः । ततो-
ऽनया भावनया प्रतिपन्नं मया मनाक् माध्यस्थ्यम् । तितिक्षिता

भवतो तीव्रापि वेदना । छिन्नश्चादस्य पसरात्र यावत् । अत्रान्तरे तुष्टा ममोपरि भवितव्यता । ततस्तयाभिहितम् । आर्यपुत्र साधु शोभनोऽध्यवसायः । तितिक्षितं भवता परमं दुःखम् । तुष्टाहमिदानीं भवतो ऽनेन चेष्टितेन नयामि भवन्तं नगरान्तरे । मयाभिहितम् । यदाज्ञापयति देवी । ततो दर्शितस्तया प्रच्छन्नाकारः पुरुषः । अभिहितश्चायं यथार्यपुत्र तुष्टया मयायमधुना भवतः सहायो निरूपितः पुण्योदयो नाम पुरुषः एतेन सह भवता गन्तव्यम् । मयाभिहितं यदाज्ञापयति देवी ।

अत्रान्तरे जीर्णा मे प्रदत्ता गुटिका । तत प्रयुक्तान्या गुटिका भवितव्यतया । अभिहितं च तया । यथार्यपुत्र तव गतस्य पुण्योदयस्ते प्रच्छन्नरूपः सहोदरः सहचरश्च भविष्यतीति । एवं च वदति संसारिजीवे भव्यपुरुषः प्रज्ञाविशालायाः कर्णाभ्यर्णे स्थित्वेदमाह ।

यथाम्ब कोऽयं पुरुषः किं वानेन कथयितुमारब्धम् । कानि चामूनि असंव्यवहारादीनि नगराणि का चेयं गुटिका । यैकैकवारं प्रयुक्ता सती नानाविधरूपाणि कारयति । विविधसुखदुःखादिकार्याणि दर्शयति । कथं वा पुरुषस्येयन्तं कालमेकत्रावस्थितिः । कथं चाप्यभावनीयानि मनुष्यस्य सतः कृमिपिपीलिकारूपाणि जायेरन् । तदिदं सकलमपूर्वालजालकल्पमस्य तस्करस्य चरितं मम प्रतिभासते तत्कथयाम्ब कोऽस्य भावार्थ इति । प्रज्ञाविशालयोक्तम् । वत्स यदस्येदानीतनं विशेषरूपमुपलभ्यते तथानेन कथितम् । किं तर्हि सामान्यरूपेण संसारिजीवनामाय

पुरुषोऽनन्तदेवानेनात्माभिधानमाख्यातमनेन चात्मचरितम्। सर्वमिदं घटमानकमेव निवेदयितुं प्रक्रान्तम्।

तथाहि।

असांव्यवहारिकजीवराशिरसांव्यवहारनगरम्। एकेन्द्रियजातय पञ्चापि पृथिव्यप्तेजोवायुवनस्पतिरूपास्तेषां स्थानं एकाक्षनिवासम्। विकलेन्द्रियाणां द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियलक्षणानां स्थानं विकलाक्षनिवासम्। पञ्चेन्द्रियतिरश्चां निलय पञ्चाक्षपशुसंस्थानम्। एकजन्मप्रायोग्यं कर्म प्रकृतिजालमेकभववेद्या गुटिकेत्युच्यते। तदुदयेन भवन्त्येव नानाविधरूपाणि। सम्पद्यन्ते एव विविधसुखदुःखानि कार्याणि। अजरामरत्वाय पथ्य। ततो युक्तमेवाख्यानमनन्तमपि कालमवस्थानं संसारिजीवस्य तत्र भद्र भवतो कृमिपिपीलिकादिरूपाणि। किमत्राश्चर्यमथवा मुग्धबुद्धिरद्यापि वत्सो न जानीते यदस्य स्वरूपम्। वत्स न सम्भवत्येव भुवनोदरे तत्त्वविधानकम्। यदस्य संसारिजीवस्य सम्बन्धिना चरितेनावतरति। तदस्य निवेदयतु तावदेष सर्व यथावृत्तम्। यथाश्रवणमस्य भावार्थं निराकुला कथयिष्यामि। भव्यपुरुषेणोक्तम्। यदाज्ञापयत्यम्बेति।

अल्पविज्ञावदल्पो भवति नियमतो वर्णमानुष्यभूमौ
भव्यश्च प्रायभाज समयपरिणते कथ्यस्य प्रभावात्।
एतच्चाख्यातमत्र प्रथममनुगतश्चात्र बोधायमित्य
प्रक्रान्तोऽयं समस्तं कथयितुमतुलो जीवसंसारचारं॥

स च सदागमवाक्यमपेक्ष्य भो
जडजनाय च तेन निवेद्यते।

बुधजनेन विचारपरायण
तदनु भव्यजन प्रतिबुध्यते ॥
तावेऽच निवेदित तदतुल ससारविस्फूर्जितं
न्यानामिदमाकलय्य विरतिं संसारतो जायते ।
र्यां सेव भवो विमूढमनसां भो सुन्दरो भासते
ति नून पशवो न सन्ति मनुजा कार्येण मन्यामहे ॥

इत्युपमितभवप्रपञ्चायां कथायां ससारिजीव-
चरिते तिर्यग्गतिवर्णनो नाम
द्वितीय प्रस्ताव ॥ २ ॥

तृतीय प्रस्तावः।

भावयच्चमियचु यत्तमानस्य निश्चि ।
एष प्रोक्तो मनुष्यत्वे यथातत्पुनरोच्यते ॥

मपारिगोव उवाच ।

ततोऽहं भट्ठ्यच्योतमहिते समासादितैकसागरोपमस्थितिक प्रतत् गतम्। इहैवास्यामेव मनुजगतौ नगर्यां भरताभिधाने पाटल स च विशेषकभूतमस्ति जयपुरं नाम नगरम्। तत्र च सकलनृपतिगुणसम्पदालिङ्गितमूर्त्तिः पद्मो नाम राजा। तस्य च रतिरिव मकरकेतनस्य नन्दा नाम प्रधानदेवी। ततोऽहं तस्याः कुक्षौ प्रवेशितो भवितव्यतया प्रियतमप्रोषितकामम्। निगत अ पुण्योदयेन दृष्टो नन्दया अपगतमात्या पुत्रो मम जात इत्यभिमानो निवेदित प्रमोदकुम्भाभिधानेन दासदारकेण नरपतये। प्रादुर्भूत सुतो मे इति समुत्पन्नमहाप्रमोद । हर्षविशेषादुच्छ्वसितो गात्रेषु पुलकोद्भेद । दापित निवेदककाय पारितोषिकम्। समादिष्टो जन्ममहोत्सव । ततो दीयन्ते महादानानि। मुच्यन्ते बन्धनानि। पूज्यन्ते नगरदेवता। क्रियन्ते हट्टद्वारशोभा। शोध्यन्ते राजमार्गा। आहन्यन्ते आनन्दभेर्य। आगच्छन्ति विशेषोज्ज्वलनेपथ्या राजकुले नागरकलोका। विधीयन्ते तदुपचारा। प्रयुज्यन्ते समाचारा। आस्फाल्यन्ते तूर्यसंघाता।

गीयन्ते धवलमङ्गलानि । नृत्यन्ति ललनालोका सह कञ्चुकिवा-
मनकुब्जादिभिर्नरेन्द्रवृन्दैरिति । ततश्चैव वृत्ते जन्ममहानन्दे अति-
क्रान्ते मासे तिरोधाय ममारिजीव इत्यभिधानं प्रतिष्ठितं मे
नन्दिवर्द्धन इति नाम । जातो ममाप्यहमनयोः पुत्र इत्यभिमानः ।
ततो जनयन्नानन्दं जननीजनकयोः पञ्चभिर्धात्रीभिर्लालितः सम्प्रा-
प्तोऽहं त्रिवार्षिकः ।

मम चासंव्यवहारनगरादारभ्य सकलं कालं द्विविधः परिकरो-
ऽनुवर्तते । तद्यथा । अन्तरङ्गो बहिरङ्गश्च । तत्रान्तरङ्गपरिकर-
मध्येऽस्ति ममाविवेकिता नाम ब्राह्मणजातीया धात्री सापि प्रसूता
मज्जन्मदिने जातो दारकः प्रतिष्ठितं तस्य नाम वैश्वानर इति ।
स चादित एवारभ्यानभिव्यक्तरूपतयासीदेव । केवलमधुनाभिव्यक्त-
रूपः सम्पन्नः । ततो मयासौ सह धारयन् वैरकलहाभिधानौ
विषमविस्तीर्णौ चरणौ दधानः परिस्थूलकठिनहृस्वोर्ध्वास्थियाऽभिधाने
जङ्घे समुद्वहन्ननुशयानुपशमनामानौ विषमप्रतिष्ठितावूरू बिभ्राणः
पैशुन्यमत्सरकर्कशैकपार्श्वोन्नतं कटितटं दधानः परमर्मोद्घट्टननामकं
वक्रं विषमं सम्यमुदरं कलितोऽन्तस्तापनामकमतिमहद्धोरशल्येन
युक्तः धारमत्सरमग्राभ्यां विषमपरिहृस्वाभ्यां बाहुभ्यां विराजमानः
क्रूरताख्यया वक्रया सुदीर्घया च शिरोधरया विडम्ब्यमानो-
ऽसभ्यभाषणादिरूपैरसितदन्तच्छदैर्विरलविरलैर्महद्भिर्दशनैर्विनोपमा-
ऽमर्षपरुषालापनामकाभ्यां शुषिरमात्ररूपाभ्यां कर्णाभ्यामुपशो-
भमानः शमसभावबहया ध्यानमात्रेण ज्वलमानयातिचिपटया
नासिकया बिभ्राणस्तराम् । रौद्रत्वमनुष्यत्वसमाभ्यामतिरक्तया

प्रधानं कलाचार्यं । पूजितोऽसौ विधिना । दत्तमुचितदानेयम्। समर्पितोऽहं तस्य पित्रा महतादरेणेति। समर्पिताश्च मत्सभ्रातरोऽन्येऽपि बहवो राजदारका प्रागेव तस्य कलाचार्यस्य। ततस्तैः सार्द्धमहं प्रवृत्तः कलाग्रहणं कर्तुम्। ततः सम्पूर्णतया सर्वोपकरणानां गुरुतया तातोत्साहस्य हिततया कलाचार्यस्य शिशिष्टतया कुमारभावस्य सन्निहिततया पुण्योदयस्योत्कटतया क्षयोपशमस्यानुकूलतया तदा भवितव्यताया अनन्यजन्यतया मया गृहीतप्रायः स्वल्पकालेनैव सकलोऽपि कलाकलापः ।

केवलमतिवल्लभतया सदा सन्निहितोऽसौ वैश्वानरः सनिमित्तमनिमित्तं वा करोति मम समालिङ्गनम् । ततस्तेन समालिङ्गितोऽहं न स्मरामि गुरूपदेशम् । न गणयामि कुलकलङ्कम् । न बिभेमि तातमनःखेदस्य । न लक्षयामि परमार्थम् । न जानाम्यात्मनोऽन्तस्तापम् । न वेद्मि कलाभ्यासनिरर्थकत्वम् । किन्तु तमेव वैश्वानरमेकं प्रियं कृत्वा तदुपदेशेन गलत्स्वेदबिन्दुरक्तलोलोचनो भुग्नभ्रूकुटिः करोमि समस्तदारकैः सह कलहं विदधामि सर्वेषां मर्मोद्घाटनम् । उच्चारयाम्यसत्यवचनानि । न सहे तेषां मध्यस्थमपि वचनम् । ताडयामि प्रत्येकं यथा सन्निहितेन फलकादिना। ततस्ते सर्वेऽपि वैश्वानरालिङ्गितं मामवलोक्य भयेन त्रस्तमानसाः सन्तो वदन्त्यनुकूलं कुर्वन्ति चाटूनि आराधयन्ति मां पादपतनैः । किं बहुना । मदीयगन्धेनापि ते वीर्यवन्तोऽपि राजदारका नागदमनीहतप्रतापा इव विषधरा न स्वतन्त्रं चेष्टन्ते ।

ततस्ते समुदिता' कथ्यमाना बन्धनागारगता इव महादुःखेन जननीजनकानुरोधेन कलापदश कुरुत' कालं नयन्ति । न कथ-यन्ति त खलिकर कलाभ्यासाय मा भ्रातुर्वा प्रलय इति भाव-यता । तथापि नित्यमविहितलाक्षयन्नेव तन्मात्रक चेष्टित सकल कलाभ्यास । केवल दारकेषु दृष्टविपाकतया भयेन सहाध्यायो-ऽप्यायपि न मम समुचमपि निष्णाये निरीक्षिते । यदि पुन-रन्यव्यपदेशेनापि मां प्रत्येव किञ्चिद् ब्रूयात्ततोऽहमेनमपि कला-भ्यासमाक्रोशामि ताडयामि च । ततोऽद्यापि मम राजदारकव-दन्ते । ततो महामोहदोषेण मया चिन्तितम् । अहो मे वर-मित्रस्य माहात्म्यातिशय । अहो हितकारिता । अहो कौशलम् । अहो वत्सलता । अहो स्थिरानुराग । यदेवमाभिरूपदारेण मम यत्नोपैता कृपाद्य मामेव सर्वेषामतिशयान्न जनयति ।

न च मां क्षणमपि मुञ्चतीति । तदेव मे परमो बन्धुरेव परम शरीरमेव मे सर्वस्वमेव मे जीवितमेव एव मे पर तत्त्वमिति । अनेन रक्षित पुरुषोऽकिञ्चित्करतया हृणपुरुषाश्च विक्षिप्यन्ते । तन्मयैवमविधभावतया सञ्जातो मम वैशम्पायनस्योपरि स्थिरतरानुराग । अन्यदा एकधि मद्भुते तेन सह विसम्भकथे यथाभिमित वर्णमिव किमनेन बहुना कल्पितेन युष्मदायत्ता मम प्राणास्तदेते भवता यथेष्ट नियोजनीया इति ।

तदाक्षिप्त वैशम्पायनेन कथं मञ्जुलो मे परिश्रमो यदेव मम समवर्णो वर्तते । दर्शितोऽनेनैव वदता निभृतोऽनुराग । अनुर-काय प्राणिन धमाकर्णयन्ति मदनम् । दुर्लभाणि निविडकम् ।

प्रवर्त्तन्ते तत्र भावेन । सम्पादयन्ति क्रियया । तदिदमत्र प्राप्तका
लमिति विचिन्त्य तेनाभिहित कुमार।

एवमेतत्क खल्वत्र सन्देह । यत्र गृहीतहृदयसद्भावानामपि
मादृशां पुरत कुमारोऽप्येवं मन्त्रयति । महाप्रसादोऽयं कारणम्।
स हि हर्षोत्कर्षाज्जातायमपि वाक्यं बलाद्वादयति । तत्किमहम
करोमि कुमारस्याहमद्यैव प्राणान्। एष एवमेतन्नियोगो मया
भिहितम् । कथं तेनोक्त जानाम्यहं किञ्चिद्रसायनम् । मयाभि
हित करोतु वरवयस्य । तेनोक्त यदाज्ञापयति कुमार । तत
श्शतानि तेन क्रूरचित्ताभिधानानि वटकानि समुपनीतानि मे
रहसि वर्त्तमानस्य । अभिहितश्चाहं कुमार एतानि मदीयमा
ध्यप्रभवानि वर्त्तन्ते वटकानि । कुवन्त्युपयुज्यमानानि वीर्योत्कर्ष
सम्पादनेन पुरुषस्य सव यथेष्ट दीर्घतर मायुष्कम् । तस्माद् गृहाण
त्वमेतानि ।

अत्रान्तरे लघुध्वनिना कथान्तरस्थितेन केनाप्यभिहितम् ।
भविष्यति मत्ताभिमते स्थाने कोऽत्र सन्देह । न श्रुत तन्मया ।
श्रुत वैश्वानरेण । तत सम्पद्यते मम समीहितम् । यास्यत्येव
वटकोपयोगेन महानरके । भविष्यति तत्र गतस्यास्य दीर्घमायु
ष्कम् । कथमन्यथैवविध शब्दो महानरक एव ममाभिहित
स्थानमिति भावनया तुष्टोऽसौ चित्तेन । मयाभिहित किं न
सम्पद्यते मे भवादृशि वरमित्रेऽनुकूले । तदाकर्ण्य द्विगुणतर परि-
तुष्टोऽसौ समर्पितानि वटकानि गृहीतानि मया । अभिहित च
तेन कुमारायमपरो मम प्रसादो विधेय कुमारेण यदुत

यथावसरे पठिते च निर्विकल्पमेतेषां मध्यादेकं पठकं भवितव्यं कुमारेणेति । मयाभिहितं किमत्र प्रार्थनया । निवेदितं एवाय-मात्मा वरमित्यस्य । वैश्वानरेणाभिहितम् । महाप्रसादोऽनुगृहीतो सोऽहं कुमारेणेति । ततश्च तातेन सदत्र विनयनीयो नियुक्तो राजसभो दारकः । यदुत भद्रे विदुर समादिष्टो मया कुमारः । यथानन्यमनस्केन भवता कलाग्रहणं विधेयम् । अहमपि न द्रष्ट-व्योऽहमेव भवन्तमागत्य द्रक्ष्यामि । तदेवं स्थिते मम राज्यकार्य-व्याकुलतया कदाचित्त्वत्समीपे गमनं न घटेत ततो भवता प्रति-दिनं कुमारशरीरवार्ता मम सपादनीया विदुरेणोक्तम् यदाज्ञा-पयति देवः ततः प्रभृति तेन तद्राजशासनमर्चितं स सर्वोऽपि मदीयो राजदारककलाचार्यकदम्बकव्यतिकरः । तथापि ममाति-भयेन कियन्तमपि कालं न कथितोऽसौ तातस्य अतिनिर्भरमेकान्ते निवेदितोऽन्यदा ततश्चिन्तितं तातेन नैष विदुरस्तावदसत्यं भाषते। न चापि कुमारः प्रायेणैवंविधमाचरति तत्किमत्र तत्त्वं भविष्य-तीति न जानीमहे । यदि च कलाचार्यस्यापि वचनं विधत्ते कुमारो निष्पन्नं तत्कलाग्रहणप्रयोजनमिति चिन्तया समुद्विग्नो ऽभूत्तातश्चित्तेन पुनश्चिन्तितमनेनेदम् । अथ प्राप्तकालं पृच्छामि तावत्कलाचार्यमेव यथावस्थितम् । ततो विदिते वृत्तान्ते तद्वि-चारणोपाये यत्नं करिष्यामि ततः प्रेषितस्तदाकारणाय सहजमार्गं विदुरः समागतः कलाचार्यः । अभ्युत्थितस्तातेन दापितमासनं विहिता परिचर्या ततस्तदनुज्ञातविष्टरोपविष्टेन तातेनाभिहितं आर्य बुद्धिसमुद्र अपि समुपयाति कलाग्रहणं कुमाराणाम् ।

तेनाभिहितं देव बाढमुत्सर्पति युष्मदनुभावेन तातेनाभिहितं किं परिणताः काश्चिन्नन्दिवर्द्धनकुमारस्य कलाः कलाचार्येणाभिहितं सुष्ठु परिणता देव निष्पन्न एव कलासु नन्दिवर्द्धनकुमारः। तथाहि। स्वीकृतमनेन समस्तमपि लिपिज्ञानं स्वयं दृष्टमिव गणितं उत्पादितमिवात्मना व्याकरणं चेतोभूतमस्य ज्योतिषं सात्मीभूतमष्टाङ्गमहानिमित्तं व्याख्यातमनेनैव छन्दोऽनेन लक्षणं नृत्तं शिक्षितं गेयं प्रणयिनीवास्य हस्तशिक्षा वयस्येव धनुर्वेदः मित्रमिव वैद्यकं निर्देशकारीव धातुवादः अनुचराणीव गजलक्षणादीनि स्वाधीनविक्रयाणि पत्रच्छेद्यादीनि। किं बहुना नास्ति सा काचित्कला या कुमारमासाद्य न प्राप्ता परां काष्ठामिति।

ततः प्रादुर्भवदानन्दोदकपरिपूरितनयनयुगलेनाभिहितं तातेन आर्य एवमेतत् किमत्राश्चर्यम् किं सूर्ये हतोद्योगे न सम्पद्यते कुमारस्य धन्यः कुमारो यस्य युष्मादृशा गुरवः बुद्धिसमुद्रेणोक्तं देव मामैवमादिश नेदं मम युष्मदनुभावोऽयं तातेनाभिहितं आर्य किमनेनोपचारवचसा युष्मत्प्रसादेनैवास्मदानन्दचन्दनदायिना सञ्जातः कुमारः सकलगुणभाजनताम्। बुद्धिसमुद्रेणोक्तं यद्येवं ततो देव कलाविषु निपुणैरनुचरैर्बोधनीयाः स्वामिन इति यथाऽऽलोचनं किंचिद्देवं विज्ञापयितुमिच्छामि तत् युक्तमयुक्तं वा अनुमन्यतां देवो यतो यथार्थं मनोहरं च दुर्लभं वचनम्। तातेनाभिहितं कस्मादार्य यथास्थितवचने कोऽपरोऽस्माकं बुद्धिसमुद्रेण यदेव ततो यदादिष्टं देवेन यथा सकलगुणभाजनतां गतः कुमार इति तदेव स्वाभाविकं कुमारस्य सर्वं प्रतीयं सत्कार

यद्देव किन्तु सकलमपि कुमारस्य गुणसन्दोहं कलङ्केनेव शशधरं कज्जलेनेव तामरसं कार्पण्येनेव विज्ञाननिवहं नैर्लज्ज्येनेव स्त्रीजनं भीरुत्वेनेव पुरुषवर्गं परोपतापेनेव धर्मं वैश्वानरसम्पर्केण दूषितमवगच्छामि ।

यत सकलस्यापि कलाकलापकौशलस्य प्रशमोऽलङ्करणम् । एष तु वैश्वानरपापमित्रतया सन्निहित सदात्मीयसामर्थ्येन न प्रशमं कुमारस्य लागयति ।

कुमारस्तु महामोहवशात्परमार्थवैरिणमप्येनं वैश्वानरं परमोपकारिणमाकलयति तदनेनेदृशेन पापमित्रेण यस्य प्रतिहत ज्ञानसारं प्रशमामृतं कुमारस्य तस्य निष्फलो गुणप्राग्भार इति ।

ततस्तदाकर्ण्य तातो वज्राहत इव गृहीतो महादुःखेन ततस्तातेनाभिहितं भद्र वेदक परित्यजेदं चन्दनरसैकशीतलं तालवृन्तं न मामेव शरीरतापो बाधते गच्छ समाहूय कुमारं येनापनयामि तस्य पापमित्रसङ्गवारणेन दुःखमात्मनोऽन्तस्तापमिति ।

ततो विमुच्य तालवृन्तं क्षितिनिहितजानुकरमस्तकेन वेदकेनाभिहितं यदाज्ञापयति देव किन्तु महाप्रयोजनमपेक्ष्य भविष्याम्यहमस्थापितमश्रुतम ततो न तत्र देवेन कोपः करणीयः । तातेनाभिहितं भद्र हितभाषिणि क कोपावसरो वदतु विवक्षितं भद्रः । वेदकेनाभिहितं देव यद्येवं ततः कुमारपरिचयादेवावधारितमिदं मया यदुताय वैश्वानरोऽन्तरङ्गभूतः कुमारस्य वयस्यो न शक्योऽधुना केनाप्यपसारयितुं गृहीतः कुमारेणात्यर्थं हितबन्धुबुद्ध्या

न शक्नोति तद्विरहे स्थानमप्यासितुं कुमार यतो न क्वचित् धृतिं लभते रणरणकेन गम्यते शून्यमनस्केन गृहितमात्मकम् ।

ततो यद्यपि कुमारो वैश्वानरसंसर्गत्यागं प्रति किञ्चिदुच्यते ततोऽहमेव तर्कयामि महान्तमुद्वेगं कुर्यात् आत्मघातादिकं वा विदध्यात् अन्यदा किञ्चित्कालान्तरितमनयाकार मतान्येन्तिष्ठतो माचार्यं किञ्चिदस्तु कुमारमहति देव । बुद्धिसमुद्रेणोक्त एव सत्यमेव सर्वमिदं यदावेदितं वेदकेन ।

तथाहि। वयमपि कुमारस्य पापमित्रसम्बन्धवारणे गाढमुद्युक्ता एककालमास्महे चिन्तितं चास्माभि यद्ययं कुमारोऽनेन वैश्वानरपापमित्रेण वियुज्येत ततः सत्यं नन्दिवर्द्धनः स्यात् केवलमीदृशं कथञ्चिदनयोर्गाढनिरूढं प्रेम येन न शक्यतेऽधुना कुमारोऽनयोरेतया वियोजनं विधातुमित्यतोऽशक्यानुष्ठानकल्पं कुमारस्य वैश्वानरेण सह मैत्रीवारणमिति मन्यामहे। तातेनाभिहितमार्य क पुनरत्रोपायो भविष्यति। बुद्धिसमुद्रेणोक्तम्। अतिगहनमेतत्। वयमपि न जानीमो विदुरेणाभिहितम्। देव श्रूयतेऽत्र कश्चिदतीतानागतवर्त्तमानपदार्थवेदी समागतो जिनमतज्ञो नाम सिद्धपुत्रो महानैमित्तिकः स कदाचिदत्रोपायं लक्षयति। तातेनाभिहितं साध्वभिहितं भद्र साधु शीघ्रं समाहूयतां स भवता विदुरेणाभिहितं यदाज्ञापयति देव इति। निर्गतो विदुरः समागतो नैमित्तिकेन सह स्तोकवेलया दृष्टो नैमित्तिकस्तातेन तुष्टस्तेनासौ दापितमासनं कृतमुचितकरणीयं कथितो व्यतिकरः। ततो बुद्धिनाडीसञ्चारेण निरूप्य तेनाभिहितं महाराज न विद्यतेऽन्यः कश्चिदुपायः। एक

यथाच परमुपायो विद्यते दुर्लभश्चासौ प्रायेण । तावेताभिहितं कीदृश च इति कथयतार्य । जिनमतज्ञेनाभिहितं महाराजाकर्णय ।

अस्ति रहितं सर्वोपद्रवैर्निवासस्थानं समस्तगुणानां कारणं कल्याणपरंपराया दुर्लभं मन्दभागधेयैश्चित्तसौन्दर्यं नाम नगरम् ।

तथाहि ।

वसतां तत्र लोकानां नगरे पुण्यकर्मणाम् ।
रागादिचरटाः सर्वे जायन्ते नैव बाधकाः ॥
यतश्च क्षुत्पिपासाद्या बाधन्ते तत्र नो जनम् ।
ततस्तदुच्यते धीरैः सर्वोपद्रववर्जितम् ॥
ज्ञानादिभाजनं लोकस्तद्दर्शनेन जायते ।
कलाकलापकौशल्यं न ततोऽन्यत्र विद्यते ॥
शमश्चौदार्यगाम्भीर्यधैर्यवीर्यादयो गुणाः ।
वसतां तत्र तत्सर्वगुणस्थानमतो मतम् ॥
यतश्च वसतां तत्र धन्यानां सम्प्रवर्तते ।
उत्तरोत्तरभावेन विशिष्टा शुभपद्धतिः ॥
न च सम्पद्यते तस्याः प्रतिपातः कदाचन ।
कल्याणपद्धतेर्हेतुरतस्तन्नगरं मतम् ॥
सर्वोपद्रवनिर्मुक्तं समस्तगुणभूषितम् ।
कल्याणपद्धतेर्हेतुर्यत एवं च तत्पुरम् ॥
अतएव सदानन्द तत्पुण्यैर्निषेवितम् ।
नगरं चित्तसौन्दर्यं मन्दभाग्यैः सुदुर्लभम् ॥

तत्र च नगरेऽस्ति हितकारी सर्वलोकानां शुभोद्योगो दृढ

निपद्दे दत्तावधान शिष्टपरिपालने परिपूर्ण कोशदण्डसमृद्धेन शुभपरिणामो नाम राजा।

यतोऽसौ सर्वलोकानां चित्तसन्तापवारकः।
तथा सम्पर्कमात्रेण महानन्दविधायकः॥
मद्नुशासमार्गेऽपि जन्तूनां स प्रवर्त्तकः।
अतो वीरजनैर्लोके हितकारी निगद्यते॥
रागद्वेषमहामोहक्रोधलोभमदभ्रमाः।
कामेर्ष्याशोकदैन्याद्या ये चान्ये दुःखहेतवः॥
दुष्टचेष्टतया नित्यं लोकसन्तापकारिणः।
तेषामुन्मूलने राजा स कृतयत्नस्तिष्ठते॥
ज्ञानवैराग्यसन्तोषत्यागसौजन्यलक्षणाः।
ये चान्ये जनताह्लादकारिणः शिष्टसम्मताः॥
तेषां स राजा सततं परिपालनतत्परः।
अस्ति निःशेषकर्त्तव्यव्यापारविमुखः सदा॥
धीधृतिस्मृतिसंवेगप्रशमाद्यैः परिपूर्यते।
भाण्डागारं यतस्तस्य गुणरत्नैः प्रतिक्षणम्॥
दण्डश्च वर्तते तस्य चतुर्भेदबलात्मकः।
शीलाङ्गलक्षणैर्नित्यं रथदन्तिहयादिभिः॥
दुष्टानां निग्रहाधायकः शिष्टानां परिपालकः।
कोशदण्डसमृद्धश्च तेनासौ गीयते नृपः॥

तस्य च शुभपरिणामस्य राज्ञो गृहीतजयपताका शरीरसौन्दर्येण विनिर्जितभुवनत्रयकलाकलापकौशलेनोपहसितरतिं

भमा विलासविस्तरेणाधरिताखिलनीलमहाख्यातिप्रथा निष्प्रतिमश्रि-
तया निष्प्रकम्पता नाम महादेवी ।

एकत्र पर्यायशतेन हृताशहारवचनम् ।
सुरासुरनरस्तैव यस्यालोकेऽतिसुन्दरम् ॥
क्षोभाय मुनिसघस्य कदाचिदुपतिष्ठते ।
अन्यस्यां दिशि सन्धाय सा देवी निष्प्रकम्पता ॥
ग्रामणिमुनिचित्तानां सदामेवोपजायते ।
अत्र शरीरसौन्दर्याख्या गृहीतपताकिका ॥
रुद्रेन्द्रोपेन्द्रचन्द्राद्याः कलाकौशलशालिनः ।
ये चान्ये लोकविख्याता विद्यन्ते भुवनत्रये ॥
लोभकामादिभिः सर्वे जितास्ते भावशत्रुभिः ।
न कौशलमतस्तेषां विद्यते परमार्थतः ॥
तस्यास्तु दैत्यापातविनिर्मोक्षण येन लीलया ।
साम्पराजयते तेन याभिभूतजगत्त्रया ॥
रतिविलासा कामस्य केवलं तावदेतत् ।
सुनयस्तु पुनस्तेषां न वार्त्तामपि जानते ॥
तथा मता पुनर्दृष्टा ब्रह्मनिर्वाहणादयः ।
विलासा मुनिलोकस्य क्षणमाक्षेपकारिणः ॥
अतीपदर्शिता सत्यं स्वविनाशे रतिलया ।
यथा च अश्मभोक्ता वा तथेदानीं निगद्यते ॥
आपत्तिमग्नमर्थार्थं प्रकाश्य निष्कोलितम् ।
निर्वाहयति चौपम्यं सेनानी भर्तृवाता ॥

सदन्वती पुनर्नैव पत्युः संरक्षणक्षमा ।
निष्प्रकम्पतया तस्मात् भर्तृभक्ततया जिता ॥
किञ्चेह शुद्धलोकेन राज्ञः कार्यप्रसाधनी ।
तस्य राज्ये परं सारा सा देवी निष्प्रकम्पता ॥

तयोश्च निष्प्रकम्पता-शुभपरिणामयोर्देवीनृपयोरस्ति सर्वसुन्दराणामुत्पत्तिभूमिराश्चर्याणां मञ्जूषा गुणरत्नराशेः वशीकरणेन मुनीनामपि मनोहारिणी क्षान्तिर्नाम दुहिता ।

यत्र सा सततानन्ददायिनी पर्युपासिता ।
स्मरणेनापि निःशेषदोषमोषविधायिनी ॥
निरीक्षते विशालाक्षी यं नरं स्निग्धलीलया ।
पण्डितैः स महात्मेति स्तुत्वा गाढं प्रशस्यते ॥
आलिङ्गनं पुनस्तस्यास्तन्वी यो लभते नरः ।
स सर्वनरवर्गस्य चक्रवर्ती भविष्यति ॥
अतश्चाद्भुततरं तस्या नान्या जगति विद्यते ।
समस्तसुन्दराणां सा विशुद्धिस्तेन गीयते ॥
सद्ध्यानयोगविज्ञानसर्वर्द्धिप्रमुखादयः ।
लोकानाममुना भावा ये चमत्कारकारिणः ॥
ते भवन्ति भविष्यन्ति भूताश्चानन्ततो यतः ।
तत्प्रभावेन सत्त्वानां तामाराधयतां सदा ॥
क्षान्तिरित्थं सा तस्याश्चापराप्युदाहृता ।
यथा च रत्नमञ्जूषा तदेवास्तां निबोधत ॥
दानशीलतपोध्यानप्रमुखरत्नराशिसमा ।

सत्यशौचार्जवक्षान्तिशौर्यैश्वर्यादयो गुणाः ॥
ये केचित्सुन्दरा लोके वर्त्तन्ते रत्नरूपिणः ।
शान्तिरेवहि सर्वेषां तेषामाधारतां गता ॥
तेषामौ रत्नभूषा विद्वद्भिः परिकीर्त्तिता ।
शान्तिहीना गुणाः सर्वे न शोभन्ते निराश्रयाः ॥

अथवा ।
शान्तिरेव महादानं शान्तिरेव महातपः ।
शान्तिरेव महाज्ञानं शान्तिरेव महादमः ।
शान्तिरेव महाशीलं शान्तिरेव महाकुलम् ॥
शान्तिरेव महावीर्यं शान्तिरेव पराक्रमः ।
शान्तिरेव च सन्तोषः शान्तिरिन्द्रियनिग्रहः ॥
शान्तिरेव महाशौचं शान्तिरेव महादया ।
शान्तिरेव महारूपं शान्तिरेव महाबलम् ॥
शान्तिरेव महैश्वर्यं शान्तिर्धैर्यमुदाहृता ।
शान्तिरेव परं ब्रह्म सत्यं शान्तिः प्रकीर्त्तिता ॥
शान्तिरेव परा मुक्तिः शान्तिः सर्वार्थसाधिका ।
शान्तिरेव जगद्वन्द्या शान्तिरेव जगद्धिता ॥
शान्तिरेव जगज्ज्येष्ठा शान्तिः कल्याणदायिका ।
शान्तिरेव जगत्पूज्या शान्तिः परममङ्गलम् ॥
शान्तिरेवौषधं श्रेष्ठं सर्वव्याधिनिबर्हणम् ।
शान्तिरेवारिनिर्णाशं चतुरङ्गं महाबलम् ॥
किंवात्र बहुनोक्तेन शान्तौ यत्र प्रतिष्ठितम् ।

अतएव तु सा कन्या मुनिलोकमनोहरा ॥
क्षुद्रादीदृग्विरूपायां को न चित्तं सचेतनः ।

अन्यच्च ।

यस्य चित्ते समारोहेदियमत्यन्तशोभया ।
सा कन्या धन्यतां प्राप्य सोऽपि तद्रूपतां भजेत् ॥
अतः सम्यग्गुणाकाङ्क्षी कः सकर्णो न तां हृदि ।
कुर्यात्कन्यां सदाकालं सर्वकामसमर्पिकाम् ॥

एवं च स्थिते ।

सा गुणोत्कर्षयोगेन कन्या सर्वाङ्गसुन्दरा ।
अस्य वैश्वानरस्योच्चैः प्रतिपक्षतया स्थिता ॥
तस्या दर्शनमात्रेण भीतभीत इवाकुलः ।
एष वैश्वानरो मन्ये दूरेण प्रपलायते ॥
निःशेषदोषपुञ्जोऽयं सा कन्या गुणमन्दिरम् ।
साक्षादग्निरयं पापः सा पुनर्हिमशीतला ॥
अतः संगमनं हि नानयोर्विद्यते क्वचित् ।
विरोधभावाभिनिवेशमस्माभिरभिपीडितः ॥
यदैव कन्यां तां धन्यां कुमारः परिणेष्यति ।
अनेन पापमित्रेण तदा मैत्री निवर्त्स्यति ॥

अत्रान्तरे विचिन्तितं विदुरेण अये अनेन विमलमतिना मन्त्रिणा वैदग्ध्यमभिहितं यथा चित्तसौन्दर्यं च राजपुरं तत्र सा चित्तवृत्तिस्तत्र चारित्रा यानि तेषां नन्दिवर्धनकुमारस्यैव

पापमित्रेण वैश्वानरेण सह सम्पर्कं निवारयितुं समर्थो नान्यस्तन्नि-
वारणे कश्चिदुपाय इति तत्सर्वमनेन युक्तमुक्तम् ।

अथवा किमत्राश्चर्यं न हि जिनमतज्ञः कदाचिदयुक्तं भाषते ततस्तन्निमित्तकवचनमाकर्ण्य तातेनावलोकितं पार्श्ववर्तिनो मतिधनस्य महामन्त्रिणो वदनम् । विदितोऽसौ प्रश्नतरोऽभिहितस्तातेन आर्य मतिधन श्रुतमेतद्भवता मतिधनेनाभिहित देव श्रुतं तातेनाभिहित आर्य यद्येवं ततो महदिदं मम चित्तोद्वेगकारणं यदेव विशिष्टजनमूर्धन्योऽपि कुमारस्य गुणकलापः पापमित्रसम्बन्धदूषितो निष्फलः सम्पन्न इति तद्गच्छ शीघ्रं प्रेषय चित्तसौन्दर्ये वचनविन्यासकुशलान् प्रधानमनुष्यान् पाठय तद्वैश्वानरमैत्रीनिभ्रतानि इति । उपदिश गच्छतां तेषां निरन्तरसम्बन्धकरणपटून्युपचारवचनानि याचय कुमारार्थं शुभपरिणामं क्षान्तिदारिकामिति । मतिधनेनाभिहित यदाज्ञापयति देव इति निर्गन्तुं प्रवृत्तो मतिधनः जिनमतज्ञेनाभिहित महाराज अलमनेनारम्भेण न खल्वेवंविधगमनयोग्य तन्नगरं तातेनाभिहित आर्य कथं जिनमतज्ञेनाभिहित महाराज समस्त्यत्रैव लोके नगरराजभार्यापुत्रमित्रादीनि वस्तूनि द्विविधानि भवन्ति तद्यथान्तरङ्गाणि बहिरङ्गाणि च तत्र बहिरङ्गेष्वेव वस्तुषु भवादृशां गमनाज्ञापनादिव्यापारो नान्तरङ्गेषु एतच्च नगरं राजा तत्पत्नी दुहिता च सर्वमन्तरङ्ग वर्तते तत्र युज्यते तत्र मनुष्यप्रेषणं तातेनाभिहित आर्य क्व पुनस्तत् प्रभवति जिनमतज्ञेनाभिहित योऽन्तरङ्ग एव राजा तातेनाभिहित आर्य कः पुनरसौ जिनमतज्ञेनाभिहित महाराज

कर्म्मपरिणाम तस्य हि शुभपरिणामस्य कर्मपरिणामेनैव भटभुक्त्या दत्तं तन्नगरम् । अतस्तदायत्तोऽसौ वर्त्तते तातेनाभिहितं आर्य किं भवत्यसौ कर्मपरिणामो मादृशामभ्यर्थनाविषयो जिनमतज्ञेनाभिहितं महाराज नैतदेवं स हि यथेष्टकारी प्रायेण नापेक्षते सत्पुरुषाभ्यर्थनां न रज्यते सदुपचारवचनेन न श्लाघ्यते परोपरोधेन नानुकम्पते दुःखापापद्गतं जनं केवलमसावपि कार्यं विदधान पृच्छति महत्तममगिनीं लोकस्थितिं पर्यालोचयति स्वभार्यां कालपरिणतिं कथयत्यात्मीयमहत्तमाय स्वभावाय । अनुवर्त्तते नन्दिवर्द्धनकुमारस्य समस्तभवान्तरानुयायिनीं प्रच्छन्नरूपां भार्यां भवितव्यतां बिभेति कियन्मात्रं नन्दिवर्द्धनकुमारवीर्यादपि स्वप्रवृत्तौ।

ततश्चैवंविधमन्तरङ्गपरिजनं स्वस्वभावनया सन्मान्य एष कर्मपरिणाममहाराजः कार्यं कुर्वाणो न बहिरङ्गलोकं रटन्तमपि गणयति किंतर्हि यदात्मने रोचते तदेव विधत्ते तन्नास्तायमभ्यर्थनोचित किंतु यदास्य प्रतिभासिष्यते तदा स्वयमेव कुमाराय दापयिष्यति शुभपरिणामेन चारुदारिकामिति । तातेनाभिहितं आर्य हतास्तर्हि वयं यतो न ज्ञायते कदा चित्तस्य प्रतिभासिष्यते अभिधानपभारिते पापमिव कुमारस्य समस्तगुणविकलतया न किंचिदस्माकं जीवतीति हत्वा जिनमतज्ञेनाभिहितं महाराजाऽत्र विषादेन किमत्र क्रियते यदीदृशमेवेदं प्रयोजनमिति ।

तथाहि

नरः प्रमादी सर्वोऽर्थे स्यादुपालम्भभाजनम् ।
असाध्यवस्तुविषये पुरुषो नापराध्यति ॥

अपि च ।

योऽन्यैर्दृष्टं प्रदर्शितं समपेक्ष्य समाश्रयम् ।
आत्मनश्च परेषां च न च वाच्यः कदाचिदिताम् ॥
तदेव स्थिते कार्यं यद्विविक्ततया परम् ।
भवती लक्षविलासामाश्रित्य युज्यते ध्रुवम् ॥
अन्यत्र कथ्यते किं विशेषतः कारणकारणम् ।
निराकरणतामेव मामद्येयं भवादृशाम् ॥

तातेनाभिहितं तात साधु समाचारिता वचनेन भवता यदिमवचनेन तस्य किं तद्वाक्य चेतसः स्वास्थ्यकारणमिति जितमनस्केनाभिहितं महाराज कस्यचन कुमारस्य प्रचण्डवदनः पुण्डोदयो नाम वयस्यः स यावदस्य पार्श्वतो तावदेव वैशाखः पापस्थितता च समस्ते कुमारस्य प्रसादयिष्यति स सोऽस्य प्रस्तुतार्थकथनया उपशमनीति तदाकर्ण्य मनाक् स्वस्थीभूतमनाः । अत्रान्तरे दिनकरसमस्तस्य मध्यभागमारूढः निवेदयन्नाडिकाच्छेदप्रहतपटहनादानुसारी समुत्थितः शङ्खध्वनिः । पठितं कालनिवेदकेन ।

न क्रोधाग्नेरयं वह्निः किं तु मध्यस्थभास्वतः ।
दग्धवत्विति लोकानां सूर्यो मध्यगतो गतः ॥

तातेनाभिहितमये मध्याह्नसमयो वर्तते तत समुत्थातव्यमिदानीमिति एवं विसर्जितो राजलोकः पूजितौ कमारपूर्वं नैमित्तिकौ प्रस्थापितौ च बहुमानं ततो नैमित्तिकवरकन्दर्पदत्तनुष्ठानमेतदिति कालनिर्णयेनापि तातेन मौहूर्तिकेन्द्रप्रदोष

मा साहसमिति वदन्तौ प्राप्तौ ससम्भ्रमं तत्समीपं कुमारौ छिन्न पाशको बालेन तत समीहविकलो भग्नमोचनाय पतितोऽसौ पुरुषो भूतले समाश्वासितो वायुदानेन कुमाराभ्यां लब्धा चेतना उन्मीलिते लोचने निरीक्षिता दिशो दृष्टौ कुमारौ अभिहितस्ताभ्यां भद्र किमेतदधमपुरुषोचितं भवता व्यवसितं किं वा भद्रस्येदृशाध्यव-सायस्य कारणमिति कथयतु भद्रो यद्यनाख्येयं न भवति। ततो दीर्घ-दीर्घं निश्वस्य पुरुषेणाभिहितम्। अलमस्मदीयकथया न सुन्दरम-नुष्ठितं भद्राभ्यां यदहमात्मानं निर्वापयितुकामो भवद्भ्यां धारितः तदधुनापि न कर्त्तव्यो मे विघ्न इति ब्रुवाणः समुत्थित पुनरात्मानमुद्बन्धयितुमसौ पुरुषो धृतो बालेन अभिहितश्च। भद्र-कथय तावदस्माकमनुरोधेन स्ववृत्तान्तं ततो यद्यत्प्रतीकारः स्या त्ततो यदुचितं तत्कुर्मः। पुरुषेणाभिहितं यदि निर्बन्धस्तत् श्रूयतां आसीन्मम शरीरमिव सर्वस्वमिव जीवितमिव हृदयमिव द्वितीय मन्तरात्मानमिव मित्रं स चातिस्नेहनिर्भरतया न क्षणमात्रमपि मां विरहयति किं तर्हि सकलकालं मामेव लालयति पालयति पृच्छति च मां क्षणे क्षणे। यदुत भद्र अद्य किं तुभ्यं रोचते ततो यद्यदहं वदामि तत्तदसौ भवजन्तुसम वयस्यो वत्सलतया सम्पादयति न कदाचिन्मत्प्रतिकूलं विधत्ते। अन्यदा मम मन्दभाग्यतया दृष्टेन सदागमो नाम पुरुषः। यथाशोचितं च सह तेन किञ्चिदेकान्ते भवजन्तुना भावितचित्तेन। इष्ट एव लक्ष्यते ततस्तत्कालादारभ्य निश्चिन्तीभूतो ममोपरि शिथिलस्नेहश्च। न करोति तथा लालनं न दायपालनबुद्धिं न प्रवर्त्तते मदुपदेशे न मम वार्त्तामपि पृच्छति

प्रत्युत मां वैरिकमेव मन्यते दर्शयति विप्रियाणि वक्ति प्रति-
कूलमाचेष्टते ततो मया चिन्तितं हा हन्त किमेतत् न मया
किञ्चिदस्य व्यलीकमाचरितं किमित्ययमकाण्ड एव भावन्
पण्डिकापरावर्त्तित इवान्यथा संवृत्तः । हा हतोऽस्मि मन्दभाग्य
इत्यारारट्यमानो वज्राहत इव पिष्ट इव दलमर्दित इव शोक-
भराक्रान्तमूर्त्तिः प्राप्तोऽहं दुःखातिरेकं कथितं च कथञ्चित्पर्या-
लोचयता मया यथैष सखेऽप्ययं सदागमपर्यालोचजनितोऽनर्थकारी
करो विप्रतारितोऽयं मम वयस्योऽनेन पापेन स चोन्मूलयति मम
हृदयं पुनः पुनस्तेन सदागमेन सह रहसि पर्यालोचयति ।
निवारणार्थं रटन्तमपि मां नाकर्णयति यथा यथा च भवजन्तोः सदा-
गमपर्यालोचः सुतरां परिणमति तथा तथा मामेव निरा-
चिकीर्षति ततः प्रवृत्तं मे गाढतरं दुःखं यन्नदा दृढतरं पर्या-
लोच्य सदागमेन सह किञ्चिदेकान्ते चोदितो मया तत्र वाम-
वर्त्तैव भवजन्तुना परिक्षिप्तोऽहं चित्तेन त्यक्तानि मम वशगानि
महत्त्वेनैव स्वीकृतानि यानि पूर्वं कोमलतूलीगण्डूपधानादिवस्तु-
न्यानि शयनानि विरचितानि चम्पकादिपरिताम्बूलनानि सुगन्धि-
द्रव्याणि प्रासादारक्षिकाणि नानाकर्पूरादीनि कोमलस्पर्शानि ।
व्याख्यानानि मम सुखदायीनि प्रीतोष्णसंप्रतिकूलतया देवा-
ङ्गनाभिराम्बलादीनि विलेपनानि वर्जितं सर्वथा ममातिरा-
गिरेकतया कोमलतनूकृताकृतिनो व्रतमाश्रयातपसा सर्वा
च भवजन्तुः करोति यथोत्पाटनं प्रेते कठिनभूमौ भारते
शरीरे मल परिधत्ते सर्वोपराणि वपति दूरत कोमल

कथञ्चिदापन्ने तन्निष्करोति प्रायश्चित्तं चरते माघमासे शीतं सहति ज्येष्ठाषाढयोरातपं सर्वथा परमवैरिक इव यत्किञ्चिन्मे प्रतिकूलं तत्तत्समाचरति ततो मया चिन्तितं परित्यक्तस्तावत्सर्वथाऽनेन गृहीतश्च मुमुक्षा तथाप्यमरणान्ता प्रणया सञ्जनामामिति हठवाद् । ततो यथायथमनेन सदागमपापमित्रेण विप्रतारितो मामेव कदर्थयति तथाप्येकाकी एव न मया मोक्तव्यो यतो भद्रकोऽयं ममात्मीयतया लक्षितो बहुना कालेन कृतानि भूयांसि ममानुकूलानि सदागमसंसर्गजनितोऽयमस्य विपर्यासः । तत्कदाचिदपगच्छत्येव कालेन ततो भविष्यति ममोपरि पूर्ववदस्य स्नेहभाव । एवं पर्यालोच्य व्यवस्थितोऽहं बहिष्कृतोऽपि तेन भवजन्तुना तत्रैव सन्निधिनि शरीराभिधाने प्रासादे महादुःखानुभवेन कालमुदीक्षमाणो दुरात्मापायावपातित सन् कियन्तमपि कालमिति ।

अन्यदा सदागमवचनमनुवर्तमानस्तिरस्कृत्य मां पुरुषक्रियया निष्काश्य ततोऽपि प्रासादात्परमाधार्मिक इव निर्घृणतया मामाक्रन्दन्तमवगणय्य दृष्ट इव तत्र यास्यामि यत्र भवन्तं लोचनाभ्यां न द्रक्ष्यामीत्यभिधाय गतः क्वचित्स चेदानीं निवृतौ नगर्यां प्राप्तः श्रूयते सा च मादृशामगम्या नगरी ततो मया चिन्तितं किमधुनापि मम प्रियमित्रपरिभ्रष्टेन तद्विरहितेनाजागलस्तनकल्पेन जीवितेन तत्रैवेदमध्यवसितमिति । बालेनाभिहितं साधु स्पर्शन साधु स्थाने भवतो व्यवसायः दुःसहं हि प्रियमित्रपरिभ्रंशदुःखं तद्विरहसन्तापश्च न शक्यतेऽन्यथा यापयितुम् ।

प्रत्युत मां वैरिकमेव मन्यते दर्शयति विप्रियाणि सकलं प्रति कूलमाभेवते ततो मया चिन्तितं हा हन्त किमेतत् न । किंचिदस्य व्यलीकमाचरितं किमित्ययमकाण्ड एव भवजन्तु षष्ठिकापरावर्त्तित इवान्यथा प्रवृत्त । हा हतोऽस्मि मन्दभाग्य इत्याराटयमानो वज्राहत इव पिष्ट इव हृतसर्वस्व इव शोक-भराक्रान्तमूर्त्ति प्राप्तोऽहं दु खातिरेकं स्थितं च कथंचित्पर्या लोचयता मया अये सर्वोऽप्ययं सदागमपर्यालोचनजनितोऽनर्थव्यति करो विप्रतारितोऽयं मम वयस्योऽनेन पापेन स चोन्मूलयति मम हृदयं पुन पुनस्तेन सदागमेन सह रहसि पर्यालोचयति निवारणार्थं रटन्तमपि मा नाकर्णयति यथा यथा च भवजन्तो सदा गमपर्यालोच सुतरा परिणमति तथा तथा मामेव शिथिलयति तत प्रवृद्धते मे गाढतरं दु ख अन्यदा दृढतरं पर्या लोच्य सदागमेन सह किंचिदेकान्ते चोटितो मया सह सर्वथ सर्वथैव भवजन्तुना परिच्छिन्नोऽहं चित्तेन त्यक्तानि मम वचनानि मद्वचनेनैव गृहीतानि यानि पूर्वं

यानि शयनानि विरचितानि हंसपक्ष्मादिपूरितान्यासनानि , तूहतिकाप्रावाररल्लिकाचीनांशुकपटांशुकादीनि कोमलवस्त्राणि व्याख्यातानि मम सुखदायीनि शीतोष्णर्त्तुप्रतिकूलतया कस्तूरिकागुरुचन्दनादीनि विलेपनानि वर्जित सर्वथा तिरेकसंपादकं कोमलतनुलताकलितो लललामघातसात स भवजन्तु करोति केशोत्पाटनं शेते कठिनभूमौ शरीरे मल परिधत्ते जरच्चीवराणि वर्जयति दूरत

कथंचिदापन्ने तस्मिन्करोति प्रायश्चित्तं सहते माघमासे शीतं सहते ज्येष्ठाषाढयोरातपं तथापि परमवैरिक इव यत्किंचिन्मे प्रतिकूलं तदेवमाचरति ततो मया चिन्तितं परित्यक्तस्तावत्सर्वथाऽमनेन सद्बोधस्य प्रभुत्वात् तथाप्यसरलात्मा प्रथया सम्बन्धामामिति हृष्टवान्। ततो यद्यदमनेन सदागमपापमित्रेण विप्रतारितो मामेव कदर्थयति तथाप्यकाण्ड एव न मया मोक्तव्यो यतो भद्रकोऽयं ममात्मीयसम्बन्धात् लपितो बहुना कालेन एतानि भूयांसि ममानुकूलानि सदागमसंसर्गजनितोऽयमस्य विपर्यासः। तत्कदाचिदपगच्छत्येव कालेन ततो भविष्यति ममोपरि पूर्ववदस्य स्नेहभावः। एवं यथोक्तोऽस्य व्यवस्थितोऽहं वञ्चितोऽपि तेन भवजन्तुना तथैव तस्मिन्नपि शरीराभिधाने प्रासादे महादुःखानुभवेन कालमुदीक्षमाणो दुरात्मापापप्रवर्धित' सन् कियन्तमपि कालमिति।

अन्यदा सदागमवचनमनुवर्तमानस्तिरस्कृत्य मां पुण्यक्रियया निष्क्रान्तः ततोऽपि प्रासादात्परमाधार्मिक इव निर्घृणतया मामाक्रन्दन्तमवगणय्य वहद् इव तत्र यास्यामि यत्र भवस्य लोचनार्थं न द्रक्ष्यामीत्यभिधाय गतः कुत्रचित्स चेदानीं निर्वृतौ नगर्यां नाम श्रूयते या च मादृशामगम्या नगरी ततो मया चिन्तितं किमधुनापि मम प्रियमित्रपरिभ्रष्टेन तद्विरहितेनानागतस्तनकष्टेन जीवितेन तत्सदेवमध्यवसितमिति। बालेनाभिहितं साधु स्पर्शन साधु स्थाने भवतो व्यवसायः दुःसहं हि प्रियमित्रपरिभवदुःखं तद्विरहसन्तापश्च न शक्यतेऽन्यथा यापयितुम्।

प्रत्युत मां वैरिकमेव मन्यते दर्शयति विप्रियाणि [illegible] कुञ्चमाचेष्टते ततो मया चिन्तितं हा हन्त किमेतत् [illegible] किञ्चिदस्य व्यलीकमाचरितं किमित्ययमकाण्ड एव चण्डिकापराङ्मुखित इवान्यथा भवेत् । हा हतोऽस्मि इत्याद्यारस्यमानो वज्राहत इव पिष्ट इव हृतसर्वस्व इव भराक्रान्तमूर्त्तिः प्राप्तोऽहं दुःखातिरेकं लक्षितं च लोचयता मया यथे मदीयोऽयं

करी विप्रतारितोऽयं मम वयस्योऽनेन पापेन स चोम्पूचयति [illegible] हृदय पुनः पुनस्तेन सदागमेन सह रहसि पर्यालोचयति । निवारणाय रटन्तमपि मां नाकर्णयति यथा यथा च भगवतो आ- गमपर्यालोचं सुतरां परिणमति तथा तथा मामेव शिथिलयति तत प्रवृत्ते मे गाढतरं दुःखं चन्दद्रा इतर लोच्य सदागमेन सह किञ्चिदेकान्ते चोदितो मया यद वर्येव भगवञ्जुना परिचितोऽहं चिरेण त्यक्तानि मम सहवर्त्तनैव सदौतानि यानि पूर्वं कोमलतूलीगण्डपिधानादि[illegible] यानि शयनानि विरचितानि चम्पकादिपूरितान्याचमानि पुष्प[illegible] इत्यादिकायाकारररिककायौनाद्युक्तपटांशुकादीनि कोमलस्पर्श[illegible] त्याख्यातानि मम सुखदायीनि शीतोष्णसंप्रतिकूलतया वैक[illegible] कस्तूरिकागुरुचन्दनादीनि विलेपनानि वर्जितं सर्वथा मम[illegible] निर्विवादेन कोमलतनुलताचरितो [illegible] च भगवन् कराति वैमनस्योत्पादनं प्रेते कठिनभूमौ धारय[illegible] शरीरं मम चर्य्यशाने अरवीरादि बयति पुनः कोम[illegible]

कथञ्चिदापन्ने तत्किङ्करोति प्रायश्चित्तं वहते मासमासे मौनव्रतानि । छेदादकयोरातप अथवा परमवैरिक इव यत्किञ्चिन्मे प्रतिकूलं तत्तदेवाचरति ततो मया चिन्तितं परित्यक्तसर्वचेष्टाक्षमणेन गृहीतस्य मुमुक्षुणा तथाप्यामरणान्ता प्रथमा अस्मनामिति दृढवाद् । ततो यदृच्छयमनेन सदागमपापमिषेण विप्रतारितो मामेव कदर्थयति तथाप्यकाण्ड एव न मया मोक्तव्यो यतो भद्रकोऽयं ममात्मीयमहत्त्या लक्षितो बहुना कालेन हतानि भूयांसि ममानुकूलानि सदागमनैकजनितोऽयमस्य विपर्यास । तत्कदाचिदपरेण कालेन ततो भविष्यति ममोपरि पूर्ववदस्य स्नेहभाव । एवं पर्यालोच्य मदर्शितोऽहं वहिष्कृतोऽपि तेन भवजन्तुना तथैव यस्मिन्निति शरीराभिधाने प्रासादे महादुःखानुभवेन कालमुदीक्षमाणो दुरात्मापापात्मपापिष्ठ सन् कियन्तमपि कालमिति ।

अन्यदा सदागमवचनमनुवर्तमानस्तिरस्कृत्य मां पुण्यक्रियया निष्क्रान्तः ततोऽपि मायादात्परमाधार्मिक इव निर्धूततया मामाक्रन्दन् तमवगम्य दृष्ट इव तव दास्यामि यथ भवन्त शोचमाश्वां न द्रक्ष्यामीत्यभिधाय गतः कुत्रचिच्चेदानीं निवृत्तौ नगर्यां प्राप्त श्रूयते या च मादृग्भाग्यमन्दा नगरी ततो मया चिन्तितं किममुनापि मम प्रियमित्रपरिभूतेन तदिदमचिरेणागमस्तनकस्तेन जीवितेन तस्यैदमव्यवसितमिति । चार्वङ्गाभिहितं साधु साधु साधु स्थाने भवता व्यवसायः दुःसहं हि प्रियमित्रपरिभवदुःख तदिदमपाख्य न शक्यतेऽन्यथा यापयितुम् ।

तथाहि ।

न शक्य सहसा सोढु क्षमिणापि पराभव ।
कतकेन हि निर्मुक्त पाषाणोऽपि प्रसीयते ॥
मानिनां मित्रविरहे जीवितु नैव युज्यते ।
इद हि नम्रता तूर्णं वानरेण निवेदितम् ॥

अहो ते मित्रवत्सलता अहो ते स्थिरानुराग अहो कृतज्ञता अहो साहस अहो निमित्तभावनेति भवजन्तो पुनरहो घणरस विरक्तता अहो ते कृतघ्नता अहो अलौकिकत्व अहो मूढता अहो खरहृदयत्व अहो अनायानुष्ठानप्रवृत्तिरिति केवलमेवमपि स्थिते प्रतीम्यहमत्र किञ्चित्तदाकर्णयतु भद्र । स्पर्शनेनाभिहित वदतु निर्विकल्पमार्य । बालेनाभिहितम् ।

अलब्धप्रतीकाराणामभिमानावलम्बिनाम् ।
चेष्टैकपक्षकषाणां युक्तमेतद्भवादृशाम् ॥

तथापि मदनुग्रहेण धारणीया भद्रेण प्राणा इतरथा ममापीयमेव गति रक्षितोऽहमनेन भवतो निष्कृत्रिमभिनवाम्ब्येन दाक्षिण्यमहोदधयश्च सत्पुरुषा भवन्ति सत्पुरुषश्च भद्रकायतो गम्यते। अत कर्तव्यमेवैतत् निर्विचार ममाक्त वचन भद्रेण। यद्यपि पून मनोरथा न सिद्धिनिकषा पूयन्ते तथापि मदनुकम्पया भवता मय्य एव भवजन्तुविरहदुःखप्रतीकारबुद्धा ममत्व । स्पर्शनेनाभिहितम् । साधु आर्य साधु धारिता एव भवतानुपहतश्रुतेनाति विशुद्धवचनाच्छतमेवैनानेन स्वयमेव विलीयमाना मदीयप्राणा। किमत्र वक्तव्य नष्टो मेऽधुना प्राकृतप्रलापो विज्ञापित इव भवता

भवजन्तु मौनलोभेन नयनयुगल चाच्छादित चित्त निर्वापित मे शरीर भवद्दर्शनेन किं बहुना त्वमेवाधुना भवजन्तुरिति तत एवानयोर्निरन्तर स्नेहभाव । मनीषिणा चिन्तित न खलु सह-जोऽनुरक्तो यस्य तेनाविमर्शपूर्वकारिणा पुरुषेण निर्वोढव्यस्यते। न च सदारम्भो निर्दोष कदाचिदाजयति । स हि गाढ पर्यालो-चितकारी कृतमस्माभि । तदत्र कारणेन भवितव्य न सुन्दर-मस्यैव स्पर्शन प्रायेण तदनेन सह मैत्री कुर्वता विरूपमाचरित बालेन एव चिन्तयन्नेव मनीषी सम्भाषित स्पर्शनेन तत मनीषिणापि लोकयात्रानुरोधेन सम्भाषण सञ्जाता तेनापि सह बहिश्छायया मैत्री स्पर्शनस्य । प्रविष्टा सर्वेऽपि नगरे सम्प्राप्ता राजभवन दृष्टो दृष्टाभ्याम् कर्मविलास सह महादेवीभ्यां कृत पादपतन जननी-जनकानाम् । आनन्दितास्तेराशीर्वादेन दापितान्यासनानि भोप-विष्टास्तेषु निषण्णा भूतले दर्शित स्पर्शन कथितस्तद्वृत्तान्त प्रका-शितश्चात्मनस्तेन सह मैत्रीभाव कुमाराभ्यां परितुष्ट कर्म-विलास चिन्तितमनेन मम तावदपत्यस्यैतमभिन्न व्याधेस्पष्टपरेतु-रेव स्पर्शन दृष्ट एव मयानेकश पूर्वं तत्सुन्दरमेतस्यापत्य यदनेन सहानयोर्मैत्री सञ्जातेति केवल प्रकृतिरिय ममानादिरूढा वर्त्तते। यदुत योऽस्यानुकूलस्तस्य मया प्रतिकूलेन भवितव्य य पुनरस्य प्रति-कूलो निरभिष्वङ्गतया तस्य मया सुन्दरं वर्त्तितव्य य पुनरैकान्त-तद्भजति स मयापि सर्वथा मोक्तव्य एव तदेव स्थिते निरीक्ष्य निरीक्ष्य कुमारयोरेन प्रतिचेष्टित यथोचित करिष्यामीति वि-चिन्त्याभिहित कर्मविलासेन वत्सौ सुन्दरमनुष्ठित भवद्भ्यां यदेव

पुरुष न देव मायदयापि स्मर व्यदये कौतुकमत्र इति न
च पुनरन्तरा ... निद्रारिति ... वा यायत । अदिदनव
... न मायदा ... ततो विराय चकोरित-
... । ... विहाय ... समाश्रितो इति बोधो
मामादुत्तय । ... समास्थ ... उपरि महाम-
विदय ... भासमानुज ... । बोधाभिवृत्ते
... कुमार इति निजो बोध । ततोऽपक्रममाणेन-
... विचित्रचित्रलताद्र ... बहुलको बहु
... प्रतिगम्य ... समासो नाम पुरुष प्रविधि
... ततो विविधरचु किमपि काल
... समागत 'कोऽयमस्या अधिष्ठो बोधसमीपे' विदितवन्तासो
निदचो ... विधायोचिता प्रतिपत्तिमभिहितो...
... । प्रभात प्राह पदाक्षायपति देव ।
... निगद्य ततो बहिरङ्गेषु नानादेशेषु च कुतो
मया तव ... । तत्र ... अन्तर-
देषु तत्र च दृष्टेषु सदा भिक्षुलोकसमाकीर्णे समस्ता-
...रिव ... पार्थिवलोकानामाकरो विद्याभिमानस्य
हेतुरपरापरम्पराया ... सतत विततेन तमसा रहित
प्रकाशे... राजगृहं नाम नगरम् । तत्र च भूतामविद्य-
... कारण समस्तपापशमीनां ... कुसुमसायकेन
... राजहंसो नाम नरेन्द्र ।
तत्र च विमल ... अप्रतिहताज्ञा समस्तसामन्तेषु

निपुणो जगद्वशीकरणे कृताभ्यासो जन्तुविमोहने पटुबुद्धिः पाप भीतिमार्गेषु अनपेचः स्वकार्यप्रवृत्तौ परोपदेशाना निचिप्तसम स्तराज्यभारो विषयाभिलाषो नामामात्य । ततस्तस्मिन्नगरे यत्र दृष्ट राजकुलस्याभ्यर्णभूभागे मार्गस्तावदकाण्ड एव समुल्लसिता- बहल कोलाहलो निर्गच्छति घोषयता बन्दिवृन्देन प्रख्यापित माहात्म्या लौल्यादिनरेन्द्राधिष्ठिता मिथ्याभिनिवेशादयो भूयांस स्यन्दना पूरयन्ति गलगर्जितेन दिगन्तराणि रागमागमवतरन्तो ममत्वादय करिवरा चलिता हेषारवेण बधिरयन्तो दिक्च क्रवाल अज्ञानादयो वरवाजिनो विराजन्ते गृहीतनानायुधा रण शौण्डीरतया वर्त्तमाना पुरतो धावन्तश्चापलादयोऽसङ्ख्येया पदातय । तत कन्दर्पप्रयाणकपटहशब्दाकर्णनसमनन्तर खरपवनप्रे- रितमेघजालमिव चणमात्रेणैव विलासध्वजमालाकुल विव्वोकस खक्कादहलाध्वनिपूरितदिगन्तर मीलितमपरिमित बल ततमादन लोकय मया चिन्तित अये किमेतत गन्तुमिव प्रवृत्त कश्चिदयं राजा लक्ष्यते तत्किमस्य गमनप्रयोजनमिति यावद्वितकाकुलमि- हामि तावद्दृष्टो मया पर्यन्तदारुण स्वरूपेणादर्शक समारवेविशद बोधको विदुषा निर्वेदभूमिविवेकिनामविज्ञातस्वरूपो निर्विवेकै स्तस्यैव विषयाभिलाषस्य मन्त्रिण सम्बन्धी विपाको नाम पुरुष । तत प्रियसम्भाषणपूर्वक पृष्टोऽसौ मया भद्र कथय किमस्य नरे न्द्रस्य प्रस्थानकारण कुतूहल मे । विपाकेनाभिहित आर्य यदेव तत समाकर्णय एवमिह कश्चिदवसरे सुगृहीतनामधेयेन देवन रागकेसरिणाभिहितोऽमात्यो यदुत आर्य विषयाभिलाष तथा

कदाचिद्विधेहि, यथा मम समस्तमपि जगत् किङ्करतां प्रतिपद्यते मन्त्रिणाभिहितं यदाज्ञापयति देव । ततो मान्य कश्चिदस्य राज्यादिप्रयोजनस्य निवर्त्तमदस्य इति मनसि पर्यालोच्य, किं बाह्यान्येन साधनेन बहुना क्लेशितेन साधयिष्यन्त्येतान्येवाभिमत-वीर्यतया प्रस्तुतप्रयोजनमिति सञ्जातावष्टम्भेन मन्त्रिणा, गाढमनुरक्त-भक्तानि, विविधस्थानेषु निर्व्यूढसाहसानि स्वामिनि भक्ततया लब्धजयपताकानि, अनवद्यायोपकरणपटूनि प्रस्वादेशं शूराणां, प्रकर्षपट्टुलानां, निकषभूमिः परवस्तुस्वहतुराणां, परमकाष्ठा साह-सिकानां, निदर्शनं दुर्दान्तानां, आत्मीयान्येव स्पर्शनादीनि पञ्च मनुष्याणि मानुषाणि, प्रहितानि जगद्वशीकरणार्थं, ततो मया चिन्तितम् । अये लब्धं स्पर्शनस्य तावन्मूलोत्थानं, विपाकेनाभिहितं ततो वितते जगति विसर्पद्भिस्तैर्मोहितप्रायं भुवनं वर्त्तते, बाधितप्रायं रागकेसरिणः किङ्करतां केवलं महाधन्यसमुदायाना-मिति विशेष इव तेषामुपद्रवकारी समुत्थितः । श्रूयते किल कश्चित् सन्तोषो नाम चरटो, निर्वाहिताश्च तान्यभिभूय किल कियन्तोऽपि लोकास्तेन प्रवसिताश्च देवभुक्तेरतिक्रान्तायां निर्वृतौ नगर्यामिति च श्रूयते ततो मया चिन्तितं, अभिचरति मना-गयमर्थो, यतोऽस्माकं समक्षमेव मनीषिविवक्षयोः स्पर्शनेन निर्वृतौ नगर्यां भवजन्तोर्गमनं सदागमबलेनाख्यातं, अथ तु स्पर्शनादीन्य-भिभूय सन्तोषेण निर्वाहिता लोकाः स्थापिताश्च निर्वृतौ नगर्या-मिति कथयन्ति । तत्कथमेतदथवा किमनयाकाण्डपर्यालोचनयाव-हितस्तावद्दाकर्णयाम्यस्य वचनं, यदादिशारयिष्यामि, विपाकेनाभि-

हित 'ततोऽयमाम्रलोकश्रुतेराकर्णितोऽद्य देवेन रागकेसरिणा
माद्यभिभवव्यतिकर'। ततोऽतिदुःसहमश्रुतपूर्वं च स्वपदातिप
भववचनमाकर्ण्य 'कोपानलजनितरक्तलोचनयुगलेन विषमस्फुरित
धरेण करालभ्रुकुटिभङ्गकुण्डलीकृतललाटपट्टेनाबद्धनिरन्तरस्वेदबि
न्दुना निर्दयकराभिहितधरणीपृष्ठेन प्रलयज्वलनभास्वररूपमाबि
भ्रतामपवशपरिस्खलद्वचनेन देवेन रागकेसरिणाज्ञापितं परि
जन। अरे त्वरितास्ताडयत प्रयाणकपटहं सज्जीकुरुत चतुर
बलम्। परिजनेनाभिहितं यदाज्ञापयति देव। ततस्तथा देवमा
यास्यमानमवलोक्य विषयाभिलाषेणाभिहितं 'देव अलमावगर्य
कियानसौ वराकः सन्तापस्थानमादरस्य न खलु केसरी लीला
दलितचित्रगण्डगलितवरकरिनिकरो हरिण व्यापादनयोद्यमा
यत्तचित्तो भवति देवेनाभिहितं सत्यमिदं केवल यु
ष्मानुपकदर्थनां कुर्वता दृढमुदजितात्मना पापेन सन्तोषेण न मन
तमनुमूच्य मम मनस मुस्ताभिका सपद्यते। मन्त्रिणाभिहि'
व स्तोकमेतत् मुष्यतां मरस। ततस्तद्वचनम मनाक् सघोभूतो
व हतमराय गमनोचितं स्थापितं पुरतः पहमणिमण्डप
ारम्भारय कनककलशा उद्धापितं कल्लिजल्पनामको भय भय
गीतानि चाटुवचना[illegible]नि मङ्गलानि प्रथत रतिकल्लवनामक
[illegible]ाताद्यन्द निवर्तितान्युरागभुपना[illegible]नि [illegible]
रयावरा[illegible]णाय [illegible]। [illegible]
[illegible]चापि मया मात। [illegible]
[illegible] म तुष्यन्न [illegible]

पादवन्दनमपि विस्मृतमिति । ततो निःश्वस्य चलितमद्वचनार्थं देवो मयाभिहितः 'भद्र क पुनरयं मातस्तनो' विचार्येवाभिहितं 'नाथ अतिमुग्धोऽसि' यतस्त्वमेतावदपि न जानीषे 'यतोऽस्य देवस्य राग-द्वेषरिपोः सामान्यपाटीनामपि सुमतीनोऽनेकाद्भुतवर्त्ता भुवनत्रय-प्रकटनाभिधानो महामोहो जनकः ।

तथा हि ।

महामोहो जगत्यत्र धामपदेन गीयता ।
प्रसादयो जनपाया यस्य किङ्करतां गताः ॥
अन्येषां जयघ्नोऽपि मीमांसितप्रभा नराः ।
अज्ञानं तु जगत्यत्र महामोहस्य कथ्यते ॥
वेदान्तवादिसिद्धान्ते परमात्मा यथा किल ।
चराचरस्य जगतो व्यापकेन गीयते ॥
महामोहस्वरूपेण तथैवैष जगत्त्रये ।
देवादिसर्वलोकानां व्यापक उदाहृतः ॥
तत एव प्रवदन्ति वादिनस्तत्र पुङ्गवम् ।
सर्वे जीवाः परे पुंसि यथा वेदान्तवादिनाम् ॥
महामोहान्तर्गताः सन्ति तथा सर्वे शरीरिणः ।
जीवन्तोऽपि च तथैव परमात्मा स उच्यते ॥

अन्यच्च ।

अज्ञानपरमार्थोऽपि बुद्धा धनार्जन गुणम् ।
इन्द्रियैर्बाध्यते जन्तुर्महामोहोऽस्य कारणम् ॥
अधीत्य सर्वशास्त्राणि नरा धीरतमोऽपि च ।

विषयेषु रता' श्रोऽय महामोहो विजृम्भते ॥
जैनेन्द्रमततत्त्वज्ञा कषायवशवर्त्तिन ।
भायन्ते यत्नरा लोके तन्महामोहशासनम् ॥
अवाप्य मानुषं जन्म लब्ध्वा जैनं च शासनम् ।
यत्तिष्ठन्ति स्पृहासक्ता महामोहोऽत्र कारणम् ॥
विश्रब्धं निजभर्त्तारं परित्यज्य कुलस्त्रिय ।
परेषु यत्प्रवर्त्तन्ते महामोहस्य तत्फलम् ॥
विलङ्घ्य च महामोहं स्ववीर्येण निराकुल ।
काश्चिद्विडम्बयत्युच्चैर्यतिभावस्थितानपि ॥
मनुष्यलोके पाताले तथा देवालयेष्वपि ।
विलसत्येष महामोहो गन्धहस्ती यथेच्छया ॥
सत्त्वा मित्रभावेन गाढं विश्रब्धचेतसाम् ।
कुर्वन्ति वञ्चनं यत्तु महामोहोऽत्र कारणम् ॥
विलङ्घ्य कुलमर्यादां पारदार्येऽपि यन्नरा ।
वर्त्तन्ते विलसत्येष महामोहमहानृप ॥
यत एव मनुष्यत्वं जाताय गुणभाजनम् ।
प्रतिकूला गुरोस्तस्य'वशो येऽस्य नराधमा ॥
अगार्याणि तथान्यानि यानि कार्याणि कश्चित् ।
चौर्यादीनि विलासेन तेषामेष प्रवर्त्तक ॥
इत्थं प्रभुतदृष्टान्तं परिपाल्य जगत्त्रयम् ।
वृद्धोऽहमधुना युक्तं किं ममेति विचिन्त्य च ॥
पार्श्वस्थितोऽपि शक्नोमि वीर्येण परिरक्षितुम् ।

जगत्तेन स्वपुत्राय राज्यं यच्छामि सांप्रतम् ॥
रागकेसरिणा दत्त्वा ततो राज्यं विचक्षण ।
महामोहोऽधुना सोऽयं मन्ये निश्चिन्ततां गत ॥
यथापीदं जगत्सर्वं प्रभावेन महात्मन ।
तथैव वर्तते नूनं कोऽन्य स्यादस्य पालक ॥
तदेषोऽद्भुतकर्मा च प्रसिद्धोऽपि जगत्त्रये ।
महामोहनरेन्द्रस्ते कथं प्रष्टव्यतां गत ॥

ततो मयाभिहितं 'भद्र न कर्तव्योऽत्र भवता कोप पथिक एवाहं श्रुतश्च मयापि महामोह पूर्वं सामान्येन न पुनर्विशेषतो रागकेसरिजनकतया तदधुनापनीतं ममाज्ञानं भद्रेण । तदुत्तरवृत्तान्तमप्याख्यातुमर्हति भद्र' विपाकेनाभिहितं 'ततो गतो देव शीघ्रं जनकपादमूलं दृष्टोऽनेन तत्र महात्मा लम्बमानेन भ्रूयुगलेन अविद्याभिधानया प्रकम्पमानया गात्रयष्ट्या जराजीर्णकायतृष्णाभिधानायां वेदिकायां विपर्यासनाम्नि विष्टरे समुपविष्टो महामोह । तत क्षितितलविन्यस्तहस्तमस्तकेन कृतं देवेन पादपतनं अभिनन्दितो महामोहेन निषीदतश्च भूतले देवस्य दापितं महामोहेनासनं उपविष्टस्तत्र जनकमप्रमत्तेन देव । कृता शरीरकुशलवार्ता निवेदितश्च प्रस्तुतव्यतिकर । ततो महामोहेनाभिहितं 'पुत्र ममाधुना जरच्चीवरस्येव पश्चिमो भावो वर्तते । ततो मदीयशरीरस्य यामापरिगतगुणैरिव करभस्य यद्यापते तथाऽरं ततो न युक्तं त्वयि तिष्ठति भवत प्रस्थानं कर्तुं तिष्ठ त्वं विपुलं राज्यं विदधानो निराकुलचित्तोऽहमेव प्रस्तुतप्रयोजनं साधयिष्यामीति ।

देवेन कर्णौ पिधायाभिहितं तात मा मैवं वोच शान्तं
प्रतिहतममङ्गलं अनन्तकालस्थायि भवतु यौष्माकं शरीरं म
युष्मदीयशरीरनिराबाधामात्रपरितोषिणि किङ्करजनेऽभिषेक
ज्ञापयितुमर्हति तात । तत्किमनेन बहुना गच्छाम्यहं अनुज्ञातं
यूयम । महामोह प्राह । जात मया तावद्गन्तव्यमेव भव
केवलमवस्थानेऽनुज्ञा इत्यभिधायोत्थितो महामोहः । ततो विर
निबन्धं देवेनाभिहितं तात यद्येवं ततोऽहमपि तातपादानुग
भविष्यामि न प्रतिस्खलनीयस्तातेन । महामोह प्राह । जात ए
भवतु न खलु वयमपि भवन्तं मोक्तुं क्षणमपि पारयाम केव
गुरुतया प्रयोजनस्यैव मन्त्रितमस्माभिस्तदधुनासुन्दरमिदं जाते
जल्पितं देवेनाभिहितं महाप्रमादस्ततस्तातोऽपि प्रस्थितं इति प्रा
समस्तनरेन्द्राणां देवेन प्रवर्त्तितं निःशेषविशेषतो बल तत सन्दे
महामोहनरेन्द्रो दत्तो रागकेसरी विषयाभिलाषादयश्च सर्वे मन्त्रि
महत्तमा मत्तबलेन सन्नाह परदलोपरि निग्रहेण चलिता इ
वार्त्तया क्षुभितमेतत् समन्ताद्राजसचिवनगरम् । अमुष्मिन्
ऽथ अवसरे कनकशेखर तदिदं भद्र सर्वं नरेन्द्रस्य प्रस्थानप्रयोजनमि
एतच्चातिक्रुद्धहृदयेन भवन्तमागतं मया निवेदितं इतरथा हि
तया मम वचनमात्रोच्चारणेऽपि नास्मरोऽस्ति यतो समादान
निदम मयाभिहितं भाव किमत्र वक्तव्यं परोपकारकरणैकरसा
सत्पुरुषा भवन्ति । ते हि परं प्रिय कल्पमुदता शिशिरकर
इवात्मना कुर्वन्ति सत्पुरुषाभिकाङ्क्षितं विदधते शिव
दुर्जनि न गणयन्त्याग्रहं ददति मनसः प्रकामनि इव

ददपोक्तमीव हि से स्पर्शनोऽयं मनन्धा 'ततदेवविधेनोपायपरे
तेनापि परिलुप्ते 'नाम विना मदभिमुखमीक्षमाणु मनाम्यहमनुना
द्यानिधाय च कनकपाणी मया ममो विपाक । मया चिन्तित
अपिलभाय मयाधुना राज्ञकाय 'यत स्वामन्य गुणवृद्धिमुपभ्य
भवताम्भावमेनावातैव मम राज्ञा देव' । तत्र यावन्तोऽनेन विपाकेन
स्वामादौ ज्ञा गुणा इति वादी मर्द तत्र स्वामी घटने 'गगनमुभवमिन्दु
मेतत् मधारमदूपञ्जितमानुदपद्यकस्ताद्योऽपी भविष्यति । कथं
मया तस्य गुणवृद्धि 'देवस्येव मनोऽभ्यतिशयप्रयापि नावेद-
यामि । एतावन्तिकथामि महागमानुवर प्रसाद कथित्रिविषति
अन्यथा पुनापरविरुद्धमेतत्कार्यम् । अथवा किमनेन गच्छामि तावत्
स्वामिपादमूलं निवेदयामि 'यथोपन्यस्तमाख्यं ततो देव एवञ्च
यथोचितं विशाख्यनौस्थामोक्ष समागतोऽहमेतदाकर्ण्य देव प्रमाण
मिति । बोधेनाभिहितं साधु प्रभाव साधु सुन्दरमनुष्ठितं भवता
तत यदैव प्रभावत प्रविष्टो बोध: कुमारसमीप कृतप्रणामेन च
निवेदितं कुमाराय समस्तोऽपि प्रभावगीतवृत्तान्तः परितुष्टो
मनीषी पूजितः प्रभाव 'पृष्टोऽन्यदा मनीषिणा स्पर्शन । यदुत भद्र
किं भवत सदागमेनैव तेन भवजन्तुना सुभिक्षेण सह विरह
संपादितं 'उत तत्र कश्चिदन्योऽप्यासीदिति । स्पर्शनेनाभिहितं आर्य
आसीत् कश्मलक तत्कथया 'न शक्नोऽहं भयविक्लवतया तस्य
क्रूरकर्मणो नामाप्युच्चारयितुं शक्नोमि । न हि सदागममिलतस्य तेषु
भवजन्तावपेदमं ददाति मत्कृपानविषयम् स तु सर्वदानुचर क्रूर-
कर्मा नामायातनाभि याधामौ कदर्थयति 'भवजन्तुं ततो विशु-

सयति तेनैव चाह शरीरमामादाचिमारितो भवजन्तुश्च निवृतौ नगर्यां प्रापित, स एव तत्र कारणं पुरुषः सदागमस्य केवलमुपदेश दाने व्यापारो, मनीषिणाभिहितं भद्र किं तस्याभिधानं स्पर्शन प्राह कथितमिदमार्यस्य मया नाहं भयाकुलतया तदभिधान-मुच्चारयामि । अत एव पूर्वमपि मया न युष्माकं तदाख्यातं किं चातिपापिष्ठोऽसौ, ततोऽस्य नामग्रहणेन, पापिष्ठजनकथा हि क्रियमाणा पापं वर्द्धयति, यशो दूषयति, लाघवमाधत्ते, मनो विप्लावयति, धर्मबुद्धिं ध्वंसयतीति । मनीषिणाभिहितं तथापि महत्कुतूहलं तदभिधानश्रवणेऽस्माकं न पापाद्भयं वर्तमानेन भवता तद्धृदये विधातव्यं, न च नामग्रहणमात्रेण किंचित्पापं न ह्यग्निरित्युक्ते मुखदाहः सम्पद्यते । ततो विज्ञाय निर्बन्धं तदभिनिवेशात् दशापि दिशोऽवलोकयता स्पर्शनेनाभिहितं आर्य यद्येवं ता सन्तोष इति तस्य दुरात्मकस्य नाम, मनीषिणा चिन्तितं, सम्यग् पश्यता सम्यग्दृष्टिरस्य स्पर्शनस्य प्रभावेण यत् सन्तोषयति वार रैक्यताघटमानकं आसीत् सोऽप्यधुना घटितं, सम्यङ्मया पूर्वं वितर्कितं यथा न सुन्दरं सम्येव स्पर्शनं प्रायेणेति, ततो विचा-भिलाषयुक्तोऽयं लोकवञ्चनपरः पर्यटति, तदद्यापि एवं तथापि प्रतिपन्नोऽयं मया मित्रतया, दर्शितो बहिश्छायया स्नेहभावः कौतिलेकेन बहुकालं, तथापि युक्तोऽकाण्ड एव परि त्यक्तुं, बलवत् विज्ञानस्वरूपेणास्य तथाधुना सुतरां न कर्तव्यो विश्रम्भः, नाचरितव्यमस्याननुरूपं न मनागपीयमात्मस्वरूपं न निवे दनीयं तथा, नापि दर्शनीयो बहिर्भावो, विश्रम्भमतिरेव वर्ती

अथैवं मनीषिणाभिहिते वयस्य क्रियतां बालभाषितं कोऽत्र विरोधः ततः स्थापनेन विरचितं पद्मासनं स्थिरीकृतः काय परित्यक्तो बहिर्विक्षेपः निश्चलीकृता दृष्टिः समर्पिता नासिकाग्रे निबद्धं हृत्पौण्डरीके मानसं धृता धारणा सञ्जाता तत्प्रत्ययैकतानता समापूरितं ध्यानं निरुद्धाः करणवृत्तयः आविर्भूतः स्वरूपनिर्भासः सञ्जातः समाधिः विहितोऽन्तर्धानहेतुः स्थम्भ(?)नमन्त्रस्मरणं अनुप्रविष्टौ मनीषिबालयोः शरीरे अधिष्ठित(?) स्वाभिहितभेदश्च विस्मितौ मनीषिबालौ प्रवृत्ता द्वयोरपि कोमल स्पर्शेच्छा ततो बालो मृदूनि शयनानि सुखास्यासनानि कोमलानि वसनानि अभ्यङ्गोद्वर्तनस्नानसम्पादकानि संवाहनानि सलिलावगाहनानि रतसुरतानि शब्दविषयलौल्यानि सुगन्धविलेपनानि अन्यानि चोद्दामललनागात्राणि स्पर्शनप्रियाणि यद्यद् अतिमुखे(?) सततमासेवते तथा शयनादिकं सर्वाक्याधिरिक्त(?) भक्तपानं बालः समस्तमुपभुङ्क्ते बालस्य तु नाध्यवसायेऽभिज्ञो(?) भूत् वस्तस्य मनीषिणः स्वरूपस्य प्रच्छादितया पापाकर्ष्यमाणमिव परमापतन्मद्भूत्(?) सकारण मेव तथाप्यसौ विषयासङ्गेन तदुपभोगं प्रति विमर्शः अहो मे सुखम् अहो मे परमानन्दः ततो मिथ्याभासवशात् परमसुखसन्दोहनिर्भरं किमाहमिति यथा निमीलिताक्षो न मन्य मोहान्तरमवगाहते। मनीषी पुनस्तस्यानुशायी प्रवर्तमानोऽपि भावयति अये स्पर्शनमित्रोऽप्यस्य विकारो न व्याप्नोति परमार्थपुरुषाय मम अन्तःसुखमिदं यथा। तत अन्तः सुखसम्भवतीति यथा न तुष्यति न किञ्चिद्भावति वः

कथञ्चित्प्रतिपन्नोऽयं निपुणतयानुवर्त्तनीयस्तावदिति भावनया काल-यापनां कुर्वाणस्तदनुकूलमपि किञ्चिदाचरति । तथापि तस्य सौख्यरोगविकलतया सन्तोषामृतसम्बौभूतमानसस्य रोगरहित-शरीरस्येव सुपथ्यान्नं तच्छयनादिकमुपभुज्यमानं सुखमेवोत्पाद-यति । तथापि नासौ तवाभिमुख्यं विधत्ते ततो न भवत्यागामि-नोऽपि दुःखस्य गन्धः अन्यदा प्रकटीभूतं स्पर्शनः अभिहितोऽनेन बाल अपि वयस्य मदीयपरिश्रमस्यास्ति किञ्चित्फलं मयका ते कश्चिदुपकारः । बाल आह । वयस्यानुगृहीतोऽस्मि दर्शिता ममा-ऽचिन्त्याह्लादसम्पादनेन भवता सात्मता ।

अथवा विमलार्थं परार्थमेव निर्मितस्त्वमसि विधात्रा ।

तथा हि ।

परार्थमेव जायन्ते लोके पुण्य भवादृशाः ।
मादृशानां तु सम्भूतिस्त्वत्प्रसादेन साधकाः ॥
इह हि तेषां जीवनं यत्स्वभावेन सर्वदा ।
परेषां सुखहेतुत्वं प्रपद्यन्ते महात्मनाः ॥

स्पर्शनेन चिन्तितं अथ मत्सकाशादेव मे निष्प्रतिकारं किन्तु प्रतिपद्यते यथादिष्टमेव कृत्वा देव शतं कृत्यमिति निर्विचार एव विचिन्त्य स्पर्शनेनाभिहितं वयस्य इयमेव मे प्रयोजनं चरितार्थो-ऽहमिदानीं भवदुपकारकरणेनेति ।

ततो मनीषिणमीषदुपहस्याभिहितमनेन वत्स किं बाधकं भवतोऽस्य सम्पादनेन मदीयं प्रयासं उत नेति मनीषिणाभिहितं भद्र किमनयोक्तया अनात्मीयसारकोऽतिशय स्पर्शनेन चिन्तितं अय

साभिप्रायकमेतद् दुष्ट' स्वल्पेप मनीषी न शक्यते मादृशैः रञ्जयि' सूचितोऽहमनेन स्वरूपत प्रायेण तस्मात्सलज्ज एव तावन्मा नात्र बहुविकत्थन श्रेयस्करमिति' विचिन्त्य धूर्त्ततया हता स्याना काकली' न दर्शितो मुखविकारोऽपि' स्थितो मौनेनेति । १
बालेनापि स्वमातुरकुशलमालाया कथित समस्तोऽपि
यो योगशक्तिपुरःसर सुखसम्पादनसामर्थ्यलक्षण स्वशनव्यतिकर'।
अकुशलमालोवाच । जात सूचितमिदमादावेव मया' यन्न
सुन्दरमनेनानेन वरमित्रेण साद्धं भवन्ध' हेतु सुखपरम्पराया' वि
चास्ति ममापीदृशी योगशक्तिरिति' दर्शयिष्याम्यहमपि जातस्य
कुतूहल' बालस्तूवाच' यद्येव ततो बहुतरमम्बाया २
भिरद्यापि द्रष्टव्यम् । अकुशलमालोवाच तत्कथनीय भवता यत्र
प्रयुज्यते योगशक्तिरिति ।

इतश्च मनीषिणापि स्वमातु शुभसुन्दर्या निवेदित सर्वोऽपि स्पर्शनवृत्तान्त । तयाभिहित 'वत्स न चारुमनेनानेन पापमित्रेण सह संसर्ग' कारणमेष दुःखपद्धत्ते' मनीषिणाभिहित 'सत्यमेतत' केवल न कर्त्तव्यमत्र भयमम्बया' सूचितो मयाय स्वरूपेण' नाहमस्य यत्नवतोऽपि वञ्चनागोचर' केवलमस्य परित्यागकाल प्रतिपाल यामि । यत प्रतिपन्नोऽय मया मित्रतया' नाकाण्ड एव हातु युक्त । शुभसुन्दर्युवाच जात सुन्दरमिदमनुष्ठित भवता अहो ते लोकज्ञता' अहो प्रतिपन्नवात्सल्य' अहो नीतिपरता' अहो गभीरता अहो स्थैर्यातिरेक ।

तथा हि ।

साकाङ्क्षा एव मुञ्चन्ति सदोषमपि सत्तमाः ।
प्रतिपन्नं गृहस्थायी तथोदाहरणं जिनः ॥
प्रतिपन्नमकाले तु सदोषमपि यस्त्यजेत् ।
न शिष्टैः श्लाघ्यते मध्ये तथासौ स्वार्थसाधकः ॥
यस्तु मूढतया काले प्राप्तेऽपि न परित्यजेत् ।
सदोषं लभते तस्मात् स वधं नाथ सत्यतः ॥
हेयबुद्ध्या गृहीतेऽपि ततो वस्तुनि बुद्धिमान् ।
तत्त्यागावसरापेक्षी सम्मतो लब्धुमर्हति ॥

कर्मविलासराजस्तु महादेवीभ्यां सकाशात्तत् कुमारव्यतिकरमाकर्ण्य परितुष्टो मनीषिणः, रुष्टो बालस्य चित्तमध्ये, बालेनापि ततःप्रभृति गाढतरं कोमलशयनसुरतासेवनानि स्पर्शनप्रियाणि दिवानिशमाचरता परित्यक्तो राजकुमारोचितः सेवाव्यापारः, परिहृतं गुरुदेवपादवन्दनं, विमुक्तः कलाग्रहः, शिथिलीकृता लज्जा, अङ्गीकृतः पशुधर्मः, ततोऽसौ न गणयति लोकवचनीयतां न रक्षति कुलकलङ्कं, न जानीते स्वस्योपहास्यतां नापेक्षते कुशलवचनं न गृह्णाति सदुपदेशान्, केवलं यत्र क्वचित् नारीमङ्गमन्यद्वा किञ्चित्कोमलमुपलभते, तत्र तथाविधाय तत्स्पर्शलौल्यातिरेकेण प्रवर्तत एव । ततो मनीषी सञ्जातकरुणः शिक्षयति स्पर्शनस्य मूलशुद्धिमाचष्टे, वञ्चकोऽयमिति दीपयति, भ्रातर्मा विश्वसनीयः परमरिपुरेष स्पर्शन इति च वारं पुनः पुनश्चोदयति। बालः प्राह मनीषिन्नलमनेनादृष्टार्थेन प्रलापेन, य एष मे वरवयस्योऽनन्यसाधारणसुखसागरावगाहने हेतुः स एव ते परमरिपुरिति

मधुरे शरीरे विहितो मध्यमबुद्धि'प्रहता कोमलकण्ठाछ्या'उप
भुक्तानि ललितरूपमधुरतादीनि' प्रजातचित्ताल्हाद' मौक्तिको
मध्यमबुद्धि'प्रकटीभूत स्मरम ' एष स्वपयासमापत्यमनुष्यह्री-
मोऽत्र भवतीति निवेदित करभकेन मध्यमबुद्धिना । तत पापी
भृत्योऽयमपि न दूरपापी वञ्चक इति विचिन्तित स्पर्शनेन; मनी-
षिणा चिन्तित ' यमीकिंकपापोऽयमपि मध्यमबुद्धिरनेन पापेन
स्पर्शनेनातो वञ्चयेदत्र स्थाति तत शिष्यचाज्येन माभूदस्य मुग्धतया
वराकस्य वञ्चनमिति । ततो रहसि मध्यमबुद्धिरभिहितो मनी-
षिणा । भद्र न भद्रकोऽयं स्पर्शनो' विषयाभिलाष,-प्रयुक्तोऽयं
लोकानां वञ्चक पर्यटति । मध्यमबुद्धिरुवाच कथ'तत कथिता
मनीषिणा बोधप्रभावोपलब्धा समस्तापि तस्य स्पर्शनस्य मूलशुद्धि ।
मध्यमबुद्धिना चिन्तित स्वानुभवसिद्धा मम तावदस्य स्पर्शनस्य
मदन्निधौ वत्सलता' कविन्दप्रभावना सुखहेतुता च'अयमपि च
मनीषी मातुलभावी तत आनीम किमत्र तत्त्व किं वा वयमेव
स्थिते क्षुम इति । अथवा किमनेन चिन्तितेन तावदम्बां पृच्छामि'
तदुपदिष्टमाचरिष्यामीति विचिन्त्य गत सामान्यरूपाया समीप'
कृत पादपतन'अभिनन्दितस्तया निविष्ट क्षितितले' निवेदितो
व्यतिकर' सामान्यरूपयोक्त वत्स तावत्त्वयाधुना स्पर्शनमनीषिणो-
र्द्वयोरपि वचनमनुवर्तयतोभयाविरोधेन मध्यस्थतयैव स्थातु युक्त'
कालान्तरे पुनर्य इत अशस्तर' पक्ष स्यात् स एवाश्रयणीय ।

तथा हि ।

मध्यापक्षविचित्तेन भिन्ने कार्यद्वये सता ।

॥

कार्यं कालविलम्बोऽत्र दृष्टान्तो मिथुनद्वयम् ॥

मध्यमबुद्धिरुवाच । अम्ब किं तन्मिथुनद्वयं

पुत्राकर्णय । अस्ति तथाविधं नाम नगरं तत्र ऋजुर्नाम राजा प्रगुणा नाम महादेवी, तयोर्मकरध्वजाकारो मुग्धो नाम तनय तस्य च रतिसन्निभा अकुटिला नाम भार्या, ततस्तयोर्मुग्धाकुटिलयोरन्योन्यबद्धानुरागयोर्विषयसुखमनुभवतोर्व्रजति काल । अन्यदा वसन्तसमये उपरितनप्रासादभूमिकावासभवने व्यवस्थितं ... उत्थितो मुग्धकुमारो, मनोहरविविधविकसितकुसुमवनराजिराजि गृहोपवनमुपलभ्य, सजातक्रीडाभिलाषो भार्यामुवाच देवि अति रमणीयेयमुपवनश्री, तदुत्तिष्ठ, गच्छाव कुसुमोच्चयनिमित्तं याव एना, अकुटिलयाभिहितं, यदाज्ञापयत्यार्यपुत्र, ततो गृहीत मणिखचिते कनकसूर्पिके गतौ गृहोपवनं, प्रारब्ध

मुग्ध प्राह, देवि पश्यावस्तावत्क कनकसूर्पिकां झटिति पूरयति त्वमन्यस्यां दिशि अहमन्यस्यां व्रजामीति, अकुटिलयाभिहित एवं भवतु गतौ कुसुमोच्चयं कुर्वाणौ परस्परं दृष्टिपथातीतं गहनान्तरयो । अत्रान्तरे कथञ्चित्तं प्रदेशमायातं व्यन्तरदेव मिथुनक, कालज्ञो देवो विचक्षणा देवी, तेन च गगनतले वि रतावलोकितं तन्मानुषमिथुनं, ततोऽविस्मयतया कर्मपरिणतेरति सुन्दरतया तस्य मानुषमिथुनस्यापर्यालोचितकारितया भगवत मदनगमनतया मधुमासस्यातिरमणीयतया प्रदेशस्य, कैशिवहलतया व्यन्तरभावस्यातिचपलतयेन्द्रियाणां, दुर्निवारतया विषयाभिला षस्यातिपटुसञ्चारितया मनोवृत्तेस्तथाभवितव्यतया च तस्य वक्त

कालज्ञस्याभूदकुटिलायां लोभोऽनुरागस्तथैव च मुग्धस्योपरि विच-क्षणायाः । तत किमेनां वञ्चयामीति बुद्ध्या कालज्ञेनाभिहिता विचक्षणा । देवि अत्र समयतः तावद्यावदहमितो राजमन्दिरोपवना-देवार्चननिमित्तं कतिचित्कुसुमान्यादायागच्छामि । सा तु मुग्ध-वदयतया स्थिता मौनेन । गतोऽकुटिलाभिमुखं कालज्ञोऽवतीर्णो पत्तनगहने चादृश्मीभूतो विचक्षणायां चिन्तितमनेन अये किं पुन कारणमाक्षिप्तेदं मिथुनं परस्परतो दवीयोदेशवर्त्ति वर्त्तते । तत प्रयुक्तमनेन विभङ्गज्ञानं लक्षितं तयोर्दूरीभवनकारणं ततोऽयमेवा-त्रोपाय इति विचिन्त्य कृतमनेन देवसमाप्तमनो वैक्रियं मुग्धरूप-मिव स्थिता कनकसूपिका भृता कुसुमानां गतोऽकुटिलासमीपं ससम्भ्रममाह च जिताऽसि प्रिये जिताऽसि तत कथमार्यपुत्रो कुटिलयाऽऽयातो / जिताहमपि विलक्षीभूता मनागकुटिला काल-ज्ञेनाभिहितं प्रियेऽलं विषादेन स्वल्पमिदं कारणं केवलं निर्वर्त्तितो-ऽधुना कुसुमोच्चयो अनयावोऽस्मुभिरुपवनविभूषणे कदलीलतागृहे प्रतिपन्नमनया ततो गत्वा कृतमार्य्या तत्र पञ्चत्रयमनीयम् । इतश्च विचक्षणया चिन्तितं अये गतस्तावदेष कालज्ञस्ततो यावदद्य नागच्छति यावदेव नाति दूरे वर्त्तते तावदहमपि मानयाम्येनं रतिविपुलमकरकेतनाकारं तरुणं करोम्यात्मनो अस्मिन् वाञ्छा लक्षितवानयापि विभङ्गज्ञानेनैव तयोर्दूरीभवनहेतुस्ततो विधाया-कुटिलारूपं कुसुमभृतकनकसूपिका गता मुग्धसमीपम् । आह च जितोऽस्यार्यपुत्र जितोऽसि । तत ससम्भ्रमं तां निरीक्ष्य मुग्ध आह प्रिये सुष्ठु जितः किमधुना क्रियतां विचक्षणयोक्तं यदहं वदामि

मुग्ध आह किं ननु विचक्षणाय प्रजायते जताभरन' [illegible]
विशेषतः मद्रूपतामपि' प्रतिपन्नमनेन' ततो गता तौ
मुग्धौ तत्रैव कदलीलतागृहके दृष्टं तन्मिथुनं' निरीक्षितं
ताभ्यां परस्पराभिमुखं मिथुनाभ्यां' न दृष्टमिदमनुपविभागत्वा'
मितरयोऽविशेष' मुग्धेन चिन्तितम्। अये भगवतीनां प्रसादेन
प्रभावेन द्विगुणोऽहं संपन्नो' देवी च' तदिदं महाभ्युदयकारणं'
निवेदयामीति तावत् ततो निवेद्य स्वाभिप्रायमितरेषां गतः
कालज्ञसमीपम्। इत्यभिधायोत्थितो मुग्धः चलितं चतुष्टयं'
प्रविष्टं चानुराजास्थाने। तद्विलोक्य विस्मितो राजा सपरि
वारश्च किमेतदिति पृष्टो मुग्धः स आह ममैवानया
चानुरागेण तत्र कथितो मुग्धेन व्यतिकरः अधुना [illegible]
यतो मे धन्यता यतो मे [illegible] ततो चतिरेकेण तत्र
[illegible] दापितानि महादानानि' [illegible]
[illegible] राजा राजलोकसमक्षं [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

क्रोधः, चिन्तितमनेन मारयाम्येनं दुराचारं पुरुषम्। एषा पुनरमरतया न शक्यते मारयितुं, तथाप्येवं पीडयामि, यथा न पुनः परपुरुषगन्धमपि प्रार्थयते, एवं कृतनिश्चयस्याप्यस्य कालज्ञस्य, तथाभवितव्यतया, महत्त्वापर्यालोचना, स्फुरितं चित्ते, यथा न सम्यक् चिन्तितमिदं मया। न पीडनीया तावद्विचक्षणा, यतो- ऽसावपि न शुद्धाचारो, ममापि समानोऽयं दोषः, मारणमपि सुरस्य न युक्तं, यतो मारितेऽस्मिन्नन्यथाभावं विज्ञाय न भजते मामकुटिला, विरज्यते सुतरां विचक्षणा तत्किमकुटिलां गृहीत्वा- दृष्टस्वकलत्रधर्षण, इतोऽपक्रमामि, एतदपि नास्ति, यतोऽकाण्डप्रस्था- नेन स्वाभाविकोऽयमिति कल्पितविकारा, कदाचिदकुटिला मां न भजते, तथा रक्षितस्य पुनर्गमनमनर्थकमेव, तस्माद्दोषाधमं परि- त्यज्य, कालविलम्ब एवात्र श्रेयानिति। विचक्षणयापि चिन्तितं मयैव एवात्र मदीयभर्ता कामशोऽनेन रूपेण स्थितः, कुतोऽन्य- स्यात्र सम्भव इति ततः कथमस्य पुरतः परपुरुषेण सह तिष्ठामीति समागतलज्जा। अथमन्यो भजतु इति मनुष्यमेत्याद् शङ्कमेव स्थिते स्थातुमित्याविर्भूतकुम्भावागतायाः अपि न काचिदर्थसिद्धिरिति ध्यानेनात्मानं तोषयन्ती न चान्या गतिरस्तीति निरालम्बा चापि यद्भविष्यत्तया कालविलम्बमेवाश्रित्य तथैव स्थिता। ततश्च तद्भित- वैक्रियौ परित्यक्तेर्ष्याधर्मौ देवमायया, समस्तामानुपक्तन्यायान्याचरन्तौ, प्रत्येक इव भजमानौ स्थितौ विचक्षणाकालज्ञौ प्रभूतकालम्। अन्यदा माहविलयाभिधाने कानने चानिप्रयक्षानादिरत्नाकरो बहुशिष्यपरिकरः समागतः प्रतिबोधको नामाचार्यः। निवेदितो

[illegible] तत [illegible]
[illegible] [illegible]
[illegible] भगवा[illegible] [illegible]
[illegible]
[illegible] भगवता [illegible]
[illegible] । [illegible]
[illegible] भगवता [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] । [illegible]
[illegible]
[illegible] भगवन [illegible]
[illegible]
[illegible]
[illegible] । [illegible]
[illegible]
[illegible]
[illegible]
[illegible]

तत्र किं वा निवेद्यते दिव्यज्ञानस्य प्रत्यक्षमेवेदं समस्तं भगवतः । भगवानाह । भद्रौ न कर्तव्यो युवाभ्यां विषादो न भद्रयोर्दोषोऽयं किमत्र भवतोः स्वरूपं तावाहतुः । कस्य पुनर्दोषोऽयं भगवानाह येन युवच्छरीरान्निर्गत्य दूरे स्थिता भार्या तस्याः । तावाहतुः भगवन् किंनामिकेयं भगवताभिहितं भद्रौ भोगतृष्णेयमभिधीयते विचक्षणाकालज्ञाभ्यामभिहितं भगवन् कथं पुनरियमेवंविधदोषहेतुः भगवताभिहितं भद्रौ श्रूयताम् ।

रजनीव तमिस्रस्य भोगतृष्णैव सर्वदा ।
रागादिदोषवृन्दस्य सर्वस्यैषा प्रवर्त्तिका ॥
येषामेषा भवेद्देहे प्राणिनां पापचेष्टिता ।
तेषामकार्येषु मतिः प्रसभं संप्रवर्त्तते ॥
तृणकाष्ठैर्यथा वह्निर्जलपूरैर्यथोदधिः ।
तथा न तृप्यत्येषापि भोगैरासेवितैरपि ॥
यो मूढः शमयत्येनां किल शब्दादिभोगतः ।
जले निमीयिमीनाय स हस्तेन जिघृक्षति ॥
मोहादेनां प्रियां कृत्वा भोगतृष्णां नराधमाः ।
संसारसागरे घोरे पर्यटन्ति निरन्तके ॥
सदोषेयमिति ज्ञात्वा ये पुनः पुरुषोत्तमाः ।
स्वदेहगेहान्निःसार्य चित्तदारं निरुन्धते ॥
ते सर्वोपद्रवैर्मुक्ताः प्रक्षीणाशेषकल्मषाः ।
आत्मानं निर्मलीकृत्य प्रयान्ति परमं पदम् ॥
यदनया रहिताः सन्तो वन्द्या भुवनत्रये ।

वशे गता पुनर्यैरस्या साधुभिस्ते विगर्हिता ॥
अनुकूला भवन्त्यस्या ये मोहादधमा नरा ।
तेषामेषा प्रकृत्यैव दुःखसागरदायिका ॥
प्रतिकूला भवन्त्यस्या ये पुन पुरुषोत्तमा ।
तेषामेषा प्रकृत्यैव सुखसन्दोहकारिका ॥
तावन्मोच नरो देष्टि ममार बहु मन्यते ।
पापिष्ठभोगतृष्णेय यावच्चित्ते विवर्त्तते ॥
यदा पुनर्विलीयेत कथचित्पुण्यकर्मणाम् ।
एषो भवस्तदा सर्वो धूलिरूप प्रकाशते ॥
तावच्चाशुचिपुञ्जेषु योषिदङ्गेषु मूढधी ।
कुन्देन्दीवरचन्द्रादि कल्पना प्रतिपद्यते ॥
यावदेषा शरीरस्था वर्त्तते भोगतृष्णिका ।
तदभावे मनस्तेषु न स्वप्नेऽपि प्रवर्त्तते ॥
समाने पुरुषत्वे च परकिङ्करता गता ।
निन्द्य यत्कर्म कुर्वन्ति भोगतृष्णाच कारणम् ॥
येषा पुनरिय देहान्निर्गता सुमहात्मनाम् ।
निङ्गना अपि ते धीरा शक्रादेरपि नायका ॥
किश्चित्तामसमिश्रै राजसै परमाणुभि ।
निर्वर्त्तितशरीरेय गीता तन्त्रान्तरेष्वपि ॥
अदेषा भवतो पापा पापकर्मप्रवर्त्तिका ।
अतोऽस्या एव दोषोऽय विद्यते नैव भद्रयो ॥
स्वरूपेण सदा भद्रौ निर्मलौ परमार्थत ।

एवैव सर्वदोषाणां कारणत्वेन संस्थिता ॥

इह ध्यातुमशक्तिका एषा दूरस्थिताधुना ।

भवन्तौ मत्समीपाच्च निगच्छन्तौ प्रतीयते ॥

विचक्षणाकालज्ञाभ्यामभिहितं भगवन् कदा पुनरस्याः सकाशा-दावयोर्मोक्ष भगवानाह भद्रौ नैव भवेद्यावद् भवद्भ्यामियं सर्वथा त्यक्तुं न शक्या केवलमस्याः निर्गमने सदागमसुहृद्रायमाणं प्रादुर्भूत भवतोः सम्यग्दर्शनं तद्दृष्टोपनीय पुनः पुनः सुगृहीतनिकर्षेण मात्सर-णीयमस्याः भोगतृष्णाया अनुकूलं भवयितव्यो मनसि विवर्त्तमानो-ऽस्याः सम्बन्धी विकारः निराकरणीयोऽसौ प्रतिपक्षभावनया तत प्रतिक्षणं तनुतां गच्छन्ती न भविष्यतीय शरीरेऽपि वर्त्तमाना भवतोर्बाधिका भवान्तरे पुनरस्याः सर्वथा त्यागसमर्थौ भविष्यतो भवन्ताविति । तदाकर्ण्य ततो महाप्रसाद इति वदन्तौ विचक्षण-कालज्ञौ पतितौ भगवच्चरणयोः ततोऽस्तु व्यतिकरमालोक्य श्रुत्वा च भगवद्वचनं ऋजुमुग्धाकुटिलानामपि प्रादुर्भूतः पश्चात्ता-पेन सह विशुद्धाध्यवसायः ऋजुमुग्धाभ्यां चिन्तितमहो अलीक-सुतवधूद्विगुणतथामोहेन निरर्थकं विडम्बितं विधिता सुतवध्वो-द्रव्यासहृतिरोधाभ्यामिति । मुग्धेन चिन्तितं अहो कृतं मया परस्त्रीगमनेन कुलस्य दूषणं अकुटिलया चिन्तितं हत मजात शील-खण्डनमिति । ततश्चतुर्णामपि छिन्नमेतच्चित्ते । यदुत निर्वेदस्य तद्व्यवस्थितमेवेदं भगवता एतत् एवास्य दुश्चरितस्य प्रतिविधानमुप दिष्टमिति । अत्रान्तरे चतुर्णामपि शरीरेभ्यो निर्गतं परमाणुभि घटितशरीरं शुक्लवर्णं परिगत तेजसाऽह्लादकं लोचनानां मीष

चेतसामुपलभ्यमान मया रचितानि मया रचितानि यूयमिति मुखाग्रमेक डिम्भरूप मद्दय भगवन्मुखमोच्यमाण स्थित ' तावत्तदनुमार्गेणैव ' कृष्ण वर्णेन ' बीभत्समाकारेण ' तथैव निर्गत द्वितीय डिम्भरूप ' तस्माच्च तदाकाररूपधरमेव तर प्रवृत्त्या ' भजातमन्यदपि तृतीय डिम्भरूप ' तच्च वर्द्धितुमारब्ध तत शुक्लडिम्भरूपेण मस्तके हस्ततलप्रहार दत्त्वा तद्वर्द्धमान निजां प्रकृत्या धारित ' निर्गते च भगवदनुग्रहात् द्वे अपि ते कृष्णे डिम्भरूपे ' ततो भगवताभिहित भो भद्राणि यद्भवद्भिश्चिन्तित ' कृतमस्माभिर्विपरीताचरणमिति ' न तत्र भवद्भिर्विषादो विध यतो न भवतामेष दोषो ' निर्मलानि यूय स्वरूपेण ' तैरभिहित भगवन् कस्य पुनरेष दोषो ' भगवानाह यदिद शुक्लानन्तर च्छरीरेभ्यो निर्गत कृष्णवर्ण डिम्भरूपमस्यैष दोष ' तान्याहु ' किनामकमिद ' भगवतोक्तमज्ञानमिदमुच्यते ' तैरुक्त ' भगवन् यदि मेतस्मादज्ञानात्समुद्भूत द्वितीय कृष्णडिम्भरूपमनेन च शुक्लरूपमास्फोट्य वर्द्धमान धारितमेतत्किनामक ' भगवानाह पापमि तान्याहुरस्य शुक्लडिम्भरूपस्य तर्हि किमभिधान ' भगवतोक्त ' वमिदमभिधीयते ' ततस्तान्याहु ' भगवन् कीदृशमिदमज्ञान ' कथ चे पापमेतस्माज्जात ' किमिति चानेनाज्ञानेनेद विवर्द्धमान धारितमि सर्वं विस्तरेण श्रोतुमिच्छामो ' भगवानाह यद्येव तत समाकर्णयत यूयम् ।

यस्मादिदमज्ञान युष्मद्देहादिनिर्गतम् ।
एतदेव समस्तस्य दोषवृन्दस्य कारणम् ॥

अनेन वर्त्तमानेन शरीरे जन्तवो यत ।
कार्याकार्यं न जानन्ति गम्यागम्यं च तत्त्वतः ॥
भक्ष्याभक्ष्यं न बुध्यन्ते पेयापेयं च सर्वथा ।
अन्धा इव कुमार्गेण प्रवर्त्तन्ते ततः परम् ॥
ततो निबोध घोराणि कर्माण्युत्तमसन्तता ।
भवमार्गे निरन्तेऽत्र पर्यटन्ति सुदुःखिताः ॥
अज्ञानमेव सर्वेषां रागादीनां प्रवर्त्तकम् ।
स्वकार्ये भोगतृष्णापि यतोऽज्ञानमपेक्षते ॥
अज्ञानविरहेणैव भोगतृष्णा निवर्त्तते ।
कथञ्चित्सम्प्रवृत्तापि झटित्येव निवर्त्तते ॥
सर्वज्ञः सर्वदर्शी च निर्मलोऽयं स्वरूपतः ।
अज्ञानमलिनो ह्यात्मा पाषाणाच्च विशिष्यते ॥
याः काश्चिदेव मर्त्त्येषु निर्वाणे च विभूतयः ।
अज्ञानेनैव ताः सर्वा हताः सन्मार्गरोधिना ॥
अज्ञानं नरको घोरस्तमोरूपतया मतम् ।
अज्ञानमेव दारिद्र्यमज्ञानं परमो रिपुः ॥
अज्ञानं रोगसङ्घातो जराप्यज्ञानमुच्यते।
अज्ञानं विपदः सर्वा अज्ञानं मरणं मतम् ॥
अज्ञानविरहेणैव घोरसंसारसागरः ।
अथापि वसतां पुंसां बाधकः प्रतिभासते ॥
याः काश्चिदनवस्था दुर्वादोऽज्ञागमसन्ततयः ।
पायमत्र किञ्चिदज्ञानं तत्र कारणम् ॥

त एव हि प्रवर्त्तन्ते पापकर्मसु जन्तव ।
प्रकाशाच्छादकं येषामेतच्चेतसि वर्त्तते ॥
येषां पुनरिदं चित्तादज्ञानं विनिवर्त्तते ।
शुभ्रीभूतान्तरात्मानस्ते सदाचारवर्त्तिन ॥
वन्द्यास्त्रिभुवनस्यापि भूत्वा भावितमानसा ।
अशेषकल्मषोन्मुक्ता गच्छन्ति परमं पदम् ॥
एतच्चाज्ञानमत्रार्थे सर्वेषां भवतां समम् ।
सञ्जातं तेन दोषोऽयमस्यैव न भवादृशाम् ॥
डिम्भरूपमनेनैव द्वितीयं पापनामकम् ।
भवच्च जन्यते तस्मादचापि जनितं किल ॥
एतद्धि सर्वदुःखानां कारणं वर्णितं बुधै ।
उद्वेगसागरे घोरे हठादेतत्प्रवर्त्तकम् ॥
मूलं सङ्क्लेशजालस्य पापमेतदुदाहृतम् ।
न कर्त्तव्यमत प्राज्ञै सर्वं यत्पापकारणम् ॥
हिंसानृतादय पञ्च तत्त्वाश्रद्धानमेव च ।
क्रोधादयश्च चत्वार इति पापस्य हेतव ॥
वर्जनीया प्रयत्नेन तस्मादेते मनीषिणा ।
ततो न जायते पापं तस्मान्नो दुःखसम्भव ॥
युष्माकं पुनरज्ञानाज्जातं पापमिदं यत ।
अज्ञानमेव सर्वेषां हिंसादीनां प्रवर्त्तकम् ॥
वर्द्धमानमिदं पापमाजवेन निवारितम् ।
यदत्र कारणं सम्यक् कथ्यमानं निबोधत ॥

आर्जवं हि स्वरूपेण शुद्धाशयकरं परम्।
बहुमानमतः पापं वारयत्येव देहिनाम्॥
एतत्राजत्रमत्यर्थं सर्वेषां वर्तते समम्।
अज्ञानजनितं पापं युष्माकममुना जितम्॥
रचितानि मया पूर्वमत एव मुहुर्मुहुः।
सदयमेतदाविष्टे त्रिभद्रप जितानमम्॥
धन्यानामार्जवं येषामेतच्चेतसि वर्तते।
अज्ञानादाचरन्तोऽपि पापं ते स्वल्पपापकाः॥
यदा पुनर्विजानन्ति ते शुद्धं मार्गमञ्जसा।
तदा विधूय कर्माणि चेष्टन्ते मोक्षवर्त्मनि॥
आजीवं ततो धन्यास्ते शुद्धीभूतमानसाः।
निर्मलाचारविस्तारा पारं गच्छन्ति संसृतेः॥
तदेवंविधभावानां भद्राणां बुध्यतेऽधुना।
अज्ञानपापे निर्धूय सम्यग्धर्मनिषेवणम्॥
उपादेयो हि संसारे धर्म एव बुधैः सदा।
विशुद्धो मुक्तये सर्वे यतोऽन्यद् दुःखकारणम्॥
अनित्यः प्रियसंयोग इहेर्ष्याशोकवत्सलः।
अनित्यं यौवनं चापि कुत्सिताचरणास्पदम्॥
अनित्याः सम्पदस्तीव्रक्लेशवर्गसमुद्भवाः।
अनित्यं जीवितं चेह सर्वभावनिबन्धनम्॥
पुनर्जन्म पुनर्मृत्युर्हीनादिस्थानसंश्रयः।
पुनः पुनश्च यदतः सर्वमथ न विद्यते॥

प्रकृत्या सुन्दरं स्थैव संसारे सर्वमेव यत् ।
अतोऽत्र वद किं युक्ता काचिदास्था विवेकिनाम् ॥
मुक्त्वा धर्मं जगद्वन्द्यमकलङ्कं सनातनम् ।
परार्थसाधकं धीरैः सेवितं शीलशालिभिः ॥
ततो भागवतं वाक्यं श्रुत्वेदममृतोपमम् ।
संसारवासात्ते सर्वे स्वं स्वं चित्तं निवर्त्तितम् ॥
राजाह क्रियते सर्वं यदादिष्टं महात्मना ।
प्रगुणाह महाराज किमद्यापि विलम्ब्यते ॥
चारु चारूदितं तात सम्यगम्ब प्रजल्पितम् ।
युक्तमेतदनुष्ठानं मुग्धेनैव प्रभाषितम् ॥
हर्षोत्फुल्लसरोजाक्षी तथापि गुरुलज्जया ।
तदुक्तं बहु मन्वाना वधूर्मौनेन संस्थिता ॥

ततः पतितानि चलायपि भगवच्चरणयोः । श्वशुराजेनोक्तं
सम्पादयामो यदादिष्टं भगवता । भगवानाह 'उचितमिदं भवादृशां
भव्यानां' ततः पृष्टो भगवाननेन समस्तदिनं राज्ञा 'भगवतोऽस्ति' सर्वं
शुद्धमिति' ततस्तत्क्षणेनैव नरेन्द्रेण दापितानि महादानानि कारि
तानि देवपूजनानि' स्थापितं शुभाचाराभिधानं स्वतनयौ राज्ये
राज्ये जनितो नागरिकजनानां चित्तानन्द इति ।

ततो निर्ग्रन्थं कर्त्तव्यं समस्याकरणोचितम् ।
गृहस्थापितसद्भावं दीक्षितं च चतुष्टयम् ॥
ततस्ते तस्यारूपे द्वे डिम्भे तूर्णं पलायिते ।
शुक्लरूपं पुनर्नीर्वा प्रविष्टं तनुं क्षणात् ॥

कालज्ञेन ततश्चित्ते सभार्येण विचिन्तितम् ।
अहो धन्यतामीषां सुलब्धं जन्मजीवितम् ।
एतैर्भागवती दीक्षा यै प्राप्ता पुण्यकर्मभि ॥
दुरन्तोऽप्यधुना मन्ये तैस्तीर्णोऽयं भवोदधि ।
चारित्रयानपात्रस्य पारोत्तारकारणात् ॥
वयं तु देवभावेन पापेनात्र वञ्चिता ।

अथ वा ।

मिथ्यात्वोद्गमन यस्मादस्माभिरपि साम्प्रतम् ।
दुर्लभं भवकोटीभि' प्राप्तं सम्यक्त्वमुत्तमम् ॥
ततोऽस्ति धन्यता काचिदस्माकमपि सर्वथा ।
नरो दारिद्र्यभाङ् नैव लभते रत्नपुञ्जकम् ॥
तत सहर्षौ तौ सूरे' प्रणम्य चरणद्वयम् ।
तेनानुशिष्टौ स्वस्थानं सम्प्राप्तौ देवदम्पती ॥
प्रविष्टा भोगतृष्णापि शरीरे गच्छतोस्तयो ।
शुद्धसम्यक्त्वमाहात्म्यात् केवलं सा न बाधिका ॥
विचक्षणाह कालज्ञमन्यदा रहसि स्थिता ।
आर्यपुत्र यदा दृष्टा मयाहं हतचक्षुषा ॥
तदा किं चिन्तितं सोऽपि स्वाभिप्रायं न्यवेदयत् ।
विचक्षणाह सत्यस्त्वं कालज्ञ इति गीयसे ॥
तेनापि पृष्टा सोवाच यथालोच तदाननम् ।
कालज्ञ प्राह सत्यैव त्वमप्यत्र विचक्षणा ॥
यत कालविलम्बेन क्रियमाणेन शुभे ।

भोगा भुक्ताः स्थिता प्रीतिर्जातं नाकाण्डविड्वरम् ॥
प्राप्तो धर्मो नृपादीनामुपकारः कृतो महान् ।
ततः कालविलम्बोऽयं फलितोऽत्यर्थमावयोः ॥
विचक्षणाह कोवात्र सन्देहो नाथ वस्तुनि ।
किं वा न जायते चारु पर्यालोचितकारिणाम् ॥
ततः प्रीतिसमायुक्तौ सञ्जातौ देवदम्पती ।
मद्धर्मलाभादात्मानं मन्यमानौ कृतार्थकम् ॥
इदं पुत्र मया तुभ्यं कथितं मिथुनद्वयम् ।
मद्विधेऽर्थे विलम्बेन कालस्य गुणभाजनम् ॥

ततश्च ।

मद्विधेऽर्थे विधातव्या भवता कालयापना ।
पश्चाद् बहुगुणं यत्तु तदेवाङ्गीकरिष्यते ॥

मध्यमबुद्धिराह यथाज्ञापयत्यम्बा ।

ततो मनीषिणो वाक्यं स्मरतो नास्य जायते ।
प्रीतिबन्धो दृढं तत्र स्पर्शने भाववैरिणि ॥
बालालापे पुनस्तत्र स्नेहबुद्धिः प्रवर्तते ।
दोलायमानोऽसौ चित्ते कुरुते कालयापनाम् ॥
इतश्च तेन बालेन सा भोक्ता जननी निशा ।
भ्रम सद्म्यात्मीय योगशक्तिबलं मम ॥
तयोक्तं दर्शयाम्येषा पुत्र स सम्मुखो भव ।
ततः सा ध्यानमापूर्य प्रविष्टा तच्छरीरके ॥
यथाकुशलमालार्या प्रवेशमकार पुनः ।

स बाल ध्यानेनापि गाढं सर्वादिचिह्नित ॥
मम शरीरे तौ नित्यं वर्तमानौ क्षणे क्षणे ।
अभिलाषं हृदयस्थौ कुरुतस्तौ मवेदनाम् ॥
परित्यक्तान्यकर्तव्यसाधकाचपरायण ।
स बाल सुरतादीनि दिवा रात्रौ च सेवते ॥
कुविन्दशीलमातङ्गजातीयास्वपि तदय ।
अतिलौल्येन मूढात्मा ललनासु प्रवर्तते ॥
ततोऽकर्तव्यनिरतं धर्मकार्यपराङ्मुखम् ।
तं बाल सकलो लोकः पापिष्ठ इति निन्दति ॥
यशोऽस्य गतलज्जोऽयं निभाग्य कुलदूषण ।
स एव निन्द्यमानोऽपि मन्यते निजचेतसि ॥
स्पर्शनाख्यप्रसादेन ममास्ति सुखसागर ।
लोको वदतु तद्वक्तु किमेतज्जल्पचिन्तया ॥
यथाकुशलमात्रापि निगत्य परिपृच्छति ।
कीदृशी मामकी जाता योगशक्तिविभाति ते ॥
स माहानुग्रहीतोऽस्मि निर्विकल्पोऽहमनया ।
सुखसागरमध्येऽत्र ययाहं सम्प्रवेशित ॥
अन्यच्चास्य तया नित्यं मदनुग्रहकाम्यया ।
न मामश्च शरीर मे यावज्जीव स्वतेजसा ॥
यथाकुशलमालाप यत्नुभ्य वत्स रोचते ।
तदेव सतत कार्य मया सुखान्वेषया ॥
स्वाधीनां तां निरीक्ष्यैव बालेन परिचिन्तितम् ।

स्पर्शनोऽपि ममायत्तः मामयो मत्प्रमाधिकः ॥
अहो मे धन्यता लोके मास्यतो यत मादृश ।
ततोऽसौ गाढहृष्टात्मा स्वानुरूपं विचेष्टते ॥
अथ निन्दापरे लोके घेहविक्लवमानस ।
लोकापवादभीरुत्वान्मध्यबुद्धि प्रभाषते ॥
यार्ल्लेन युज्यते कर्त्तुं तत्र लोकविरुद्धकम् ।
अगम्यागमन निन्द्य सपाप कुलदूषणम् ॥
स प्राह विप्रलब्धोऽसि नून मित्र मनीषिणा ।
स्वर्गं वित्रत्तमान मां नेच्छसे कथमन्यथा ॥
ये मूढा जातिदोषेण कोमल ललनादिकम् ।
नेच्छन्ति ते महारत्न मुञ्चन्ति स्वामदोषत ॥
तदाकर्ण्य ततश्चित्ते हत मध्यमबुद्धिना ।
नैष प्रज्ञापनायोग्यो व्यर्थो मे वाक्परिश्रम ॥
एव च तिष्ठता तेषां बालमध्यमनीषिणाम् ।
अथान्यदा समायातो वसन्तो हतमन्मथ ॥
सजाता काननाभोगा सुमनोभरपूरिता ।
भ्रमद्भ्रमरझङ्कारतारगीतमनोहरा ॥
कामिनीहृदयानन्ददायक प्रियसन्निधौ ।
विजृम्भते वनान्तेषु काककोकिलकूजितम् ॥
प्रोत्फुल्लकिंशुकाघेषु पुष्पभारोऽतिरिक्तक ।
वियोगदलितस्त्रीणां पिशितप्रकरायते ॥
मञ्जर्यं सहकाराणामामोदितदिगन्तरा ।

यदा वसन्तारम्भेन धूलिक्रीडां प्रकुर्वते ॥
देवकिन्नरगन्धर्वमिथुनैः कथिता वने ।
क्रमेण माकन्दस्य तदासौ रमणीयता ॥
चर्चरी निर्भरीभूता यत्र दोला गृहे गृहे ।
मदनोद्दीपनमदः प्रवृत्तो मलयानिलः ॥
अथेदृशे वसन्तेऽसौ सह मध्यमबुद्धिना ।
क्रीडाय निर्गतो बालः कामकालप्रमोदितः ॥
अनन्या देववर्त्मिन्या सयुक्तः स्पर्धनेन च ।
गतो लीलाधरं नाम चोद्यानं नन्दनोपमम् ॥
तत्रास्ति मध्यभागे शुभ्रशृङ्गो महालयः ।
अमृतमयमानन्द प्रासादश्चन्द्रतोरणः ॥
कामिनीहृदयाह्लादकारको रतिवल्लभः ।
गर्भे प्रतिष्ठितस्तत्र देवो मकरकेतनः ॥
इतश्च तस्य देवस्य पूजासत्कारकारणम् ।
तिथिक्रमेण संजाता दिने तत्र त्रयोदशी ॥
कन्यकावरलाभाय वध्वाः सौभाग्यवृद्धये ।
दुर्भगायाः पतिप्रेममोहेन च भामिनी ॥
गोत्राख्याः कामिनोऽभीष्टयोषित्सम्बन्धवृद्धये ।
गृहीतार्चनिकाः कामपूजनार्थं समागताः ॥
ततो बालो महारोहं तथाकर्ण्य सविस्मयः । २
प्रविष्टः कामसद्म सह मध्यमबुद्धिना ॥
दृष्ट्वा च रतिनाथं प्रणतो भक्तिपूर्वकम् ।

उपायो देवरक्षायां पुरुषेण न भावितम् ॥
दृष्टश्च यावत् कोऽपीति नैव समागमम् ।
विज्ञात नेति यत्नेन हास्यो मध्यमबुद्धिना ॥
कलाभ्यासादपि भवेत् तु केवल धन एव च ।
आरुह्य रथ्यां तां दिव्यां रत्न बालविवेकिनम् ॥
ततश्च विज्ञानेषु रथ्यायां बहुमानय ।
रत्नदेवश्च पुत्रोऽपि सर्वाङ्गारिव पुन पुन ॥
अथो पुष्पगृहे स्थलपद्मसी धन्यता मम ।
विलक्षणमिति रथ्यायां कुष्माल वं तिष्ठति ॥
इत्थ नगरे तत्र नरेन्द्रो नृपोत्तम ।
अन्योऽप्यस्ति महातेजा प्रख्यात मधुमर्दन ॥
तस्यास्ति पद्मपत्राक्षी प्राणेभ्योऽपि सुवल्लभा ॥
प्रधानकुलसम्भूता देवी मदनकन्दली ।
पारिजातशिखा सा च परिवारेण संयुता ॥
आयाता तत्र भवने कामदेवस्य पूजिका ।
देवकोष्ठस्थित सा च पूज्य मकरध्वजम् ॥
महाविभवसम्पन्न प्रविष्टा तत्र पूजिका ।
प्रविष्टकोऽपुष्टचक्षुषो मां स्तौति कृतनिश्चय ॥
कक्षाभ्यन्तरान्निविष्टो बाल काष्ठमिव स्थित ।
ततो मन्दमकामे सा भवने मृगलोचना ॥
इत्यालापेन रथ्यायां देवमण्डपे किल ।
चन्दनेन च कुसुमैः रतिकामविलेपनम् ॥

पभोगमर्हतीति। ततश्चोत्थापितोऽनेन बालो। यावच्च किञ्चिज्जल्पति।
मध्यमबुद्धिराह। भद्र अकार्यमिदं न युक्तं देवशय्यायामधि
रोहणमित्यादि। तथापि न दत्तमुत्तरं बालेन। अत्रान्तरे प्रविष्टस्त-
द्देवकुलाधिष्ठायको व्यन्तरो। बद्धस्तेनाकाशमध्ये बालः। पतितो भूतले।
समुत्पादिताश्च सर्वाङ्गीणा तीव्रवेदना। तया सुभूपत्नमुपलभ्य ततो
मध्यमबुद्धिना हाहारवः। ततः किमेतदिति सम्भ्रमेण चलितो देव-
कुलाभिमुखं लोको। निवारितो व्यन्तरेण वामभवनाद् बहि-
र्बालो। महास्फोटेन क्षिप्तो भूतले भग्ननयनः कण्ठगतप्राणोऽसौ दृष्टो
लोकेन। तदनुमार्गेण दीनमनस्को निर्गतो मध्यमबुद्धिः। किमे-
तदिति पृष्टोऽसौ जनेन। लज्जया न किञ्चिज्जल्पितमनेन। ततोऽव-
तीर्य कस्मिंश्चित्पुरुषे व्यन्तरेण कथितो जनेभ्यस्तदीयव्यतिकरः। ततो
देवापथ्यकारीति पापिष्ठोऽयमिति धिक्कारितोऽसौ बालो मक-
रध्वजभक्तैः। कुलदूषणोऽयमपाकः विपन्नहरिव सपम इति गर्हितः
स्वजातीयैः। अनुभवतु पापकर्मणः फलमिदानीमित्याक्रोशितः
सामान्यलोकैः। किमपदेतदसमीक्षितकारिणां समस्तानर्थभाजनत्वात्
तेषामित्युपकर्णितो विवेकिलोकैः। ततोऽसौ व्यन्तरः प्रकटितरूप
अथाह। कुपनीयोऽयं दुरात्मा भवतां पुरतो मयाधुना बाल इति।
ततः हाहारवः प्रसीदतु प्रसीदतु भट्टारको ददातु भ्रातृप्राणभि-
क्षामिति ब्रुवाणः पतितो व्यन्तराधिष्ठितपुरुषपादयोर्मध्यमबुद्धिः।
तत्करुणापरीतचेतसा लोकेनाप्यभिहितो व्यन्तरो। यदुत भट्टारक
मुच्यतामेकवारं तावदेष न पुनः करिष्यतीति। ततो मध्यमबु-
द्धिकरुणया लोकोपरोधेन च मुक्तोऽसौ व्यन्तरेण बालो। लब्धा

चेतसा, मुत्कलीभूतं शरीरं, निःसारितस्तूर्णं देवकुलात् मध्यमबुद्धिना नीतं ऋक्षेण स्वभवनं, ज्ञातोऽयं व्यतिकरः परिकरात्कर्मविलासेन। चिन्तितमनेन, कियदेतदद्यापि मयि प्रतिकूले बालस्य भविष्यति तत्र लक्षयन्त्येते लोकाः, ततोऽभिहितः कर्मविलासः परिकरः, किमस्माकं दुर्विनीतचिन्तया, नोचितः सोऽनुमाने बोढव्यस्तदीयः केनापि व्यापारः, परिकरेणोक्तं यदाज्ञापयति देव इति। दृष्टोऽसौ मध्यमबुद्धिना बालः। भ्रातः किं चित्तेऽद्य शरीरकं बाधते, बालेनाभिहितं, न शरीरके केवलं मद्देः समान्तस्तापो, मध्यमबुद्धिराह, जानामि किंनिमित्तोऽयं, ततो बामशीलतया कामस्य बाल प्राह, न जानामि केवलं भवता तत्र सवासभवनेऽभिप्रविशन्तौ गच्छन्तौ वा किं विलोकितः कश्चिन्नरो न वा, मध्यमबुद्धिराह, विलोकिता, बालेनोक्तं, तर्हि लक्षिता कामाविति भवता, मध्यमबुद्धिराह, सुष्टु लक्षिता सा हि मधुमर्दनस्य राज्ञो भार्या मदनकन्दलीत्युच्यते, तदाकर्ण्य कथं मादृशामिति चिन्तया दीर्घदीर्घतरं निःश्वसितं बालेन, भ्रातरयमिति लक्षितो मध्यमबुद्धिना, चिन्तितमनेन, तथापि मन्ये तावद्व्यायमभिनिवेशो, लगयत्येव सा मदनकन्दली सुन्दरतरा प्रायेण स्त्रीगोचरमभिलषितं, यतो दारग्राहणप्रयेन मयाप्यतिवरं तया कामगृहभवनद्वारस्य निर्गच्छन्त्यास्तस्या मदनकन्दल्याः सर्वदिशाऽस्य स्पर्शः, न तादृशः प्रायेणान्यस्त्रीणां स्पर्शो भुवि विद्यते, दोलायितं ममापि तदभिमुखगोचरं मनस्तदानीमासीत्, किन्तु न युक्तं कुलजानां परस्त्रीगमनं, तत्साभिचारयाद्दिनमी

यदि निश्चितं मद्वचनेन' तत न याम्यत्याह' किमद्याप्यविद्या
नत ' किं न दृष्टमिदानीमेव फलमविनयस्य भवता' किमधुनैव
विस्मृत पत्कृष्टगतप्राण 'कथंचिन्मोचितस्त्वं मया दुर्विनयकुपितात्
भगवतो मकरध्वजात्' ततो निवलखाणाद्दुरध्यवसायात्' नयनविष
मार्गनिरारम्भशृङ्खिकल्पा हि सा मदनकन्दली' तां प्रार्थयतस्ते
तव भस्मीभाव एव न पुनः कार्यसिद्धिः' बालेन चिन्तित
म्बे लज्जिताऽहमनेन तत्किमधुनाभिप्रायगोपनेन' मतस्त्रैलोक्य
मेव तत किं ब्रूषे मोचितस्त्वं मया न पुनर्ब्रूषे यथा गाढतर
मारित इति' यतस्तेन कामेन पुष्पदवनेन मां सुहृता केवलं मे
गौरवदनामात्रमपधारित' हृदये पुनर्निक्षिप्तो वितर्कपरम्पराकृप
ज्वलितमदिराङ्गारराशिर्नि समेद दह्यते मन्मनाच्छरीर' यद्यह
कामबन्धनकाल एवाभविष्यं तेनाधन्त्रकनलपायमन्वभविष्यं ततो भवता
मोक्षयता प्रभूत महानर्थमनर्थ सम्पादित इति' नाधुना ममैनामसृत-
रूपायमाना मदनकन्दली विरहव्याख्यायाऽम्लापहोपशम कि-
उजनाव कल्पितेनेति । ततो लज्जितो मध्यमबुद्धिनाम्ना निवस्त्रको
नियन्त्र ' स्थितोऽसौ तूष्णीभावेन । अत्रान्तरे गताऽस्त सविता'
गालदद्र्यादिव समुज्झित तम पटल' लक्षित प्रथम प्रदोष' नि-
राहारीभूतो लोक' ततोऽविचार्य कार्याकार्य समुत्थितो बालो'
निगत स्वकीयभवनात्' अवतीर्णो राजमार्ग' प्रवृत्त कुसुमदनराजकु
लाभिमुख गन्तु' गत कियन्तमपि भूभागमितश्च घोषेवच्छेन किमत्र
पश्यत इति चिन्तया निगतस्तदनुमार्गेण मध्यमबुद्धि । दृष्टो बालेन
पृष्ठता कश्चित्पुरुष । तेन चाशोयबद्धोऽसौ मधुरवचन'

कूजित बालेन भ्रात भ्रात इति ब्रुवाण भ्रात इव मध्यमबुद्धे
तत समुत्पाट्य बाल पश्यत एव मध्यमबुद्धे समुत्पतित
तद्विमारटतश्च बालस्य त्वरितं वर्त्म प्रवृत्त पथि ग-
न्तु ततो मध्यमबुद्धिरपि अरे रे दुष्ट विद्याधर क्व
गृहीत्वा मदीयभ्रातरमिति ब्रुवाणो मुक्तपूत्कार
भूमौ तदनुमार्गेण निर्गतो नगरात् अदर्शनीभूत पुरुषो
ऽपि भ्रान्तो मध्यमबुद्धि । तथापि बालस्नेहानुबन्धेन क्व
यातीति विबुद्धा नासौ धावन्नुपरमति धावत एव
ततोऽनुपानत्कतया विद्धोऽनेककण्टककीलकै परिगत श्रमेण
बुभुक्षया पीडित पिपासया विह्वल शोकेन व्याप्तो
अनेकग्रामनगरेषु पृच्छन् वार्त्तां भ्रान्तोऽसौ मासद्वयेन
प्राप्त कुशस्थल नाम नगर स्थितस्तस्य बहिर्भागे दृष्टोऽनेन
कूप तत किं ममाधुना भ्रातृविकलेन जीवितेनेति
त्यजाम्यात्मानमिति सचिन्त्य बद्धा मध्यमबुद्धिना निजोत्तरीय
गलके शिला दृष्ट नन्दननाम्ना राजपुरुषेण ततो मा
मा साहसमिति ब्रुवाण प्राप्तोऽसौ तत्समीप धारित कूप
पतन् मुमूर्षुर्मध्यमबुद्धिरनेन विमोचित शिला
मो भद्र किमितीदमधमपुरुषोचितमारब्ध
तत कथितोऽनेन बालवियोगव्यतिकर । नन्दनेनाभिहित
यद्येवं ततो मा विषाद कार्षी भविष्यति भ्राता
मीलको मध्यमबुद्धिराह कथं नन्दनेनोक्तं समाकर्णय
नगरस्यास्य स्वामी हरिचन्द्रो नाम राजा

रुदमायरस्तारि म्भि प्रायनिर्वीणस्तद्वैर्कुण्ठितिमि । इमदासि निवेश्नेन विदाध्र परमिषम् । अन्यदा समागतेन राजपुत्र-सस्त्रेव इव तेन विदित द्वारि गुप्तस्य कूटविदो चतुर्भाग-सगोन परिभूतम इवमाभिहित अनुचरो मेऽतत कार्यमा पाणाविको पुरुषेऽलितो विभाटहपे विने गोत कवि त देवो दरिद्रम् वारितो विद्यामध्यगामोतो विनोप-दनो मम पुरुषेण इमा तस्य पुरुषस्य मांसहविरेण होमक्रिया प्रविशामि विदाया प्रदाक्षेणाशुक्रोऽसावधुना पुरुष स एव यस्य भाता भविष्यतीति मे विनक । स च ममैव समर्पितो युवा इवम । मध्यमपुत्रिराह भद्र यदेव ततो यदसि समीपरि या अवलम्बनमानय न यदि वैव पुरुष वैनाह मत्यभिज्ञा-मीति ततदेव करोमीत्यभिधाय गतो नन्दन समायात मुत्पाद्य दत्तोभा शाम दृष्टोऽभिलाष यदि च उवाचमपि पापोपल-प्रार्थनीविनो नियुक्तावनसरो मध्यमपुत्रिना वाल मत्यभिज्ञात स्त्रीय । अभिहितो नन्दन भद्र स एवाय मम भ्रातेति मत्य स्वमसि । अनुमतोनोऽत्र भवता । नन्दन माह । भद्र राजद्रो-हिद भवस्तवत्यया सत्यासमिनम् । अन्यथाधुना गतेन मया कथयितव्यं यथा किम्‌ राजौ राजा पुनरुपविष्यति रुधिरेण वर्षो भविष्यदनेन पुरुषेण प्रयाजनमिति तदिदमागम्य मम त्वरति तद्भवतु भवद्भ्यां तु तुष्यमनकमितश्च ततो यदासापयति द्वारपक्षीयस्य यतन भद्रपाम्यमभिधाय समुत्पाटितो बाल हत्वा गत्वा मध्यमपाद्र । ततो मयविधुरवरयो भ्रातरनिष

वेगेन क्वचित्प्रदेशे वाल पापयमुटक' समान्हादयन् वायुना शीत
यन्त्रशनादिरसेनागणयन्नात्मन शरीरपीडां' महता क्लेशजालेन प्र
स्वस्थान मध्यमबुद्धि । गतानि कतिचिद्दिनानि' जातो मनाक् स्वस्थ
स्थान' पृष्टो मध्यमबुद्धिना'भ्रात कि भवतानुभूत'स प्राह' इतस्त
दुत्क्षिप्तोऽह यद्धा भवत पश्यत एव गगनाचारिणा'नीत हताश
पुराकारमतिभीषणतयैक श्मशान'दृष्टस्तत्र प्रज्वलिताङ्गारभृताग्नि
कुण्डपार्श्ववर्त्ती मया पुरुष' ततस्तमप्रति तेनाम्बरचरेणाभिहि
महाराज सिद्ध ते समोहित'लब्धोऽय मया प्रस्तुतविद्यासिद्धेरनि
सलक्षण पुरुष । इतरेणोक्त'महाप्रसाद'ततोऽभिहितो नभश्चरे
स पुरुष'यदुतैकैकस्मिन् विद्याजापपर्यन्ते मया दत्ताङ्गुलि
भवता प्रक्षेप्तव्या प्रतिपन्नमनेन प्रारब्धो जाप । ततो विद्याधरेण
कृष्टा यमजिह्वेवातितीक्ष्णा भास्वराकारा शस्त्रिका'तया म
त्कर्त्तिता मदीयपृष्ठान्तेन दीर्घा मांसपेशी' निष्पीड्य तत
प्रदेशात् निर्गालित रुधिर भृतश्चुलुक । अत्रान्तरे समाप्तमितरस्य
विद्यापरावर्त्तन' समर्पिता विद्याधरेण सा रुधिरमांसमयी तस्य
कृति' प्रक्षिप्ता तेनाग्निकुण्डे। पुन प्रारब्धो जाप'ततश्चैव सोऽम्ब
चरो मदीय शरीर' परापरप्रदेशास्वरकपाल इव नारकस्यारि
मे मांसपेशीमुत्कर्त्तयति'त प्रदेश निष्पीड्य रुधिर निर्गालय
तस्य चुलुक भृत्वा साधकायाहुतये ददाति'स च विद्यापरावर्त्त
समाप्तौ गृहीत्वा हुताशने प्रक्षिपति। ततो वेदनाविह्वलो मूर्च्छ
पतितोऽह भूतले' विद्याधरस्तु मन्दमशरीरतया हृष्टो निष्करु
, गाढतर मां विकर्त्तयति । अत्रान्तरेऽहमाशैहमितिमिव प्रयमे

गुलगुलितमित्र समुद्रेण प्रचलितेव पृथिवी रक्षित दीप्तशिखाभि
शिवाभि प्रवृत्त च विकृतरूपैर्वेताले निपतित रुधिरवर्ष समन्त-
यैवंविधेषु रौद्रेषु विभीषिका—विशेषेषु सत्त्वस्थक्षुभितचित्तस्य
राज्ञोऽभिमुखीभूता सा क्रूरविद्या समाप्त जापस्याष्टशत तत
सिद्धाऽह भवत इति वदन्ती प्रकटीभूता विद्या प्रणता साधकस्य प्रविष्टा
तच्छरीरे तत समुत्कम्पितशरीर निष्पीडितरुधिरबीभत्स कह-
कमारटन्त मामुपलभ्य स राज्ञा मयि जातसदय हतोऽनेन दन्त-
शौल्कार ततो वारितोऽसौ विद्याधरेणाभिहित च तेन राजन्नेव
प्रसाध्या विद्याया वस्त्रो यदुत न कर्तव्यास्योपरि दया ततो
विद्याधरेण भिन्न मे केनचिदुपायेन शरीर ततोऽह समन्तादिन्द्रिय-
मान इव तीव्रवह्निना चूर्ण्यमान इव वज्रेण पीड्यमान इव यन्त्रेण
प्रविष्टो वेदनाप्रकर्ष तथापि सुबद्ध न गतमेतस्मे हतजीवित
सञ्जात मे क्षणेन तेन लेपेन दग्धदग्धप्राणकम्प शरीर समुत्पाटि-
तमाभ्या नीतमत्र नगरे खादितश्च क्षयभुक्तिनिमित्तमापभोग्य
हुन्य मे शरीर ततो भूयस्तेनैव विधिना मदीयमांस रुधिराद्य-
निमित्तेन राज्ञा दत्तमष्टशतमष्टशत विद्याया जापस्य समाद्रिका-
नीति इत्थ मद्वक्षोऽह भवता तदिद भालमयानुभूत छिन्न
मम हृदये यदुत न प्रायेण नरकेऽप्येवविधो दुःखविच्छेदो
दुःखो मयानुभूत इति। मध्यमबुद्धिराह हा भ्रातर्नोदितस्तमेव
बाधदुःखाना अहो निर्घृणता विद्याधरस्य अहो रौद्रता विद्याया।
अन्तरे लोकाचारमनुवर्तमानो वार्ताविवरणायमागतो मनीषी
तत द्वारि स्थितेन मया परिदेवमाना मध्यमबुद्धि प्रविष्टो

ऽत्रान्तरे कृतेतराभ्यामासनदानादिका प्रतिपत्तिः। निविष्टौ [illegible]
ततो मनीषिणाभिहितं मध्यमबुद्धे किमिति त्वं परिदेवसे। [illegible]
मबुद्धिराह भ्रातर्लौकिकमिदं परिदेवनकारणं मनीषिणोक्तं
ततः कथितो मध्यमबुद्धिना समस्तोऽप्युद्यानगमनादिविवादवृ-
त्तान्तपर्यन्तो बालव्यतिकरः। तत्र पूर्वमेव ज्ञातनिःशेषव्यतिकरेणा-
पि कुर्वतेव विस्मितेक्षणेन समस्तमाकर्ण्य मनीषिणाभिहि-
तम् किमीदृक् अपत्रं बालस्य वा न युक्तमिदं यदि वा किमत्र
मया प्रागेवाख्यं यथा न सुन्दरोऽनेन स्पर्शनेन पापमित्रेण सह
संबन्धः तज्जनितेयमपायपरंपरा।

तथा हि। हेतुरपायानामकार्यप्रवृत्तस्य अनायतकार्यप्रवृत्त्यै सर्वं
[illegible] प्राणिनः अक्लिष्टतया चित्तस्य सक्लिष्टतया पापोऽयथापाप
[illegible] एव अक्लिष्टपक्षप्रवृत्ता इव भवन्ति। चिरतमस्य पापे
[illegible] मरणं न च अस्य अनुपायतोऽपसिद्धिः। अनुपायप्रकार्यं [illegible]
[illegible] गुणभाजनो न हि क्रियमाणो पीडां धावति [illegible]
न [illegible] [illegible] [illegible] [illegible] तत [illegible]
[illegible] [illegible]। ततः कुतोऽकार्यप्रवृत्तात् गुणभाजन-
[illegible]। [illegible] इदं मया गुरुपरितोषितं बालस्य [illegible]
[illegible] न [illegible] किमत्र भवतः परिदेवितेनेति। बाल [illegible]
[illegible] [illegible] न च [illegible] [illegible]
[illegible] [illegible] [illegible]। [illegible]
[illegible]

मनीषिणा गृहीतो दक्षिणभुजाये मध्यमबुद्धिरुत्थाय ततः स्थानात् प्रवेशित कथान्तरे' अभिहितश्चासौ' भ्रातर्यदेव बाल सत्य बाल इव आत्मवञ्चित आसीत्' तत्कि भवताद्य दृष्टता विलम्बेन' स्थि-तम् । मध्यमबुद्धिराह बोधितोऽहमिदानीं भवता योऽय भ-वदुपदेशमपि लघयति तेनाल मम बालेनेति। अन्यच्चातिलज्जनीयो-ऽय व्यतिकर' तत्किमेव न ज्ञातवानेन' मनीषिणाभिहित न केवलेन नहि समस्तनगरेपितेन भद्र केन हि प्रभात पटहेनाख्या-पते । मध्यमबुद्धिराह । कथ ज्ञात' मनीषिणाभिहित काम देवभवनद्वारान्तावहद्भलोकप्रतीत एव कि तत्र ज्ञायते' विद्या-धरवृत्तान्तस्तु प्राप्त इति । तदीयवचनाकारवात् प्रवृद्धाशङ्का लोका क्षेविशाय नगरे प्रचारितो मध्यमबुद्धिना चिन्तित अये विज्ञात मात्र पुरोऽसु व्यतिकर गोपयामि यावता गाढतर प्रकाश प्रपञ्च' सुप्रच्छन्नमपि हि विहित प्रयत्नेन पाप प्रकाशत एव लोके विशेषत पाप' तथाद्दुर्बुद्धिरेषा प्राणिनां यया स्वाचरित पाप प्रच्छादयन्ति । इद हि केवलमधिकतर मोहविलसित सूचयतीत्येव विचिन्त्य' ततस्तेनाभिहित' मनीषिन्नस्तु वृत्तान्तस्तुप-लब्धो भवता किमाचरित कि तातेन' किमम्बाभ्यां कि वा नगर-लोकेनेति श्रोतुमिच्छामि' मनीषिणाभिहित भ्रात समाकर्णय तत तावदुपेक्षा निर्गुणेषु सत्त्वेष्विति भावनया भवन्त बाल प्रति माध्यस्थ्य तथा क्लिश्यमानेषु दयावन्त सन्त इति पर्यालोचनया प्रादुर्भूता ममोपरि महती करुणा तथा मुक्तोऽह पापमित्राभिष्वङ्गजनिता नामेवंविधानामपायानामित्याकलनया अज्ञातानामन्यासाद्बुद्धिगुणा-

धिकेषु प्रमोदवन्तो महात्मानः इति विमर्शेन धन्याः पुण्यभाग्भो भवजन्तु येनाय समस्तानर्थहेतुः स्पर्शनः पापवयस्यः स्वग निराकृत इत्यालोचयत 'मसुमभितस्त प्रति हृष। ततेन तु केन मट्टहासेन हसितं 'मयाभिहित तात किमेतत् 'ततेनाभिहि पुत्र यन्मयि प्रतिकूले सपद्यते तत्सपन्न बालस्यातो मे हृष। ए णात क गतोऽसीति परिदेवित सामान्यरूपया'न सञ्जातो मामः तनयस्यापाय इति हृष्टा चित्तेन मदीयजननी'नगरस्य तु सम्प बालहरणेन प्रमोद 'सञ्जाता त्वदीयगमनेन करुणा'प्रादुर्भूता म स्यावस्था न दर्शनेन ममोपरि पक्षपात। मध्यमबुद्धिराह कथमेतद दित भवता 'मनीषिणाभिहित 'निर्गतोऽहमासीत्तदा नगरे कुर हलेन भ्रमणिकया'तत श्रुता मया परस्पर जल्पन्तो लोक यदुताहो सुन्दर सपन्न यदसौ कलङ्कहेतुर्निजकुलस्य दुर्णीला दा येन वर्जितो मयादया'यद्दिभूत सदाचारात् निरत सततमगम्य मने'ष्वत एवापतापकरो नगरस्य बाल केनापि महात्मनापहृत इति। अन्येनाभिहित सुष्ठु सुन्दरमेव तु सुन्दरतर भवति यद्यं क्रियो भिया व्यापादितश्च श्रूयते' यतस्तस्मिन्नेकान्तत प्रमीने ए पाये नागरिकाणां गोत्रमरणं सपद्यते नान्यया। अन्येनाभिहि सुन्दरमिद केवल यदसौ मध्यमबुद्धिस्तपस्वी तस्य पृष्ठतो ल क्लिश्यते तत्र चाह'म हि विशिष्टमाय प्रतिभासतेऽस्माक त स्पर प्राह भद्र ये पापदृत्ताना वयस्या भवन्ति' तेषां कोदृशी विशिष्टता न खलु जात्याकनक श्यामिकया सह समागम' अत एव लभन्ते तद्वारेणैव दुःखपरम्पराम्। अपराह लोके'विम

बाह्यार्थे ये पुनरादित एव पापानुष्ठाना शुभजनसम्पर्कं रचयन्ति' तेषां नैव दोषोऽनुषज्यते' यथायं यथमेव मनीषी दृष्टान्त' योऽयं महात्मा परित्यक्तपापप्रवृत्तबालतापान्यो निष्कलङ्क सुखेन जीवतीति' ततश्च लोकवादमाकर्णयता मयेदं लक्षितमिति । मध्यमबुद्धिना चिन्तितमथ ।

दोषेषु वर्त्तमानस्य नरस्यैव जन्मनि ।
जायन्ते सुमहान्तोऽपि केवलं दुःखसङ्कुलि ॥
स हि दुःखभाराक्रान्तस्तावता नैव मुच्यते ।
आक्रोशदानतस्तस्य लोकोऽन्यैरिकायते ॥
एक स दुःखैनिदग्धा द्वितीय निन्दितो जनैः ।
गण्डस्योपरि सञ्जात स्फोटो बालस्य दृश्यते ॥
अनात्मा कल्याणस्थान जातोऽयं बालमीलकात् ।
कथितश्चादृश प्राय कैश्चित्तत्त्वविशारदैः ॥
दुःखाकरः सतां निन्द्या ममेदानीं विभासते ।
तस्मात् पुनः स्पर्शो बालेन सह पापिना ॥
गुणेषु वर्त्तमानस्य नरस्यात्रैव जन्मनि ।
जायन्ते सम्पदः सर्वा यथास्यैव मनीषिणः ॥
यथा ह्यकलङ्कः सुखी पापभीरुर्विपश्चिताम् ।
मानस्यपात्रमसङ्गभीरुत्वादेव मन्यते ॥
तथापि लोका दोषेषु सतत विहितादराः ।
गुणेषु शिथिलास्थाश्च यतन्ते पापकर्मणि ॥
तदेव गुणदोषाणां विशेष पश्यता मया

गुणेषु यत्नः कर्तव्यो य आदिष्टो मनीषिणा ॥
ततश्चैव विचिन्त्यासौ भाषते तं मनीषिणम् ।
न युक्तमधुना लोके प्रकाशमटितुं मया ॥
लोका मां प्रहसिष्यन्ति बालहताशममधमा ।
अतिलज्जाकरं तच्च नाहमाख्यातुमुत्सहे ॥
अन्यच्च दुर्जना लोकाः श्रुत्वा मेऽस्म कदर्थनाम् ।
तदीयां नितरां तुष्टा रमिष्यन्ति विशेषतः ॥
तस्माद्गृहगर्भमायैव यातु भवानि युज्यते ।
जनस्य विस्मरत्येतद्यावद्बालविचेष्टितम् ॥
मनीषिणोक्तं यत्तुभ्यं रोचते तद्विधीयताम् ।
केवलं पापमित्रोऽयं स्पर्शो वार्यते मया ॥

तत कथितवपि बहिरनिगच्छत एव भवने स्थितो ततो मनीषी स्वस्थानम्। इतश्च बालशरीराद्विनिर्गत [illegible] समाजा च। अनुमतमालयाभिहित साधु पुत्रक साधु [illegible] तदनुष्ठित भवता यतो [illegible] मनीषी। सम्पन्नेनाभिहितम्। अत्र पुत्रके [illegible] मनुष्यान् दर्शित मम्बरमानस्ता प्रियमित्र सहि [illegible] अथवा किमनेन निर्घटितेनेदानीं यथाकालमयस्मार्थ मन्त्रार्थ अद्य समुचिता। ते तु इत्यं साधनस्थानामप्यकार्ये विशा [illegible] न मनसि। बाल माव। पापमयेनैव मम [illegible] न मन्यसे। अस्मनामभिहितम्। किं मां तैन अनुवर्ती यत्कम्पेत। यर्द अनु आत्र केवल ते

वाल प्राप्त । कोऽत्र विकल्पो निःसन्दिग्धमिद तत कतमाभ्यां
योगविद्यापारगको भूपमदीयशरीरे प्रवेश प्रादुर्भूत मदनक-
न्दलीगोचर स्मरशौत्सुक्य महतोऽनामाय सहसा कुम्भिका
पतित प्रपनौधे तत्र वानरतनुदलमानेनाहेन तथा विचेष्टमानो
दृष्टोऽसौ मध्यमबुद्धिना समुत्पन्ना करुणा तथापि मनीषिवचनम्
नुस्मरता न दृष्टो वार्तामपि वालपेन। अथान्तरेऽस्त गतो दिन-
कर। तत प्रथमप्रदोष एव निगतो वाल । अथवीरितो मध्यम-
बुद्धिना मार्ग मधुमदनराजकुल प्रविष्टोऽभ्यन्तरे दृष्ट वासभवन
पलितसदृशिमुख तत प्रचुरतया लोकस्य सान्धकारतया प्रदोषस्य
प्रचलया प्रातारिकाणां कथञ्चिदलक्षित एवासौ प्रविष्टो वासभवन
विलोकितमध्यभाग प्रकाशितो मणिप्रदीपै समापो महाशयन-
स्य। एतस्य तस्मिन्नवसरे सा मदनकन्दली तत्रैव वासभवनस्था-
दूरवर्तिन्यां प्रसाधनशालिकायामात्मानं प्रसाधयन्ती तिष्ठति। ततस्त-
मनन्दसशलोक्य स वालो वालतयैवारूढ शय्यायाम्। सा कोमलेति
भावनया सम्भूतो इव चिरमुख्यौर्यकमारण किल तिरश्चीनो
भविष्यति । यावद्विविताशेषप्रदोषकर्तव्यो विसर्जिताश्यानिकलोक-
कतिपयदासपुरुषपरिकरो स्वमप्रदीपदर्शितमार्ग समागत मधुम-
दनस्तद्वारदेशे दृष्ट प्रविशन् वालेन ततोऽतितेजस्वितया मधुमद-
नस्य सत्त्वविकलतया हृदयस्य साध्वसहेतुत्वादकार्याचरणस्य प्रतिकू-
लतया कर्मविलासस्य स्रकचन्दनाभूषितपाकुसुममालाया स्वविपा-
कद्यमतया स्वामस्य भयोत्कर्षेण वपमानगात्रयष्टिर्निपतितो वालो
भूतले ततोऽन्युचतया पयङ्कस्य कठिनतया मणिकुट्टिमस्य शिथि-

मनिःस्पृष्टतया शरीरस्य समुत्थितो महानास्फोटरव ।
दिति तूर्णतर प्रविष्टो राजा दृष्टस्तेन कथमयमिव
इति समुत्पन्नो मनसि वितर्कः । दृष्टमुच्छ्रीषके शयन
शय्यारोहण दृष्टोऽयमिति सञ्जातो निश्चयो
ऽयमिति च समुत्पन्न क्रोधो विज्ञात तस्य दैन्य
सत्त्वयमपनयाम्यस्य दुर्विनयमिति बुद्धा दन्तो बालदृष्टे
राज्ञा आमोटित पश्चान्मुख भुजयुगल बद्धो ११
नेन आहूतो विभीषण अभिहितश्चासौ अरे एष
मालाभेर राजाजिरे यथाश्रमाकर्णयाम्यस्य कदुग्धमित
समस्तरजनी कदर्थनीयो विभीषणेनाभिहित यदाज्ञापयति देव
तत समानुष्ठितेन यथाचार्यमाणो बालो ।
बद्धो वज्रकण्टकाकुले लोहस्तम्भे चोटित कथापाने सिक्तोऽस्य
तैलबिन्दुभि प्रदर्शिता अङ्गुष्ठादिषु शलाका नतै
नरकाकारेषु दुःखेषु विभीषणेनोदीर्यमाणेषु क्रन्दतो
क्षपिता रजनी तदाक्रन्दरवेण यामपरम्परया च ।
कुट्टयन प्रभाते समागत राजकुले नगर दृष्टो बाल च
पातितः यापि गोत्रीयादि प्रवृत्त परस्पर नागराणां
विस्मयाक्रोशजल्प । तमाकर्ण्य प्रज्ञापतोऽभूत ततश्च
कथिता मार्गरक्षका विभीषणेन रात्रिव्यतिकर ततोऽसौ
दर्शित नाइतर प्रविष्टा सर्व विज्ञापिता मध्यमो राजा ।
ना उपादानामतसमधमाचारो न मया जितर्मी
न कर्तव्य । अर्थ च तस्य राज्ञा मनश्चक्र । ११

सुबुद्धिर्नामामात्य केवल तेन कस्मिंश्चिदवसरे वर प्रार्थितो राजा। यदहं छिद्रकर्मणि नाहं पर्यालोचनीयो। भवता प्रतिपन्नश्च स वरो नरपतिना तत सुबुद्धिं पर्यालोच्यैव दत्त प्रथुमदनेन राजपुरुषाणां नियमो यदयं कदर्थयिता सर्वप्रकारेण नगरापवाद व्यापादयतेति। तदाकर्ण्य महाराज्यलाभ इव जातो जनानां प्रमोदातिशय। तत समारोपितो रासभे विडम्ब्यमान शरावमालया समलङ्क्रियमाणो परिस्फुटिमवाकोशमवारं रोदयमाणा विरसध्वनिना। तुदमानो नभसि कर्णकटुकैराक्रोशवचनैर्महता कलकलेन समस्तेषु त्रिकचतुष्कचत्वरराजमार्गादिषु भ्राम्यमाणो विगोपितो राज। ततो विप्राकृतया नगरस्य प्रेक्षकप्रायत्नात्सद्य भ्रमणेनैवातिक्रान्ते दिन सन्ध्यायां नीतो वध्यस्थानं जमवितस्तत्प्रायायां प्रविष्टो नगर प्राकार भवितव्यताविशेषेण तस्य त्रुटित पाशक पतिता भूतले गतो मूर्च्छां स्थितो मृतकल्पतया लग्नो वायुना लब्धा चेतना प्रहृष्टो स्वदेशाभिमुख गन्तु भूमिकम्पनेन कुजमान। अत्रान्तरे अत्रहीतमहेतयोक हे महारिजीव तव क्षितिप्रतिष्ठितपुरे प्रथम भवता वीरयशोधानभुत कमविलासो नाम राजा निवद्गित। अधुना द्यूतापराधप्रभविष्णुरेव प्रथुमदना निवसति तत्कथमेतदिति। महारिजीवेनाभिहित सुधे यद्यपि मन्दिरद्गमेन सता दृष्ट एवेद विदुरस्ततो विदुरेणाभिहित कुमारकमविलासस्तथान्तरङ्गो राजा प्रथुमदनस्य बहिरङ्ग तेन नास्ति विरोध। यतो बहिरङ्गाणामेव राज्ञो द्यूतापराधप्रभविष्णुता भवति बहिरङ्गनगरेषु नेतरथा ि हि यथा सुन्दरासुन्दरप्रयोजनानि जनानां प्रच्छन्नरूपा एव सन्ति

कुल विदधत पुनर्भवतो ममोपकरण वर्त्तते तदेव चित्ते
गुकुलचारिणो बालस्य दर्शितो
कश्चिदात्मन प्रतिकूलताफलविशेष । अस्य तु मनीषि
प्रतिकूलवर्त्तिनो न मयाद्यापि निजानुकूलताफलविशेषो
यद्यपि यदिदमस्य स्पर्शने निरभिष्वङ्गतया
भवत सम्पद्यते सुखम् । यदाय मनुष्यचितो लोकमध्ये
न च मया कश्चिदपायगन्धोऽपि विपरीतमस्याय ममकर्म
कत्थाद्यमेव भवन्तेशोपकरणभूतया कारण तथापि मयि
नैतावन्मात्रमेवास्य फलमुचितम् । अतिप्रिये
भायमस्य मनीषिणो यत्र कुरुष्वेति । शुभसुन्दर्युवाच ।
साधु सुन्दरमभिहितं देवेन चित्त समापोदं इन्ये योग्य एव
देवपादानां तदेवानुतिष्ठामि यदाज्ञापित देवेनेत्यभिधाय कर्म
विना शुभसुन्दर्या योगशक्ति विहितसमाधान प्रविष्टा
मनीषिशरीरे प्रादुर्भूतोऽस्य प्रमोद ॥
ततश्चा निजविकल्पितोद्यानगमनेच्छा प्रस्थितश्चाभिमुख ।
ततन कदनेकाकी गच्छामि वरं कालो यथवितिष्ठ ।
मध्यमबुद्धिनीता नियतोऽधुना आकर्ण बालचालो
नस्य कथाकारणम् । ततस्तदपि निजविकल्पितोद्याने
निविष्ट तत्र मन्ये मध्यमबुद्धिप्रतीप निवेदित तर्च चित्त
कुलम् इत्यादि कर्मविपाकन तथापि जननी भावाच्छादा
कर्मविपाकमपत्य नैव संस्थापिता च बन्धुसन्मानाचार
सम्यक्त्वभावना चिरकालसक्तिनी बद्धपितो वर्तते ।

स्थितमूर्खमध्यमबुद्धेरपि प्रवृत्ता तत्र गमनेच्छा 'आगच्छ भवनायतनं गम्यतामिति वदता बलामोटिकया प्रवर्तितौ मध्यमबुद्धिना 'गता-स्तयोऽपि निजविलसितोद्याने ।

अथ नानाविधैस्तत्र विलसन्तौ कुतूहलैः ।
प्रमोदशेखरं नाम प्राप्तौ जिनमन्दिरम् ॥
तच्च मेरुवदुत्तुङ्गं विशालं साधुचित्तवत् ।
देवलोकाधिकं मन्ये सौन्दर्यादिगुणयोगतः ॥
युगादिनाथबिम्बेन श्रीमता तदधिष्ठितम् ।
समन्तादुद्दूरसोत्तुङ्गप्राकारपरिवेष्टितम् ॥
पुरतो बालकास्तत्र स्तोत्राणि पठतो मुदा ।
तत्र श्रावकलोकस्य ध्वनिमाकर्ण्य पेशलम् ॥
किमेतदिति संचिन्त्य कौतुकाक्षिप्तमानसौ ।
प्रविष्टौ जैनसदने तौ तथाऽपि कुमारकौ ॥
अथ दक्षिणसुस्निग्धा रत्नाकिरविभूषणः ।
विनीतसाधुलोकस्य मध्यवर्ती तपोधनः ॥
जिनेन्द्रवदनं धन्यमकलङ्कममलाननम् ।
कथारम्भागतोदारमाचक्षाण पुरैहिकाम् ॥
प्रविशुद्धिमहाभागधन्यवक्त्रावेष्टन ।
प्रबोधनरतिश्चैव सूरिस्तैर्विलोकितः ॥
भाविभद्रतया तेन विम्ब तथा मनोदितः ।
सूरिः शिष्यमुनीनां च विहित पादवन्दनम् ॥
ततस्तदनुरोधेन मनाक् मध्यमबुद्धिना ।

देवसाधुनमस्कारः कृतो मध्यमबुद्धिना ॥
पापमाद्यवयस्याभ्यामधिष्ठितशरीरकः ।
बालोऽकल्याणभाङ्नैव कस्यचित्प्रणतिं गतः ॥
किं तु शालेयकाकारं बिभ्राणः स्तब्धमानसः ।
मनीषिमध्यमासन्ने सोऽपि गत्वा व्यवस्थितः ॥
अथ सभाजितास्तेऽपि धर्मलाभपुरःसरम् ।
गुरुणा कलवाक्येन निषण्णाश्च भूतले ॥
इतश्च सूरिवृत्तान्तं कथञ्चिल्लोकवार्तया।
मन्त्रिणा जिनभक्तेन श्रुतस्तेन सुबुद्धिना ॥
ततः प्रोत्साहितस्तेन स राजा शत्रुमर्दनः ।
वन्दनाय मुनीन्द्रस्य प्रशाम इति भाषिणाम् ॥
विधूतपापमात्मानं वन्दनेन महात्मनाम् ।
साधूनां येऽत्र कुर्वन्ति ते धन्यास्ते मनीषिणः ॥
ततो मदनकन्दल्या साकूमत्तःपुरेस्तथा ।
सुबुद्धिवचनाद्राजा निर्गतो मुनिवन्दकः ॥
ततः सत्र पुरं तत्र नृपे चलति विस्मितम् ।
सैन्य च गतमुद्याने कौतुकाकृष्टमानसम् ॥
निपत्य पादयोस्तत्र शिरसा सवलो नृपः ।
प्रबोधनरतिं भक्त्या ववन्दे हृष्टमानसः ॥
प्रणम्याऽशेषसाधूंश्च दत्ताशीर्गुरुसाधुभिः ।
निषण्णो भूतले राजा विनयानतमस्तकः ॥
सुबुद्धिरपि भूपेन्द्रपादपद्मकृतानतिः ।

निरूपयति सर्वाणि देवकर्माणि यत्नत ॥
देवपूजनमङ्गलदीपदानादिपूर्वकम् ।
भक्त्योत्कण्ठितसर्वाङ्गो भूत्यमात्करजानुक ॥
दुर्लभ भवकान्तारे जन्तुभिर्जिनवन्दनम् ।
इति भावनया धन्यो निमग्नीभूतमानस ॥
आनन्दजलपूर्णाच क्षालयन्नात्मकिल्बिषम् ।
तथा भागवते बिम्बे न्यस्तदृष्टिर्विचक्षण ॥
प्रशस्तैव ग्रन्थैर्धीर पठित्वा भक्तिनिर्भर ।
पञ्चाङ्गप्रणिपातान्ते निषण्ण शुद्धभूतले ॥
परस्परनिरोभूतकरशाखाविनिर्मिताम् ।
कोशाकारकर हत्वा योगमुद्रां समाहित ॥
ततो भुवनमाथस्य स्तोत्राणि कलया गिरा ।
स तदानीं पठत्येव तदर्पितमानस ॥
नमस्ते जगदानन्द मोक्षमार्गविधायक ।
जिनेन्द्र विदिताशेष भावसद्भावनायक ॥
प्रक्षीणाशेषसंसारविस्तार परमेश्वर ।
नमस्ते वाच्यतातीत त्रिलोकनरशेखर ॥
भवाब्धिपतितानन्तसत्वसन्तारकारक ।
घोरसंसारकान्तारसार्थवाह नमोऽस्तु ते ॥
अनन्तपरमानन्दपूर्णधामव्यवस्थितम् ।
भवन्त भक्तित साक्षात्पश्यतीह नमो जिन ॥
स्तवतस्तावक बिम्बमन्यथा कथमीदृश ।

निरूपयति सर्वाणि देवस्याङ्गानि यत्नतः ॥
देवपूजनसद्धूपदीपदानादिपूर्वकम् ।
रोमोत्कण्टितसर्वाङ्गो भव्यप्राकारजानुक ॥
दुर्लभं भवकान्तारे जन्तुभिर्जिनवन्दनम् ।
इति भावनया धन्यो निश्चलीभूतमानस ॥
आनन्दजलपूर्णाक्ष आलयज्ञात्मकिविषयम् ।
तथा भगवते बिम्बे न्यस्तदृष्टिर्विचक्षण ॥
प्रशस्तः प्रसेधीर पठिता भक्तिनिर्भर ।
पञ्चाङ्गप्रणिपातान्ते निषण्ण शुद्धभूतले ॥
परस्परतिरोभूतकरशाखाविनिर्मिताम् ।
कोशाकारकरे कृत्वा योगमुद्रां समाश्रित ॥
ततो भुवननाथस्य स्तोत्राणि कलया गिरा ।
स तद्रागी पठत्येव तदर्पितमानस ॥
नमस्ते जगदानन्द मोक्षमार्गविधायक ।
जिनेन्द्र विदिताशेष भावसद्भावनायक ॥
प्रक्षीणाशेषसंसारविस्तार परमेश्वर ।
नमस्ते साध्यपारीण त्रिलोकपरमेश्वर ॥
भवाब्धिपतितानन्तसत्त्वसन्तारकारक ।
घोरसंसारकान्तारसार्थवाह नमोऽस्तु ते ॥
अनन्तपरमानन्दपूर्णधामव्यवस्थितम् ।
भवन्तं भक्तितः साक्षात्पश्यतीह जनो जिन ॥
स्तुतस्तावक बिम्बमन्यथा कथमीदृश ।

प्रमोदातिशयश्चित्ते जायते भुवनातिग ॥
पापाणुजनितस्तावत्ताप समारिषेतमाम् ।
यावत्तेषां सदानन्दमध्ये नाथ न वर्त्तसे ॥
येषां पुनर्विधत्ते सा नाथ चित्तेषु देहिनाम् ।
पापाणव क्षणात्तेषां ध्वंसमायान्ति सर्वथा ॥
सतस्ते द्राविताशेषपापपङ्कतया जना ।
सद्भावामृतसंसिक्ता मोदन्ते नाथ सर्वदा ॥
ते वराका न मुच्यन्ता रागादिचरटै कथम् ।
येषां नाथ भवान्नास्ति तत्सान्निध्यकारक' ॥
भवन्तमुररीकृत्य नाथ निःशङ्कमानसा ।
शिव यतिमदादीनां विधाय गल्पादिकाम् ॥
न्यपतिष्यदिदं नाथ जगन्नरककूपके ।
अहिंसाहस्तदानेन यदि त्वं नाधरिष्यथा ॥
विलीनसकलक्लेशं निर्विकारं मनोहरम् ।
शरीरं पश्यतां नाथ तावकीनमदो वरम् ॥
अनन्तवीर्य सर्वज्ञो वीतरागस्त्वमञ्जसा ।
न भासि यदभव्यानां तत्तेषां पापजृम्भितम् ॥
रागद्वेषमहामोहसूचकैर्वीतकल्मष ।
हास्यहेतिविलासाक्षमालाद्यैर्हीन ते नम ॥
अनन्तगुणसन्दोह कियद्वा वदिष्यते ।
तावकस्तवने नाथ जडबुद्धिरयं जन ॥
सद्भावोऽयथवा नाथ भवतैवावबुध्यते ।

तदस्य करुणां कृत्वा विधातव्यो भवे भवे ॥
भवोच्छेदकरी नाथ भक्तिरात्मनि निश्चला ।
समुत्थैव जगन्नाथमुखाय जिनमुद्रया ॥
विधाय वन्दनं भूप पश्चाद्गमनादिकम् ।
तदन्ते प्रणिधानं च मुक्ता शुक्त्यातिसुन्दरम् ॥
कृत्वा कृतार्थमात्मानं मन्यमानः सुकर्मणा ।
सूरेः पादयुगं सिञ्चन्नानन्दोदकबिन्दुभिः ॥
वन्दनदादशावर्त्तं स ददौ दोषसूदनम् ।
कृतसामयिकोऽशेषसाधूनामस्य भक्तितः ॥
यथास्थानमथाभोऽसौ निषण्णः शुद्धभूतले ।
हृष्टस्फुरितभूदन्ते सुगुरौ तत्र सन्निधौ ॥
धर्माचार्यो विशेषेण चक्रे धर्मदेशनाम् ।
कथितं भवनैर्गुण्यं वर्णिता कामहस्तव ॥
प्रख्यापितं च निर्वाणं दर्शितं तस्य कारणम् ।
ततश्चामृतसेकचारुणा वचसा मुनेः ॥
जातास्ते जन्तवः सर्वे विस्मयस्मापवर्जिता ।
अत्रान्तरे ।
मस्ताग्रविशदं कृत्वा ललाटे करकुड्मलम् ।
जगाद भारतीमेनां स राजा प्रमुमदन ॥
भगवंश्च संसारे नरेण सुखकामिना ।
किमादेयं प्रयत्नेन सर्वसम्पत्तिकारणम् ॥

[illegible] ।

[illegible] मधुराम [illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥

[illegible] ।

[illegible] ।
[illegible] ॥

[illegible] ।

[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥

[illegible] ।

[illegible] ।
[illegible] ॥
[illegible]
[illegible] ॥

[illegible]

[illegible] ।
[illegible] ॥

इष्टैः स्पर्शादिभिर्योऽयो देवद्भिश्चापरैः ।
एतत्स्वरूपमेतेषामिन्द्रियाणां नृपोत्तम ॥
दुर्जयानि यथा तानि कथ्यमानं मयाधुना ।
दत्तावधानस्तत्त्वमनुश्रुत्यावधारय ॥
अनेकभटसङ्कीर्णे समरे योधयन्ति ये ।
असमातङ्कसङ्घातमेतैस्तेऽपि विनिर्जिताः ॥
भ्रूक्षेपे निधायेदं भुवनं नाटयन्ति ये ।
शक्रादयोऽतिप्रसिद्धास्तेऽप्यमीभिर्विगोपिताः ॥
हिरण्यगर्भवैकुण्ठमहेश्वरपुरःसराः ।
एतैर्निराकृताः सन्तः सर्वेऽकिङ्करतां गताः ॥
अधीत्य सर्वशास्त्राणि परमार्थविदो जनाः ।
एभिर्विधुरिताः सन्तश्चेष्टन्ते बालिशा इव ॥
एतानि हि स्ववीर्येण ससुरासुरमानुषम् ।
वराकमिव मन्यन्ते सकलं भुवनत्रयम् ॥
दुर्जयानि ततोऽमूनि हृषीकाणि नराधिप ।
एवं सामान्यतः कृत्वा हृषीकगुणवर्णनम् ॥

ततश्च ।

ज्ञानालोकेन दृष्टार्थं बोधमार्गे मनीषिणः ।
सूरिरभाषे सद्दन्तदीधितिस्फुरिताधरः ॥

अथवा महाराज ।

तिष्ठन्तु तावच्छेषाणि हृषीकाणि जगत्त्रये ।
एकमेन्द्रियमेवैकं समर्थं यत्र वर्त्तते ॥

यतो न शक्यते लोकैर्जेतुमेकेन मण्डनम्।
लीलया जयतीदं तु भुवनं सचराचरम्॥

नरपतिरुवाच।

भगवंस्तस्य जेतारो नराः किं सन्ति कुत्रचित्।
आहोस्विन्नैव विद्यन्ते भुवनेऽपि तथाविधाः॥

मुनिरुवाच।

राजन्नहि न विद्यन्ते केवलं विरला जनाः।
ये चास्य विनिहन्तारस्तत्राकर्णय कारणम्॥
जघन्यमध्यमोत्कृष्टास्तथोत्कृष्टतमा गुणैः।
चतुर्विधा भवन्तीह पुरुषा भुवनोदरे॥
तथोत्कृष्टतमास्तावच्चैरिदं स्पर्शनेन्द्रियम्।
अनादिभवसम्बन्धलालितं पालितं प्रियम्॥
जैनेन्द्रागमसम्पर्कात् विज्ञाय सङ्कदोषकम्।
ततः सन्तोषमादाय महासत्त्वैर्निराकृतम्॥
गृहस्था अपि ते सन्तो ज्ञाततत्त्वा जिनागमे।
स्पर्शनेन्द्रियलौल्येन नाचरन्ति कुचेष्टितम्॥
यदा पुनर्विशेषेण तिष्ठन्त्येषां जिनागमः।
स्पर्शनेन्द्रियसम्बन्धं त्रोटयन्ति तदाखिलम्॥
यतो दीक्षां समादाय निर्मलीमसमानसाः।
सन्तोषभावतो धन्या जायन्तेऽत्यन्तनिःस्पृहाः॥
ततस्ते भवकान्तारनिर्विण्णा वीतकल्मषाः।
स्पर्शनप्रतिकूलानि सेवन्ते धीरमानसाः॥

भूमीशयनलोचादिकायक्लेशविधानतः ।
ततः सुखस्पृहां हित्वा जायन्ते ते निराकुलाः ॥
ततः सकलकर्मौघक्लेशविच्छेदभाजनम् ।
भूत्वा ते निर्वृतिं यान्ति निर्जित्य स्पर्शनेन्द्रियम् ॥
तेनोत्कृष्टतमा राजन्निर्दिष्टास्ते विचक्षणैः ।
ये चैवमनुतिष्ठन्ति विरक्ता जगत्त्रये ।
ततो भागवतं वाक्यमाकर्ण्य मनीषिणः ।
अभूच्चेतसि सद्भावपरिणामो यथाचेतसः ॥
अये भगवता प्रोक्तं वशितं स्पर्शनेन्द्रियम् ।
अत्यन्तविषमं लोके स्पर्शनाख्यं परम् ॥
यतो बोधप्रभावेन मम पूर्वं निवेदितम् ।
यथाऽऽत्मावृतनगरे वास्तव्योऽयं महाबलः ॥
तदूनं पुरुषव्याघ्रस्यापि स्पर्शनेन्द्रियम् ।
अस्मात् प्रत्याख्यानादन्यथा कथमीदृशम् ॥
ततो भगवतादिष्टा ये चोत्कृष्टतमा नराः ।
कथितः स्पर्शनेनाऽपि भवन्तु सदाऽपि ॥
तथापि ते निराकृत्य सदागमबलेन च ।
सन्तोषादिस्थितिं प्राप्ता इति तेन निवेदितम् ।
ततश्चाहमपि अस्य जानन पुरुषस्य ।
स्वरूपं विजानामि यदस्य परमार्थतः ॥
अथ हि भगवान् पृष्टो येन सचराचरम् ।
ज्ञानालोकेन जानीते यद्वैतद्धरं परम् ॥

३?

यावच्च चिन्तयत्येवं बालको विस्मितेक्षणः ।
तावल्लक्षितचित्तेन पृष्टो मध्यमबुद्धिना ॥

कथम् ।

मनीषिवचनं चित्ते भावितस्त्वं विलोक्यसे ।
किमत्र भवता किञ्चित्तत्त्वमवधारितम् ॥
मनीषिणोक्तं किं भ्रातर्भवता किं न लक्षितम् ।
किमेवं स्फुटवाक्येन कथयत्यपि सन्मुनौ ॥
अनेन हि समादिष्टं यादृशं स्पर्शनेन्द्रियम् ।
वयस्यस्तावकस्तादृक् स्पर्शनो नात्र संशयः ॥
कथमेतत्त्वया दृष्टं पुनर्मध्यमबुद्धिना ।
आख्यातं कारणं तेन निःशेषं तु मनीषिणा ॥
बालस्तु पापकर्मत्वात्केवलं वीक्षते दिशः ।
अनादरपरश्चैव हितेऽपि वचने गुरोः ॥
अथ राज्ञः समीपस्था पिबन्ती वचनामृतम् ।
आचार्यीय विशालाक्षी राज्ञी मदनकन्दली ॥
सा दृष्टा तेन बालेन ततोऽस्य हृदि संस्थितम् ।
नूनं मे हृदयस्येष्टा सेयं मदनकन्दली ॥
यतोऽवदातमेतस्यास्तापनीयसमप्रभम् ।
शरीरं दर्शनादेव मृदुतां सूचयत्यलम् ॥
रक्तराजीवसच्छाय विभाति चरणद्वयम् ।
अलक्षितशिराजालं कूर्मोन्नतमनुत्तमम् ॥
बिभर्ति तोरणाकारं भवने माकरध्वजे ।

अथाधुना सुसौन्दर्यरहितस्थानेन राजते ॥
मेखलाया कलापेन बद्धमन्मथवारणम् ।
नितम्बबिम्बमेतस्या विशालमनुनायते ॥
भारेणैव वशीभूतो विराजितवलित्रय ॥
एतस्या राजते मध्यो रोमराजिविभूषण ॥
गभीरा मन्मथस्येव हृदय सुमनोहरा ।
राजते नाभिरेतस्या मन्मथामरकूपिका ॥
वहत्येषा स्तनौ हृद्यौ पीवरौ कुम्भविभ्रमौ ।
उत्तुङ्गकठिनौ चारू हृदयेन पयोधरौ ॥
अन्यच्च धारयत्येषा सुकुमार मनोहरम् ।
पुन्नागभारसच्छाय रम्यं बाहुलताद्वयम् ॥
कराभ्यां निर्जितौ मन्ये नूनमौ रागसुन्दरौ ।
एतस्याश्चारुरूपाभ्यां रक्ताशोकस्य पल्लवौ ॥
दधत्यां पारिमाण्डल्य कन्धरायां सुबन्धुरा ।
कृत रेखात्रय मन्ये त्रिलोकजयसूचकम् ॥
अधरो विद्रुमच्छेदसन्निभो भाति पेशल ।
राजेते विलसद्दीप्ती कपोलौ कोमलामलौ ॥
ये कुन्दकलिकाकारा विलसत्किरणोत्करा ।
एतस्या वदने दन्ता भान्ति ते भुवनत्रये ॥
सितासित सुविस्तीर्ण तारराजिविराजितम् ।
एतच्च जनितानन्दमेतस्या लोचनद्वयम् ॥
उत्तुङ्गो नासिकावंशो भ्रूलते दीर्घपक्ष्मले ।

अस्या ललाटमलके कश्चित् भत राजते ॥
अनुरूप करोमीति नून जात प्रजापते ।
बद्धमानो निजे चित्ते ह्यलास्या श्रवणद्वयम् ॥
मालतीकुसुमामोदमोदितालिकुलाकुल ।
अस्या सुस्निग्धकुटिल केशपाशो विराजते ॥
एतस्या मन्मथोन्नापानाकण्य श्रुतिपेशलान् ।
मन्ये स्वविस्वरत्वेन लज्जिता किल कोकिला ॥
उचित्योचित्य यत्सारमेतस्या वरसुन्दरी ।
धात्रा विनिर्मित रूपमन्यथा कथमीदृशम् ॥
अतोऽस्यास्तादृश सर्गो युक्त एव न सशय ।
न जात्वमृतकुण्डेषु कटुत्वमवतिष्ठते ॥
एषाप्यभिलषत्येव मा यतोऽर्धनिरीक्षिते ।
निरीक्षतेऽतिलोलाक्षी स्निग्धदृष्ट्या मुहुर्मुहु ॥
एवविधविपर्यासविकल्पाकुलमानस ।
स बालोऽलीकसौभाग्यगर्वितो मूढता गत ॥
सूरिरुवाच ।
तदेव कथितास्तावत्सर्वोत्कृष्टा मया नरा ॥
इदानीमुत्कृष्टानां यत्स्वरूप तदुच्यते ॥
एव च वदति भगवति सूरौ ।
चारुरूप सूरिणा चारु परिचिन्त्य मनीषिणा ।
श्रोतव्य भवताऽपीद सद्बुद्धि प्रचोदित ॥
सूरिरुवाच ।

उत्कृष्टास्ते नरा ज्ञेया यैरिदं स्पर्शनेन्द्रियम् ।
अवाप्य मानुषं जन्म प्रभुत्वेनावधारितम् ।
आविर्भूततया तेषां परिस्फुरति मानसे ।
न चैतत्सुन्दरं ह्यत्र जीवानां स्पर्शनेन्द्रियम् ॥
ततो बोधप्रभावेण लालयन्त्यपि ते नरा ।
कुर्वन्तोऽन्वेषणं तस्य मूलशुद्धिं परिस्फुटाम् ॥
ततो विज्ञाय ते तस्य लोकवञ्चनतां नराः ।
स्वप्ने चकिता नैव विश्वसन्ति कदाचन ॥
न चानुकूलचारित्वं भजन्ति विजितस्पृहाः ।
ततस्तन्नियतैर्दोषैर्न युज्यन्ते विचक्षणाः ॥
शरीरस्थितिमात्रार्थमाचरन्तोऽपि तत्प्रियम् ।
तत्र मूर्छाभावेन भवन्ति सुखभाजनम् ॥
प्राप्नुवन्ति यशः श्लाघ्यमिह लोकेऽपि ते नराः ।
स्वर्गापवर्गमार्गस्य निकटे तादृशाशयाः ॥
एतच्च केवलं तेषां नाममात्रेण कारणम् ।
मोक्षमार्गे प्रवर्तन्ते स्वत एव हि ते नराः ॥
अन्येषामपि कुर्वन्ति ते सन्मार्गावतारणम् ।
तद्वाक्ये ये प्रवर्तन्ते विज्ञाय गुणकारकम् ॥
ये पुनर्न प्रपद्यन्ते तद्वाक्यं बालिशा जनाः ।
तेषामनादरं कृत्वा ते तिष्ठन्ति निराकुलाः ॥
तथैव भवन्त्येते देवाचार्यतपस्विनाम् ।
पूजासत्कारकरणे रतचित्ता महाधियः ॥

एवं भाषिते च भगवति प्रबोधनरतिसूरौ मनीषिणा चिन्तितं

यथेदमुत्कृष्टानां श्लाघितं चरितं नृणाम् ।
तथानुभवसिद्धं मे किंचिदात्मनि भासते ॥

मध्यमबुद्धिना चिन्तितम् ।

उत्कृष्टपुंसां यादृशा गुरुणा वर्णिता गुणाः ।
एते गुणाः परं सर्वे घटन्तेऽत्र मनीषिणि ॥

गुरुरुवाच ।

तदेवं तावदुत्कृष्टा वर्णिताः पुरुषा मया ।
अधुना मध्यमानां यत्स्वरूपं तन्निबोधत ॥
मध्यमास्ते नरा ज्ञेया यैरिदं स्पर्शनेन्द्रियम् ।
अवाप्य मानुषं जन्म मध्यबुद्ध्यावधारितम् ॥
स्पर्शनेन्द्रियसम्पाद्ये ते सुखे गृद्धमानसाः ।
पण्डितैरनुशिष्टाश्च दोषायन्ते स्वचेतसा ॥
चिन्तयन्ति निजे चित्ते ते दोलायितबुद्धयः ।
विचित्ररूपे संसारे किमत्र वत कुर्महे ॥
भोगानेके प्रशंसन्ति रमन्ते सुखनिर्भराः
अन्ये ग्राम्यान्नरात्मानो निन्दन्ति विगतस्पृहाः ॥
तदत्र कतरो मार्गो मादृशामिह युज्यते ।
न सम्यगामोऽस्माभिरत्र सन्देहमवगाहते ॥
तस्मात्कालविलम्बोऽत्र युक्तोऽस्माकं प्रयोजने ।
नैवैकपक्षनिक्षेपो विधातुमिह युज्यते ॥
एवं च जायते बुद्धिर्या तेषां क्रमपद्धतिः ।

तत्प्रकाशात् पूर्वं प्रमादाद् बुद्धिः कर्मानुसारिणी ॥
ततस्ते स्वधर्मनाशाच्च मन्यन्ते सुखहेतुताम् ।
अनुकूले च वर्तन्ते किं तु नात्यन्तलोलुपाः ॥
ततो लोकविरुद्धानि नाचरन्ति कदाचन ।
स्वमनेन्द्रियलोभेन नापायान् प्राप्नुवन्त्यतः ॥
विषयलोके युध्यन्ते विशेषवचनस्य ते ।
यद्यद्वा शास्त्रदार्ढ्य केवलं नाचरन्ति भो ॥
मैत्रीं वाणिज्यलोभेन कुर्वन्ति खेदनिर्भराम् ।
लभन्ते तद्विपाकेन रौद्रां दुःखपरम्पराम् ॥
स्वल्पशर्म लोके च प्राप्नुवन्ति न यत्र च ।
यतः पापलोभेन सर्वानपकारो यत ॥
यदा पुनः प्रपद्यन्ते विदुषां वचनानि ते ।
आचरन्ति च विज्ञाय तदीयां हितरूपताम् ॥
तदा ते विगताबाधा भवन्ति सुखिनो नराः ।
महापुरुषसम्पर्काल्लभन्ते मार्गमुत्तमम् ॥
पण्डिता इव ते नित्यं गुरुदेवतपूजिनाम् ।
सद्ध्यानपरा सन्तः शुभध्यानवन्दनम् ॥
तदिदमाचार्यीयं वचनमाकर्ण्य मध्यमबुद्धिना चिन्तितम् ।
य एते सूरिणा प्रोक्ता मध्यमानां गुणागुणाः ।
स्वसंवेदनसंसिद्धास्ते ममापि स्वगोचरे ॥
मनीषिणा चिन्तितम् ।
यदिदं सूरिणादिष्टं वचने सुपरिस्फुटे ।

चरितं मध्यमानां तन्मदीये भ्रातरि स्थितम् ॥

सूरिरुवाच ।

तदेव कथितास्तावन्मध्यमानां गुणागुणाः ।
जघन्यनरसम्बन्धि स्वरूपमधुनोच्यते ॥
जघन्यास्ते नरा ज्ञेया यैरिह स्पर्शनेन्द्रियम् ।
अवाप्य मानुषं जन्म बन्धुबुद्ध्यावधारितम् ॥
परारिरूपतामस्य न जानन्त्येव ते स्वयम् ।
परेषामिति रुष्यन्ति विदुषां हितभाषिणाम् ॥
स्पर्शनेन्द्रियसम्बाधे पामाकण्डूयनोपमे ।
परमार्थेन दुःखेऽपि सुखलेशेऽपि स्वभ्रवः ॥
स्वर्गोऽयं परमार्थोऽयं मोक्षोऽयं सुखसागरः ।
मुग्धाभिरिति मन्यन्ते विषयावश्यं गताः ॥
ततो हार्दं तमस्तेषां प्रविसर्पति सर्वतः ।
विवेकमोषकाक्षिप्ते वर्धन्ते रागरश्मयः ॥
नष्टसत्पथसद्भावा ध्वान्तान्धीभूतबुद्धयः ।
कुर्वन्तोऽनार्यकार्याणि वाध्यन्ते केन ते ततः ॥
धर्मलोकविरुद्धानि निन्दितानि पृथग्जनैः ।
कार्याण्याचरता लोके प्रभुभावं प्रपद्यते ॥
कुलं चन्द्रांशुविशदं ते कुर्वन्ति मलीमसम् ।
आत्मीयचरितैः पापाः प्रयान्ति जनवाच्यताम् ॥
अगम्यगमनासक्ता निर्मर्यादा नराधमाः ।
अर्कतूलादपि परं ते जने यान्ति लाघवम् ॥

दुःखं स्पर्शादिविषयं कथंचिदपदायकम् ।
यदा पुनर्विवर्तेत स्वरूपेऽतिगहादयम् ॥
तदा ते यान्ति दुःखानि यानि लोके विरूपता ।
प्राप्नुवन्ति न रज्यन्ते ता। कारणमितु गिरा ॥
सर्वं तदिदं प्रत्यमिपदेव समागम ।
कथ्यन्ते तदा तथा लोके दुःखविरम्यता ॥
मन्दैव भवन्त्येते गुरुदेवतपस्विनाम् ।
मत्लोका महापापा निर्भाग्या गुणदूषका ॥
सन्मार्गपतितं वाक्यमुपदिष्टं हितैषिणा ।
वैभविक प्रपद्यन्ते ते महामोहदूषिता ॥
ततश्चेदं पुनर्वाक्यं विनिश्चित्य मनीषिणा ।
विविक्तमतमिदं चित्ते तथा मध्यमबुद्धिना ॥
सर्वेन्द्रियसुखाभासं यदेतदुपवर्णितम् ।
नूनं इदं जघन्यानां सूरिभिर्विमदाशयैः ॥
तदेतत्सकलं बाले प्रतीतं स्फुटमावयोः ।
नामतीत यदन्येते यदि वा वरसुरय ॥
बालेन तु गुरोर्वाक्यं न मनागपि लक्षितम् ।
तस्यां मदनकन्दल्यां विप्रचिन्तेन पापिना ॥

सूरिराह ।

तदेव भो महाराज जघन्यनरचेष्टितम् ।
निवेदितं मया तुभ्यं तवेदमभिधीयते ॥
एते जघन्या भूयांसो भुवने सन्ति मानवाः ।

इतरे तु यत स्तोका सकलेऽपि जगत्त्रये ।
स्पर्शनेन्द्रियजेतारो विरला भुवने नराः ।
तेनास्माभिरिदं पूर्वं भवतां प्रतिपादितम् ॥

नरपतिरुवाच ।

धर्मं यतो न कुर्वन्ति स हेतुः प्रतिपादितः ।
भगवद्भिरितोऽस्माकं भाति संशयो महान् ॥

अत्रान्तरे तु सुबुद्धिमन्त्रिणाऽभिहितं । भगवन् ! जघन्यमध्यमोत्कृष्टोत्कृष्टतमरूपतया चतुर्भेदाः पुरुषा भगवद्भिः स्वरूपतो व्याख्याता एते किमेवंरूपा यदैते व्यावर्णिताश्चतुर्विधस्वरूपाः संजातास्तेषां किं कारणमस्तीति भगवन्तः । भगवानाह । महामन्त्रिन्नाकर्णय । न तावत्प्राग[illegible] स्वरूप किं नहि कारणम् । तत्र ये तावदुत्कृष्टतमाः पु[illegible] प्रतिपादिता ते कालमुख्येभ्यो निष्पन्नप्रयोजनतया नि[illegible] परमार्थेन । यतस्त एवात्कृष्टा यदा प्राप्य मनुष्यभावं [illegible] प्रमादजन्य भावमात्र तत्प्रसंगेन दर्शयित्वा कर्मनाशं [illegible] व्यपनीय निर्वृतिं प्राप्ता भवन्ति तदोत्कृष्टतमा इत्यभि[illegible] धीयन्ते च तेषां स्वरूपमाख्यानम् । तासमव्याख्यातमपि [illegible] । कर्मणि । तेन [illegible] पुरुषाणां न कश्चिद्[illegible] एते दृष्टजन्मन्यशुद्धाः पुरुषाः संसारादर्शनेन [illegible] निर्वृतता अदर्शि । तथापि पर कर्मविपाकैर्भवन्ति । [illegible] [illegible] । [illegible] [illegible] [illegible]

जननी। या पुनरकुशलकर्ममाला (सा) जघन्यमनुष्याणां जननी। या पुनः कुशलाकुशलतया सामान्यस्वरूपा कर्मपद्धतिः सा मध्यमनराणां जनयित्री विज्ञेयेति॥ मनीषिणा चिन्तितम्। अये न केवलं गुणै-र्विरचितैरेतैरस्माकमुत्कृष्टमध्यमजघन्याः पुरुषाः स्वस्वरूपा भग-वद्भिर्व्याख्याताः किं तर्हि जननीजनकव्यतिकरोऽपि अस्माकमेतै-रेव तुल्य एव भगवता दर्शितः। तस्मात्पुनरनेनैतद्रूपेणैवास्माभिर्भवि-तव्यम्। तथाहि। योऽसौ भवजन्तुर्मां निराकृत्य निर्वृतिं यात इति व्यवसायमारभ्य निवेदितो न तस्य तेन जननी जनको वा कश्चिदा-ख्यातः। तस्मादुत्कृष्टतमोऽसाविति निश्चीयते। अस्माकं पुनस्त्रया-णामपि कर्मविलासो जनकः भगवदादिष्टाभिधाना एव जनन्यः। तस्मादिदमवावसीयते यदुत जघन्यो बालो मध्यमो मध्यमबुद्धि-रुत्कृष्टोऽहमिति॥ सुबुद्धिनाभिहितं। भगवन्नेतेषामुत्कृष्टतमादीनां पुरुषाणां किं तदवस्थितमेव रूपं परावर्तोऽपि भवति। भग-वानाह। महाराज उत्कृष्टतमानां तावदवस्थितमेव रूपं न कदा-चिदन्यथाभावं ते भजन्ते। इतरेषां पुनरनवस्थितं स्वरूपं यत कर्मविलासायत्ता ह्येते वर्त्तन्ते। विषमशीलश्चासौ प्रकृत्या कदा-चिदुत्कृष्टानपि मध्यमयति जघन्ययति वा मध्यमानपि चोत्कृष्टयति जघन्ययति वा जघन्यानपि मध्यमयति उत्कृष्टयति वा। तस्मादनेन कर्मविलासेन पुरुषाणामनेकरूपता भवतीतरेषाम्॥ मनीषिणा चिन्तितम्। एतदपि घटत एवास्मद्व्यतिकरे। तथाहि। विषमशील एवास्मज्जनको यतः कथितं तेनैव मे यथा मयि प्रतिकूले यदुपपद्यते तन्मम बालकेति। ततश्च यो निजजनयित्र्यापि प्रतिकूलचारितया

प्रकम्पमानसर्वाङ्गश्च पतितोऽसौ भूतले। अत्रान्तरे प्रकटीभूतस्तनो। निर्गतो भगवदवग्रहात्। गतो दूरदेशे। स्थितश्च प्रमोमाणो। विरत कलकलो। लज्जितौ मनीषिमध्यमबुद्धी बालचरितेन कोऽस्यापि वराकस्योपरि कोप इति विचिन्त्य प्रणीभि राजा। दृष्टोऽनेनाचार्यो। यदुत भगवन्नलौकिकमिदमत्र पुरुषचेष्टितं अतीतमिव विचारणाया अश्रद्धेयमनुभूतवृत्तान्तानां। तथाहि विमलज्ञानालोकेन भावाद्भूतसमस्तभुवनवृत्तान्त भगवन्ननेन यत्पूर्वमाचरितमासीत् यच्चेदानीमध्यवसित। ममेदमत्र कौतुकं। यदुत तत्पूर्वकमस्याचरणं कदाचिदिचितपारचरितस्य समाध्येत। इदमधुनातन पुनरद्रिदिन्द्रजालमिव प्रपञ्चसमाश्रद्धेय प्रतिभासते। यतो भगवति रागादिविषधरोपशमोत्सर्गसन्निहितेऽपि कथमतिक्लिष्टजन्तूनामप्येवंविधोऽध्यवसाय सम्भवेदिति भगवताभिहित। महाराज न कर्तव्योऽत्रातिविस्मयो। यतो न पुरुषस्य तपस्विनो दोषोऽयम्। नृपतिरुवाच। तर्हि कस्य दोष। भगवानुवाच। दृष्टस्त्वया य शरीरान्निर्गत्य योऽयं बहिर्विपुरुष। नृपतिनाभिहित। बाढं दृष्ट। भगवानाह। यदेतस्यैवायं समस्तोऽपि दोषो। यतोऽस्य वागवस्थितेन पूर्वकमिदमनेसमाचरितम्। अनेन हि वशीकृता पुरुषाः महापापान्येव किंचिदपाय यथाचरन्ति। तस्माच्चात्र किञ्चिदलौकिकं विचारातीतमसंभाव्यं भवद्भिः सम्भावनीयम्। नरपतिरुवाच। यद्येवं तत किमयंपुरुषोऽमुं शरीरवशिममात्मनाऽनर्थहेतुमपि धारयति स्म। भगवानाह। न जानात्येव वराकोऽयं दुःशीलता। पराभि

रागादयो विदलन्ति कर्मशाल प्रशाम्यन्ति वैरानुबन्धा विलि
न्नोऽलीकसेहपाशा प्रलीयते विपरीताभिनिवेशो। यावता तथा
केषाचिद्भव्यतया निरुपक्रमकर्मघनपटलतिरस्कृतविवेकरौधिति
प्रसराणा वा न केवल पूर्वोक्तगुणलेशदेशोऽपि न सजायते किं तर्हि
प्रादुर्भवन्त्येवंविधा भगवन्तमधिकृत्य कुविकल्पा। यदुताहो मि
५४ मर्थमिन्द्रजालम् अहो अस्य लोकवञ्चनचातुर्यमहो गाम्भ
लोकाना यदेतेनाप्यलीकवाचालेनालजालरचनाचतुरेण
इति॥ तदेवस्थिते महाराज न किञ्चिदिदमत्यद्भुत यदनेन
सन्निधानेऽप्येवंविधमध्यवसित। अयमपि हि निरुपक्रमयान
कुशलमालया स्वदेहवर्त्तिन्या निजजनन्या प्रेर्यमाणोऽमु
सहचरमुररीकृत्यैव चेष्टते। तथात्र भवद्भिर्विस्मयो विधेय॥
बुद्धिनाभिहित। भदन्त न किञ्चिदिदमाश्चर्य भगवदागमावदाता
नामेवंविध एव निरुपक्रमकर्मपरिणामो नात्र सन्देह। केवलमि
नीमेव भगवत्पादप्रसादादेव देव खल्वेवंविधपदार्थेषु
र्भविष्यति। तेनैव भगवन्त विज्ञापयति॥ राजा सहर्ष प्राह।
भिहित सखे चारुरहो तेऽवसरभाषिता। ततो राज्ञैव
प्रत्याह। यथ कोऽस्य पुन पुरुषस्य परिणामो भविष्यति।
भिहित। इदानीं तावदेष दृष्टपुष्कलपापविपाकतया भयातिरे
पल्लहृदयो न किञ्चिच्चेतयते। गतेषु पुनरितो युष्मदादिषु
भ्रमन्न सन्नेष भूयो ऽप्यधिष्ठास्यते अनेन स्पर्शनेन। ततो
कुत्रचिन्निर्देशे यामीत्याकूतेन प्रपलायमानो महता क्लेशेन या
कोलाकसन्निवेशे। तत्र च कमपूरकाभिधानस्य

चि श्रान्ता पिपासिता दूरत एव दृष्टवति हृदयरागं । तत
तपानाय चलितवति तन्मिमुखः । तत्र पुरतोवाग्निर्दति तत्र
सरसमिथुन । ततद्यागमकाटाकनटर्षानितु तन्त्रहेतु पर्तच
नमारयन्तय मधार्टिष्वत । चन्द्रागौ पुर्नविवर्तति हत्वा
तमापसर्पतिस्थति तदाग । तत स्तनोणादां तर्पां प्रापन्तेव तत
ति । ततःसुमुपलभ्य सा मातङ्गी स्पर्शदुस्थान्य कर्मदद्धिव्दर्ति
ती मदावासतारतापराधमुद्दिश्यति अथेन निरुद्धर्ति दर्शके ।
गच्छति पद्मवने मीना । चक्रांपि मज्जनादमतोद्यन्ताभ्रेन्त्र
र्पति तवासाप । अविर्थति तथा सादृमाददा । वर्टदिश्चते
दद्रुष्या । प्रर्तिग्छते मद्यापरि कमन्दतान्य कर्तदर्शन
तनामदपमाम्भात । तथापि वर्त्स्थनद्य तथा तनीरदर्ष
कामाटिवया । विधाय्त सा दायाय । तमावण्ड एर्वदर्शन
पितद्यताम्नो । विमोचविश्वादन तपार्दर्शन । तस्यर्दशर्ति
तमई कोपाम तत । मधात्र्ति च दत्त निर्मितृत्त । ताप्टदर्शन
: करे च दुराम्रापनपुरष परधा आसद दृष्ट च बन्न च
ममातमेतनेवप्रदाचेत । प्रदर्शितत्ति च च त । तदान्त्र ितमो
रेइथानेनानि मया च याचन्ति तारवु देवत् । वेदद्वमन्त्र
योनिषु पुनतरवमपाशमातायाा । एव दृ बपारतदा च क
पुनतमापि ताम पनित अथारचक । पत्र प्रातिदृगा हातकम्पा ।
दुर्दृष्टमामर्दत । अदम्न क्षितौ मोतनदुश्चा क चन्द्र
दुदयप्रमवन चावोदिदवपो पाक्षिपो । अपनमाद । ३ ३ ३ क
समगन पुनर्दर्शिनवक्त मम्मत वरमादन च्दि बद

समारिमार्गिणां प्रभवन एव। यतो योगिनीयमनुस्मर
योगेश्वरदाय स्पर्शनो। योगिना च भवत्येवेदृशी प्रति
कचिदभिव्यक्तरूपता कचिन्नाविर्भूता वर्तते। नृपतिनाभिहि
भगवन्नमयो किमयद्वौषरोऽस्यास्ति प्रभावो। भगवानाह वार्य
ततो राजा मन्त्रिण प्रत्याह। यद्ये
कीदृशी ममाद्यापि प्रगुणदर्शनता। ततो न पुनः यदेव मन
सौपम्यैरेवंविध जल्पितु तथापि दुष्टनिपुणो राज्ञां धर्म
कारेरमभिधीयते। तदाकर्णयतार्थं। सुबुद्धिनाभिहितं। यदि
मनु देवो। राज्ञाभिहितमादिष्टमेतत्तावद्भगवता यथैते
कुशलमाले यमेन पुरुषेण मम याच्यत। ततो मेरावौ
चमत्कार। नैरर्थं सत्ताज्ञापय सतोते। यथा
पुत्राभ्यां दूरतोऽपि दूरं गन्तव्यं। सुतेष्वमिन् पुत्रे मामा
विषये प्रवृत्याभिरतया पुत्रयोरभाभि शारीरो वप्त कि
यथेतन्याऽदृष्टे पुनःते यथाविषये प्रविशता ततो भवता वि
कौतुक्येन पीड्यते। एवमतिदुष्टयोरर८ ॥
ततोऽपि दया विधेया॥ सुबुद्धिना चिन्तितं। यदो
मम राजास्यानिश्चय। यतोऽस्य तदृतेन शिक्षनं नापि वि
धर्मेच न माना योग्य इति सद्गोचर्ं तदनुदानं। भानु नार
दर्शन प्रतिबन्धकारणं भगवता कथितमस्ति। तत्र भाव
कर्मकर ज्ञायतो न तिर्यक्तानिभिहितमनेन। यद्राज्ञावत्न
तत्र प्राप्त मे मम राज्ञानमानि सुरेणाभिहितं। का
समनन्तरं ज्ञानेन। न कर्मानन्तरविधुद्धनमोचनं। यत

रङ्गलोकजातीये एते स्वप्रमाकुमचमाले । अन्तरङ्गलोकेषु च न प्रभवन्ति लोहयन्त्रादीनि । अगम्यरूपा हि ते बाह्यपुरुषाणां ॥ नृपतिरुवाच । भदन्त कस्तर्ह्यनयोरन्यो निर्दलनोपायो भविष्यति । भगवताभिहितं । अप्रमादाभिधानमन्तरङ्गमेव यन्त्रमनयोर्निर्दलनोपायः । तद्धेते साधवोऽनयोरेव निष्पेषणार्थमहर्निशं वाहयन्ति । नृपतिरुवाच । कानि पुनस्तस्याप्रमादाभिधानस्य यन्त्रस्योपकरणानि । भगवानाह । यान्येत एव साधवः प्रतिक्षणमनुशीलयन्ति । नृपतिरुवाच । कथं । भगवतोक्तं । समाकर्णय यावज्जीवमेते माचरन्ति तनीयसीमपि परपीडां । न भाषन्ते सूक्ष्ममप्यलीकवचनं । न गृह्णन्ति दन्तशोधनमात्रमप्यदत्तं । धारयन्ति नवगुप्तिसनाथं ब्रह्मचर्यं । वर्जयन्ति निःशेषतया परिग्रहं । न विदधते धर्मोपकरणशरीरयोरपि ममत्वबुद्धिं । नासेवन्ते रजन्यां चतुर्भेदमप्याहारजातं । आददते प्रवचनोपवर्णितं समस्तोपधिविशुद्धं प्रथमयात्रामात्रसिद्धये निरवद्यमाहारादिकं । यतन्ते समितिगुप्तिपरिपूरितेनाचरणेन । पराक्रमन्ते विविधाभिग्रहकरणेन । परिहरन्त्यकल्याणमित्रयोगं । दर्शयन्ति सतामात्मभावं । न लङ्घयन्ति निजामुचितस्थितिं । नापेक्षन्ते लोकमार्गं । मानयन्ति गुरुसंहतिं । चेष्टन्ते तत्तन्त्रतया । आकर्णयन्ति भगवदागमं भावयन्ति महायत्नेन । अवलम्बन्ते द्रव्यापदादिषु धैर्यं । पर्यालोचयन्त्यागमिनमपायं । यतन्ते प्रतिक्षणमप्राप्तयोगेषु । लक्षयन्ति चित्तविस्रोतसिकां । प्रतिविदधते चानागतमेव तस्याः प्रतिविधानं । निर्मलयन्ति सततमप्रमत्ताभ्यासरततया मानसं । अभ्यस्यन्ति योगमार्गं । स्थापयन्ति चेतसि परमात्मानं । निबध्नन्ति तत्र धारणां ।

ससारिप्राणिना प्रभवत एव। यतो योगिनीयमकुशलमाला योगेश्वरस्याय स्वर्गनो। योगिना च भवत्येवेदृशी शक्ति क्वचिदभिव्यक्तरूपता क्वचिदनाविर्भूता वतते। नृपतिनाभिहितम्। भगवचनयो किमसद्गोचरोऽप्यस्ति प्रभावो। भगवानाह बाढमस्ति। ततो राजा मन्त्रिण प्रत्याह। सखे पापयोरनयोरमर्दितयो कीदृशी ममाद्यापि प्रमुदनता। ततो न युक्त यद्यपि भवतः मीपस्थैरेवविध जल्पितु तथापि दुष्टनिग्रहो राज्ञा धम। कृत्वेदमभिधीयते। तदाकणयत्वाय। सुबुद्धिनाभिहित। समादिशतु देवो। राज्ञाभिहितमादिष्टमेतत्तावद्भगवता यथैते सर्वे कुशलमाले अनेन पुरुषेण सह यास्यत। ततो नेदामीं वधमर्हत। केवल समाज्ञापय लमेते। यथा युवाभ्या दूरतोऽपि दूर गन्तव्य। स्ततेऽप्यस्मिन् पुरुषे नाम्नाके विषये प्रवेष्टव्यमितरथा युवयोरस्माभि शारीरो दण्ड करिष्यते। अथैवमप्यादिष्टे पुनरेते भस्मद्विषये प्रविशेता ततो भवता निर्दया लोहयन्त्रेण पीडनीये। एवमतिदुष्टयोरारटतोरप्यनयो नेषदपि दया विधेया॥ सुबुद्धिना चिन्तित। अहो रे नयोरुपयावेगातिशय। यतोऽस्य तदयेन विरहत तदपि कमपि न भवम योग्य इति मद्गोचर धरमदाम। भवतु तथापि इदमेव प्रतिबोधकारण भगवन्त कथयिष्यन्ति। मम पक्षिरेव व्यायमौति विचिन्त्याभिहितमनेन। यदाज्ञापयति देव तत्र प्रपसोऽसौ तयोराज्ञापनार्थं सूरिणाभिहित। समनयोरेव ज्ञापनेन। न खल्वेतयोरयमुपक्रमोपायो। यतो

भान्यतो भावदोषेणाभिधीयते । मनीषिणाभिहितं । ततो दोषवती भगवता सा भागवती भावदीक्षा यद्युचितोऽहं तस्याः । भगवानाह । बाढमुचितः खलु दीयते । नृपतिनाभिहितं । भदन्त समस्तैकसमरसपदनिर्द्धूतमायाप्रपञ्चीदमप्रमादयन्त्र दुःसहवतन कृत्याकमपि दुरनुष्ठेयतया समस्त सकलसुखसम्पादयत्येव पुनः क कुलस्तो महात्मा येनेदं सर्वथैव महाराज्यमिव जिनोपुणाभ्युपगतमिति । भगवताभिहितं । महाराज मनीषिणामायमर्थेन चितिप्रतिष्ठिते वास्तव्य । राज्ञा चिन्तितमये यदार्य पाप पुरुषो मया व्यापादयितुमादिष्टस्तदा लोके प्राप्नमान मुत एवायोन्मनीषी । यदुत रे एकस्मादपि पितुर्मातयो यस्तानयोरियान विशेष । कस्तेद् विचेष्टित च तयाश्नो मनीषी महात्मेति । तदेव एव मनीषी प्राप्तो भविष्यति । तथा भगवत्तमेव विशेषतः पृच्छामीति चिन्तयताभिहितमनेन । भदन्त कौ पुनरस्याश नगरे मातापितरौ का वा ज्ञातय इति । भगवानाह । अस्त्यस्यैव क्षितिप्रतिष्ठितस्य भोक्ता कर्मविलासो महानरेन्द्र । योऽस्य जनकस्तस्यैवाप्रमहिषी शुभसुन्दरी नाम देवी सा जननी । तस्यैवाकुशलमाला भार्या । तस्य च पुत्रो बालाभिधान सुत इति । तथा योऽयं मनीषिण पार्श्ववर्ती पुरुष सोऽपि तस्यैव सामान्यरूपाया देव्यास्तनयो मध्यमबुद्धिरभिधीयते । एतावदेवास्येद कुटुम्बक । येषाः सर्वस्व देशान्तरेभ्य किं तदान्तया । नृपतिराह । किमस्य नगरस्य कर्मविलासो भोक्ता न पुनरहं । भगवानाह । बाढं । राज्ञोक्तं । कथं भगवानाह । समाकर्णय ।

वयमेन मनीषिणमुद्दिश्य किञ्चित्तत्तोषानुरूपमाचरितुमिच्छाम
स्तदनुजानातु भगवानिति । तदाकर्ण्य स्थिता भगवन्तस्तूष्णीभावेन
सुबुद्धिनाभिहित । देव न पृच्छ्यन्ते द्रव्यस्तवप्रवृत्तिकाले भगवन्त
अनधिकारो ह्यत्र भगवता । युक्त एव यथोचित स्वयमेव द्रव्यस्त
कर्त्तु युष्मादृशा । केवलमेतेऽपि विहित तमनुमोदन्त एव द्रव्यस्त
ददति च तद्गोचर प्रेषकालमुपदेश । यथा १। १८
भगवता । न खलु वित्तस्यान्यच्छुभतर स्थानमित्यादिवचनसन्दर्भे
तस्मात्स्वत एव कुरुत यथोचित यूय । केवलमभ्यर्थयाम का
प्रतीक्षण प्रति मनीषिण । नृपतिरवोचद्देव कुर्म । ततोऽभ्य
सबहुमान राजमन्त्रिभ्या मनीषी । चिन्तितमनेन । न ख
कालविलम्बो धर्मप्रयोजने । तथापि ५९
सुदुष्कर इति मन्यमानेन प्रतिपन्न तत्समीहितम् ।

ततस्त्वरयता तेन नरनाथेन तोषत ।
व्यापारिता महायोग्ये मर्त्ये मन्त्रिमहत्तमा ॥
ततस्तै क्षणमात्रेण तत्सर्वं जिनमन्दिरम् ।
विचित्रवस्त्रविस्तारैर्विहित विगतातपम् ॥
कुरङ्गनाभिकाश्मीरमलयोद्भवरूपया ।
कर्पूरोन्मिश्रया गाया तदधस्तादिलेपितम् ॥
तथालिकुलसङ्गीतै पञ्चवर्णैर्मनोहरै ।
आजानूत्सेधिभि पुष्पै सर्वत परिपूरितम् ॥
मौक्तिकदामविन्यस्तमणिदर्पणराजितम् ।
दिव्यवस्त्रकृतोल्लोच बद्धमुक्तावचूलकम् ॥

नानाप्रकारवस्त्रं रत्नोद्योतैः सुनिर्मलैः ।
विभूषाद्रव्यैश्च वस्त्राभरणभूषणम् ॥
देवलोकाधिकामोदं पटवासैर्विलेपनैः ।
कस्तूरीचन्दनाद्येन सुगन्धिना ॥
पद्मादिकाविनोदोकसारम्भरचनाधनम् ।
एवं विधाय सकलं सद्म देवगृहम् ॥
न्तरे ।

पारिजातकमन्दारमेरुहरिचन्दने ।
सन्तानके च दैवीनामवतंसैकशालिनि ॥
सुरभेमा विमानानि चीनदग्धो नमस्यताम् ।
नमोऽङ्गदरवाद्युक्तमानसुखे जिनालयम् ॥
तत प्रदक्षिणाद्विपकोकरोलसपूजिता ।
पूजां कलहूरूपां ते जातानन्दा प्रचक्रिरे ॥
प्रदिष्टवसविन्यासां पुष्पमालोन्नतशालाम् ।
निदधानतया कोकाशे कल्पद्रुमरूपताम् ॥
ततोऽञ्जनाद्रिगानस्पर्शपूरितचेतसा ।
नरेन्द्रेण सखीजन देवनागस्य गदिता ॥
शुभे सुमेरुतरुणे सुवेला भद्रविष्टरे ।
निवेश्य बिम्बं जैनेन्द्रं विधिनारब्धि मज्जनम् ॥
नव च ।

धातस्य शुभवस्त्रस्य किरीटाङ्गदधारिणः ।
गोशीर्षेण विलिप्तस्य हारराजितवक्षसः ॥

कुण्डलोद्भासिगण्डस्य शक्राकारानुकारिणः ।
अपि शान्तविकारस्य निर्मलीभूतचेतसः ॥
महत्तमोऽयमस्माकमेष एव च नायकः ।
एष एव महाभाग एष एव च पूजितः ॥
येन भागवती दीक्षा दुष्करापि जिघृक्षिता ।
एवं प्रभाषमाणेन नरेन्द्रेण मनीषिणः ॥
क्षीरोदकसम्पूर्णस्नापनीयो मनोहरः ।
सद्गन्धसारसम्पूर्णसुनिमानसमनिभः ॥
गोशीर्षचन्दनोन्मिश्रो दिव्यपद्मावृताननः ।
समन्तादर्चितः शुभ्रैरार्द्रचन्दनहस्तकैः ॥
संस्थाप्य प्रथमस्नात्रे स्नानकारस्तथा मुदा ।
समर्पितोऽभिषेकाय दिव्यकुम्भो भवच्छिदः ॥
आनन्दपुलकोद्भेदं दधानो भक्तिनिर्भरः ।
जग्राह नृपतिः कुम्भं स्वयमेव द्वितीयकम् ॥
तथा मध्यमबुद्धिश्च स पुनः स-सुलोचनः ।
स्थितौ भुवननाथस्य स्नापकारणतत्परौ ॥
चन्द्रोद्योतच्छटाच्छेन चामरेण विधूयिता ।
स्थिता त्रिलोकनाथस्य पुरो मदनकन्दली ॥
द्वितीया स्थापिता राज्ञा तस्याश्चामरधारिणी ।
देवी पद्मावती नाम तदाकारानुकारिणी ॥
धूपभाजनमादाय गाढं भावितमानसः ।
सुबुद्धिरधिनाथस्य स्थितोऽग्रे पिहिताननः ॥

तेनैव राजादिष्टेन विधवत्तु सादरम् ।
ये ये दृष्टवा लोकास्ते न सन्ति नियोजिता ॥

तथा ।

न तत्र हसितो लोक ये जातास्ते प्रमुदिताः ।
ते कलालापविज्ञानशालिनो महाधनाः ॥
ते रूपवन्तो शूरा कुलस्यापि विभूषणाः ।
ते पवित्रगुणपूर्णा श्लाघ्यास्ते भुवनत्रये ॥
जिह्वरीश्वरनाथस्य लोकनाथस्य मन्दिरे ।
येऽत्र विहरन्तो यान्ति नराः कल्याणभागिनः ॥

तत्र प्रवृत्तो भगवतोऽभिषेकमहोत्सव । पूरयन्ति दिक्चक्र वालमुद्दामदेवदुन्दुभिनिर्घोषाः । बधिरयन्ति जगत्कर्णकोटराणि ररटत्पटहपाटहप्रतिनादसमुच्छिता विविधतूर्यनिनादाः । प्रमुदाश्चले क्वणत्कणकभाजकरयोऽमिव कलकारमाकलकल । गीयन्तेऽमराङ्गना प्रमदमुदारमाह्लादवेदनचतुराणि भगवत्साधुगुणसम्बन्धप्रवणानि श्रवणात्सुखकारीणि गीतकानि । पठन्ते परिवृत्तुम्भीरैश्च ध्वनिना श्रवणमपीतवचनोऽमतिकराणि रागादिविषधरपरममन्त्ररूपाणि भावसार महास्तोत्राणि । प्रवृत्तानि विविधकरणाङ्गहारहारीणि प्रमोदातिरेकप्ररूपकानि महानृत्तानि । तदेव महता विमर्देन सुरासुरैरिव कनकगिरिशिखरनिवर्तिते भगवदभिषेकमङ्गले पूजितेषु यथाविशेषं भुवनाधिनाथबिम्बेषु विहितेषु निःशेषकृत्य-विधानेषु वन्दितेषु साधुलोकेषु दत्तेषु महादानेषु सम्मानितेषु विशेषत साधर्मिकेषु मनीषिणा स्वर्गेऽभयनाय प्रस्तीकारितो

नरपतिना गजः । आरोपितस्तत्र मनीषी । स्थितोऽस्य स्वयमातपत्रधारकः । घोषितं च नरपतिना हर्षातिरेकरोमाञ्चितवपुषा बृहता शब्देन । यदुत भो भो सामन्ता भो भो मन्त्रिमहत्तमाः समाकर्णयत यूयम् ।

विभूतिरत्र संसारे नरस्य ननु तत्त्वतः ।
सत्त्वमेवाविगानेन प्रसिद्धं सर्ववेदिनाम् ॥
ततो यस्याधिकं सत्त्वं नरस्येह प्रकाशते ।
स शेषनरवर्गस्य प्रभुत्वं कर्तुमर्हति ॥

एवं च स्थिते ।

सत्त्वोत्कर्षस्य माहात्म्यं यद्चास्य मनीषिणः ।
तद्दृष्टमेव युष्माभिः सर्वैरेव परिस्फुटम् ॥
यत्तद्भगवतादिष्टं मादृशां भासकारणम् ।
अनेन रभसा यच्च याचितं तन्महात्मना ॥
तदेष यावदस्माकं मदनुग्रहकाम्यया ।
इह तिष्ठति तावच्च स्वामी देवो गुरुः पिता ॥
वयमस्य भवन्तश्च सर्वे किङ्करतां गताः ।
विधूतपापमात्मानं विनयात्करवामहे ॥
ततः सर्वैर्नृपैरेवं प्रमोदोद्धुरमानसैः ।
यदादिशति राजेन्द्रः कर्म तथा च रोचते ॥
अथान्तरेऽतितोषेण दत्ता सा मनीषिणः ।
विजृम्भिता विशेषेण जननी शुभसुन्दरी ॥
ततः सर्वोत्तमामाप्य वर्णेन भुवनातिगाम् ।

रराज राजलोकेन परिवारितविग्रहः ॥
करेणुकाधिरूढेन सह मध्यमबुद्धिना ।
अथावाप पुरद्वारं स्तूयमानः सुबुद्धिना ॥
ततोऽच्छिन्नपताके च देवशोभामनोरमे ।
विशेषोज्ज्वलनेपथ्ये सर्वाल्पसुखमागते ॥
अथासौ नगरे तत्र समीयौ तोषनिर्भरे ।
एवं नागरकैर्लोकैः प्रविवेश कृतस्तुतिः ॥ युग्मम् ॥

तद्यथा ।

धन्योऽयं कृतकृत्योऽयं महात्मायं नरोत्तमः ।
यस्यैव सफलं जन्म भूषितानेन मेदिनी ॥
यस्यैव धन्यताश्लाघ्य येषामेव क्षयक्षमे ।
अजातो न तु धन्यानां रत्नपुञ्जेन मौक्तिकः ॥

ततश्च ।

कामिनीनयनानन्दं कुर्वाणोऽर्थाभिलाषिणां ।
ददानश्च महादानं दधानो देवरूपताम् ॥
मुहूर्ते पथपाले च दैविनामाताचेष्टिते ।
जनयन्नतानन्दो विचचार पुरेऽखिले ॥
ततो महाविमर्देन सम्प्राप्तो राजमन्दिरम् ।
रत्नराशिप्रभाजालै यदा बद्धेन्द्रकार्मुकम् ॥
तत्र चाधिपराजादिलोकसम्मानमानितः ।
सकामकामिनीवृन्दलोललोचनवीक्षितः ॥
गीतनृत्यप्रबन्धेन सोऽमरालयविभ्रमे ।

वर्धमानस्वाच्छ्यातिरेको निरुपमानमौज्ज्वल्यमिति । यतो महीत-
लसमस्थितभौक्तिकनामूले मणपञ्चशगनाभिकमौरश्चेदाङ्कुरागे
विन्दमवरभुवने दिव्यांशुवाप्यादितरतीरे मात्कर्षिमिश्रित-
भौरभाश्वहृदविहिरीबे स्वर्णमिनमहाश्चमिहामने प्रत्नामाद्य
महायामस्तविरीटोद्युशामरश्चिमदर्णे उद्दामसन्दिग्धपमानदना
वशिनगुणमन्दाहे दत्ताख्याने मनोविति स्थानिरेकनिभरो राजा
प्रवृद्धि प्रयाह । यदि पुष्पदनुभावजन्दैमक्ताहृत्ते स्वल्पपरम्परा
येनोत्पादितोऽस्व भवता भव्यसन्दनाय । यदा हि ।

विलोकितो मया नाथा जगदानन्ददायक ।
भक्तिनिभरचित्तेन वन्दितो भुवनेश्वर ॥
दृष्ट्वा यत्नकुमाकार न शशिवन्दितो गुरा ।
जयो भागवता धन्य समारोपितदर्शन ॥
जानदेवेन्द्रश्चपेण नरश्चेन कौतुक ।
कनदानेन सर्वेषामपाय श्रद्धयोमत ॥

अथवा विमलावयम् ।

महाभागा प्रकाशन्ते परतो नादहृद्ये ।
स्वराधीनदर्शनो यत्परमोतिकाराकम् ॥
नहम्य गुणवेदर्द विभातु पुष्पकाल ।
महाहृतमिदं नान च शोभ च निकायक ॥
मदैवविधवशात्मनाभिधा विवदय च ।
एवमावरना पूर्व मया कथिता मम ॥
दाशो हिमवतो नम्रो धूर्जटि अवमय ।

तस्मात्तवैव मन्त्रिन् यथार्था ते सुबुद्धिता ॥

सुबुद्धिरुवाच ।

देव मा मैवमादिशत । न खलु देव पुण्यप्राग्भारायत्तश्रीरितव्येऽत्र किङ्करजनेऽप्येवमतिगौरवमारोपयितुमर्हति देव । स्वासम्पादने कोऽत्र वयं । उचित एव देव खल्वेवंविधकल्याणपरराया । नैव हि निर्मलाम्बरतले निशि प्रकाशमाना रविता नक्षत्रपद्धतिं कस्यचिदसम्भावनीयेत्याश्चर्यबुद्धिं जनयति । मनीषिणाभिहितं । महाराज भगवति सुप्रसादे कियतीयमद्यापि भवत्कल्याणपरम्परा । भाविदिनश्रीसम्बन्धस्येव गगनतलस्यारुणोद्योतकल्पा हि भवतो भविष्यत्केवलालोकसचिवपरमपदानन्तानन्दसन्दोहसम्बन्धस्य प्राथमकल्पिकः खल्वेष सम्यग्दर्शनजनित प्रमोदः । नृपतिरुवाच । नाथ महाप्रसाद । कोऽत्र सन्देहः । किं न सम्पद्यते युष्मदनुचराणां । ततो मन्त्रिणं प्रत्याह । सखे पश्यामीषामत्र दिशप्रबुद्धानामपि विवेकातिशय । सुबुद्धिरुवाच । देव किमत्र चित्रं । मनीषिणः खल्वेते यथार्थमभिधीयन्ते । प्रबुद्धा एव ह्येवंविधपुरुषा जायन्ते । गुरव केवलमीदृशां प्रतिबोधे निमित्तमात्रं भवन्ति ।

इतश्च मनीषिणो राजमन्दिरे प्रवेशावसरे राजानमनुज्ञाप्यादित एव सुबुद्धिना साधर्मिकवात्सल्येन मध्यमबुद्धिर्नीत आत्मीयावाससदने । कारितस्तदागमननिमित्तं परमानन्दो दत्तानि महादनानि । ततः सोऽपि निर्वर्तितस्नानभोजनताम्बूलविलेपनावसरे पथ्यमाल्योपभोगः-कृतश्च । स्नेहनिर्भरसुबुद्धितत्परिकरनिरूपवितिस्तुतिगर्भपेशलालापसमानन्दितहृदय समागतप्रावेशावस्थाने । [illegible]

चित्तप्रतिपत्ति ससम्भ्रम मनीषिणा दापिते तदुपकण्ठमुपविष्टो महति विष्टरे। ततो राजा तमुद्दिश्य सुबुद्धिं प्रत्याह। भद्रे लोकोपकारधर्मधारक महापुरुष! सुबुद्धिनाभिहितं। देव कथ। नृपतिराह। समाकर्णय यतो भगवतापदिष्टे तत्क्षितिसमादयन्ते तस्य दुरनुष्ठेयतामालोचयतो मम महासमरे कातरनरस्येव प्रादुर्भूता चित्ते समाकुलता ततोऽहमनेन महात्मना तथावसरे भगवन्त एवंविधम् याचयता तद्दुःखशुश्रूषादकत्वेन समाश्वासितो। यतो ज्ञातो मद्विधसङ्गीकरणेनापि मे चेतसा महानभ्युदयः। ततो ममायमेव महोपकारक इति। सुबुद्धिनाभिहितं। देव यथा-र्थाभिधानो मध्यमबुद्धिरेष। समानशीलव्यसनेषु सख्यमिति च लोकप्रवाद। तत समानशीलतया युक्तमेवास्य मध्यमजनानां समाश्वासन॥ नृपतिना चिन्तितं। अये ममाय मिथ्याभिमानदूषित-शीलस्य कालमाचष्टे किलाहं नरेन्द्रतया पुरुषोत्तमो यावता-धुनानेन सुबुद्धिनाप्यस्मि गणितोऽहं मध्यमजनलेख्ये। ततो धिङ्मां मिथ्याभिमानिनमित्यथवा वस्तुस्थितिरेषा न मयात्र विषादो विधेय।

तथा हि।

गजेन्द्रस्तावदाभाति शूर सन्त्रासकारक।
यावद्दासुरदंष्ट्रायो न सिंह उपलभ्यते॥
यदा सिंहस्य गन्धोऽपि स्यादाघ्रात करेणुना।
जायते कम्पमानाऽसौ तदाहा कातर करी॥
मनीषिणमपेक्ष्य · · · । मे मध्यरूपता।

अथ सिंहो महाभागो मादृशां कारिकान्तरा ॥
तदत्र न विषादो मे कर्तुं युक्तः प्रयोजने।
यतो द्वितीयलेशोऽपि मादृशैरपि दुर्लभा ॥

तथा हि।

भवेत्सर्वोत्तमस्तावत्पुरुषो यदि पारयेत्।
अशक्तो मध्यमोऽपि स्यान्न जघन्यः कदाचन ॥
मिथ्याभिमानी नैवायमेक एवाभवत्पुरा।
किं तर्हि बहवोऽन्येऽपि किं वा मे चिन्तया तया।

एवं चिन्तयति राजनि सुबुद्धिराह। देव सम्यगवधारितं देवेन यथैष महोपकारक इति। यतो जिनधर्मानुष्ठाने प्रवर्तमानस्यास्य जीवस्य यो निमित्तमात्रमपि भवति न ततोऽन्यः परमोपकारी जगति विद्यते। नृपतिराह। एवमेतन्नात्र सन्देहः। केवलमिदानीं मे मनसि वितर्को

हतोऽपि निर्लज्जब्राह्मण इव प्रकरणे पुनः पुनः प्रविशतीति तदेनमुपनेतुमभ्युत्थाय। सुबुद्धिराह। कीदृशोऽसौ। नृपतिरुवाच समाकर्णय स्वसंवेदनसिद्धमिदमासीत्तदा यदुत तत्र प्रविष्टमात्राणामस्माकं शान्तानीव सर्वद्वन्द्वानि उद्घाटितेव चित्राज्यकार्यचिन्तापिशाचिका विलीनमिव सकलमोहजालं इव प्रबलरागानल विध्वस्त इव विपरीताभिनिवेशग्रह सिक्तममृतसेकसम्पर्केणेव शरीरं सुखसागरावगाढमिव हृदयं मात्रेणासीत्। यत्पुनर्नमस्कृतभुवननाथस्य प्रणतगुरुचरणस्य वन्दितमुनिवृन्दस्य भगवद्वचनामृतमाकर्णयतस्तत्र मे निरुपमं सुखसंवेद

सम्भूत् ततश्च बालोऽवरागोऽनमिति इत्था न ज्ञायते कथञ्चित् । तदेवंविधेऽपि तत्र जैनेन्द्रमन्दिरे अस्थितेऽपि तादृशे भगवति दृष्टे कम्पति रागविषयमय विरागमार्गे नैवोपशमे शान्तचित्ते तपक्लिष्टेऽपि यति नायति अनवसरे कथ बालस्य तथाविधो ऽध्यवसाय सम्भव इति । सुबुद्धिनाभिहितं । देव यथावदुक्तं देवेन यथाच जिनमन्दिरे प्रविष्टमात्रस्य मे क्षणमात्रेणाचिन्तितशुभ सन्दोहाविर्भावोऽभूदिति तथापि । प्रमोदमिमत्र हि तद्वचनमभि- धीयते स्तुतेव तथा दुष्टाध्यवसायस्य । यत्पुनरन्यथापि यथा कथं पुण्यमन्त्रविधानमन्त्रमपि पापाचरणेषु प्रवृत्तम् इति ।

अन्यच्च । भगवदुपदेशादेवाहमेव तर्कयामि यदुत द्रव्यक्षेत्रकाल भावभवादपेक्षया प्राणिनां शुभाशुभपरिणामा भवन्ति । तदस्य बालस्य क्षेत्रमिदंतोऽयमशुभपरिणाम । नृपतिराह । ननु शुभा- करमेतज्जिनमन्दिरं । तदेव तत्र क्षेत्र । तत्कथं तदशुभपरिणामहेतु- र्भवेदिति । सुबुद्धिराह । न मन्दिरदोषोऽसौ किं तर्हि उद्यान- दर्शनादुद्याने तत्र मामान्यदेव तत्र वस्तुनस्य बालस्य तथाविधा- ध्यवसायस्येति । नृपतिराह । यदि दुष्टाध्यवसायहेतुस्तदुद्यानं ततो- ऽस्माकं किमिति क्लिष्टचित्तकारणं तत्र सम्पन्नं । सुबुद्धिनाभिहितं । देव विचित्रस्वभावं तस्मात्तत्र पुरुषादिकमपेक्ष्यानेकाकारकार्य- कारकं सम्पद्यते । अत एव । तच्चित्तविभ्रमकिमिति माया गीयते । प्रकटयत्येव तत्सम्पूर्णा अविशेषसहकारिकारणकलापैर्निज निज विलसितम् । तथाहि । तत्र बालस्य तेन स्थानेन तथा चाकुशल- सामग्र्या युक्तस्य मदनकन्दली प्राप्य तत्र तथाविधाध्यवसाय ।

पूर्वक सर्वत्र महादानानि। विस्तारितो देवेन्द्रवद्दैरावतविभ्रम करिवराळढ स्वय पदातिभाव भजता किङ्करचतुष्कन्धरैः सुराकारैर्नागरिकजनै स्त्र्यमानो निरुपमविलासविस्तारमनुभवता नरपतिना प्रतिदिन नगरे मनीषी प्राप्तोऽष्टमवासर। तत्र नीत निखिलजनमन्मानदानाधमानविनोदेन प्रहरद्वय। अत्रान्तरे दिनकराचरितेन मनीषिवृत्त सूचयताभिहित कालनिवेदकेन।

नाशयित्वा तमो लोके कृताह्लाद मनस्विनाम् ।
हे लोका कथयन्त्येष भास्करो वाऽधुना स्फुटम् ।
वर्धमान प्रतापेन यथाहमुपरि स्थित ।
सर्वोऽपि स्वगुणैरेव जनस्योपरि तिष्ठति ॥

ततस्तदाकर्ण्य राजा सुबुद्धिप्रभृतीनुद्दिश्याह। अये प्राप्तेदानीं लग्नवेला । तत सज्जीकुरुत तूर्णं भगवत्पादमूले गमनसामग्रीं। सुबुद्धिरुवाच। देव प्रगुणैव वर्त्तते मनीषिपुण्यपरिपाटीव सा सामग्री। तथाहि ।

अमी घणघणारावं कुर्वन्त कनकोज्ज्वला ।
रथौघा प्रस्थितास्तूर्णमायुक्तवरवाजिन ॥
एते सख्यामतिक्रान्ता राजवृन्दैरधिष्ठिता ।
जीमूता इव नागेन्द्रा द्वारे गर्जन्ति मन्थरम् ॥
वयास्त्वरारे मरुद्धा कथञ्चिच्चटुलानने ।
खमापिबन्तोऽमी देव हया हेषन्ति दर्पिता ॥
अथ पदातिसघात चीरनीरेश्वरोपम ।
मत्त प्रयोजन ज्ञात्वा सुवेषश्चलितोऽखिल ॥

रत्नाभरणहारनेपथ्या सद्भृत्यपटलाकुला ।
मण्डिता वारनारीणामेते वारा वरेक्षणा ॥
मनीषिपुरुषभारासङ्गात्सुखं समागता ।
एते विबुधसम्पाता द्योतयन्ति नभस्तलम् ॥
एष नागरको लोकः कौतुकाक्षिप्तमानसः ।
कुरुते रथकल्लोलैः सागरक्षोभविभ्रमम् ॥

अथवा ।

मत्तो विदितवृत्तान्तो मनीषिगुणरञ्जितः ।
जातयुष्मदभिप्राय को वाचामगुणो भवेत् ॥

दैव तदाख्यातमुत्थातुमर्हथ यूय । ततः समुत्थितौ मनीषिनरेन्द्रौ निर्गतौ द्वारदेशे। ततो रत्नकिङ्किणीजालभूषिते समारूढप्रधानस्यन्दने मनीषी। ततः सुबुद्धकुमारावष्टोपविष्ट अथ प्रतिपन्नसारथिभावेन सह नरपतिना विलसत्किरीटांशुरञ्जितोत्तमाङ्गभागो ध्रियमाणेन निजयशोधवलेनातपत्रेण कपोलकोलायमानकुण्डलो धूयमानेन शशधरदीधितिच्छटाच्छेन वरविलासिनीकरवर्तिना चामरप्रकरेण स्थूलमुक्ताफलकलापविराजितवक्षःस्थल पठासितारमुद्दामवन्दिवृन्देन कटककेयूररत्नखचितबाहुदण्डो शृण्वता लोकनिर्भरवरविलासिनीसार्थेन अनिष्ठुरभिताम्बुकाशूराणमौषिताशेषेन्द्रियग्रामो बधिरयता दिक्चक्रवालं वरतूर्यनिर्घोषेण विमर्दितभूमिपालप्रतिपन्नदेहो गायता मनोहारिविस्वरवर्णेन पूयमानविविधवनमालाभिषयपूजितशरीरो शृण्वता वर्णनिरेकाभुत्कृष्टजिवनादमन्दभ देवसङ्घेन भौतिकनादैश्वप्रविज्ञममनोरथ

श्लाघयता नागरलोकेन तथासुरकुमाराकारधरोऽयमिति सधौ
काभि समागतोऽस्माकमय दृष्टिपथमिति सहर्षाभिरस्मदभि
मवलोकयतीति सशृङ्गाराभिर्मदनरसवशीकृतहृदयतया नानावि
लासाभिर्मामिव तिरोधाय दर्शनलोलतया स्वयमवलोकयन्ती
परस्पर सेर्ष्याभिर्गुरुजनोऽस्मानेवमवलोकयन्तीं पश्यतीति स
लज्जाभि प्रव्रजित किलाय भविष्यतीति सशोकाभिरस्मा
योऽयमेवंविधैरपि त्यज्यत इति ससंवेगाभिरेवमनेकरसभावनिर्भर
हृदयमुद्वहन्तीभिर्निरीक्ष्यमाणमूर्तिर्वातायनविनिर्गतवदनशशाङ्कै
पुरसुन्दरीभिरभिनन्द्यमानोऽम्बरविवरवर्तिनीभि सुरसुन्दरीभि
सहितो रथान्तरारूढेन स्वप्रतिबिम्बसन्निभेन मध्यमबुद्धिना अनुग
म्यमानो रथहरिकरिगतैर्महासामन्तसमूहैर्महता विमर्देन प्रा
मनीषी निजचित्तसितोद्याने। रथादवतीर्य स्थित क्षणमात्रमेव
शेखरद्वारे। परिवेष्टितो राजवृन्देन। इतश्च
राजा विशेषतस्तदा सत्त्वपरीक्षार्थं मनीषिस्वरूपं दृष्टा
निरूपयति स्म। यावत्तस्य विशुध्यमानाध्यवसायप्रक्षालितकर्म
मलकलङ्कस्य सत्यपि तादृशे रथचेतौ न लक्षितस्तेन तिलतुषत्रि
भागमात्रोऽपि चेतोविकार प्रत्युत गाढतर क्षारस्फुटपाकादि
विविधसंसारविलसितदर्शनसमुद्भूतैर्भावनाविशेषैर्निर्मलीभूत
रत्न। तत परम्परानुविद्धतया मम शरीरयोर्जातमस्य
शरीर। विलोकितं च राज्ञा यावत्तत्तेजसाभिभूतं दि
निकरतिरस्कृतमिव तारकानिकुरम्बं न राजते सम
वर्ति तद्राजक। ततस्तदीयगुणप्रकर्षेण राजोऽपि विलीन

कर्मजाल सञ्जातचरणपरिणामो निवेदित अमुद्दिमध्यमबुद्धि-मद्मकन्दलीधामन्यादिभ्यो निजोऽभिप्राय । ततोऽचिन्त्यमाहात्म्यतया महापुरुषमभिधानस्य विविधतया कर्मक्षयोपशमस्य रक्षित चित्ततया निष्कम्पमनीषिगुणे । समुपस्थित सर्वेषां तदा जीव वीर्ये । ततस्तैरभिहितम् ।

साधु साधूदितं देव युक्तमेतद्भवादृशाम् ।
संसारे ध्रुव नि सारे मान्यत्वाद् विवेकिनाम् ॥

तथा हि ।

देव पश्य संसारे किंचित्स्याद्रमणीयकम् ।
प्राप्यं सारमुपादेयं वस्तु सुन्दरमेव वा ॥
ततः किमीदृशा रम्या पूज्या युष्मादृशामपि ।
संसारेऽस्मिन् कुर्युर्ज्ञाततत्त्वा महाधिप ॥
ततोऽमूदृग्प्रपञ्चैकत्यागादेवावगम्यते ।
नास्त्येव किंचित्संसारे सार सारकथञ्चिमे ॥
अतो मनीषिभिस्त्यक्ते देव नैराश्य युज्यते ।
स्यात् विज्ञाततत्त्वानां भवे भूरिभयाकरे ॥
अन्यच्च देव सर्वेषामस्माकमपि साम्प्रतम् ।
दृष्टा मनीषिचरितं न चित्तं रमते भवे ॥
यथैवास्य प्रभावेण सञ्जातचरणोद्यम ।
अस्माकमेव निर्वाह तथा तेनैव याच्यति ॥
ततोऽस्मानमुजानीत संसारोच्छेदकारिणीम् ।
येन भागवती दीक्षामङ्गीकृत्य सुनिर्मलाम् ॥

नृपतिरुवाच।

अहो विवेको युष्माकमहो गम्भीरचित्तता।

अहो समस्तविज्ञानसम्पातो मलसारता ॥

साध्वध्यवसितं भद्रे साधु प्रोत्साहिता वयम्।

साधु भो भवताचैव चोदितं मार्गपरम् ॥

एवं सामान्यतस्तावत् सर्वेषामभिनन्दनम्।

कृत्वा प्रत्येकमप्याह स राजा हर्षनिर्भरः ॥

तत्र सुबुद्धिं तावदाह।

सम्यग् विदितसंसारस्वभावेन त्वया सखे।

इयमा तितता(?) काले वयमेव प्रतीधिता ॥

अन्यथा ते सखे किं वा स्यादवस्थानकारणम्।

को नाम राज्यनामेऽपि भजेत्साग्रामरूपताम् ॥

तत्साधु विहितं साधु हतोऽस्माकमनुग्रहः।

एवमाचरता मित्र दर्शिता च सुमित्रता ॥

मध्यमबुद्धिं प्रत्याह।

त्वमादावेव धन्योऽसि यस्य मन्त्री मनीषिणा।

नैव कल्पद्रुमोपेतो नरोऽकल्याणमृच्छति ॥

अधुना चरितेऽप्यस्य दधानेन मतिं त्वया।

स्वभावतुनिविशेषैव दर्शिता तुल्यरूपता ॥

तत्साधु विहितं भद्र यः पश्चादपि सुन्दरः।

सोऽपि सुन्दर एवेति यतो वृद्धाः प्रचक्षते ॥

ततो मदनकन्दलीं प्रत्याह।

सारं च सुकुमारं च देवि काञ्चनपद्मवत् ।
नाथकोमलमिदं चित्तं येनाङ्गीकृतमीदृशम् ॥
प्रसिद्धा धर्मपत्नीति यत्त्व लोकोपचारतः ।
मम तत्सत्यतां नीतं कर्तव्येन त्वयाधुना ॥
तत्साधु विहितं देवि सत्यं च भवपञ्जरे ।
नियन्त्रितानां जीवानां कर्तव्यमपरं परम् ॥

तथा ।

यैरभ्युपगता दीक्षा तानन्यानपि भावतः ।
स राजा मधुरैरेव वाक्यैरानन्द्य नोपतः ॥

तद्यथा ।

धन्या यूयं महात्मानः कृतकृत्या नरोत्तमाः ।
यैरभ्युपगता यूयं दीक्षा पारमेश्वरी ॥
तथाच विहितं भद्रा युक्तमेतद्वचादृशाम् ।
यूयमेव परं लोके निमित्ता मम बान्धवाः ॥

ततश्च ।

राजविज्ञापनाद्राज्ये स्थापयित्वा सुलोचनम् ।
ततः कृतान्यकर्तव्यः प्रविष्टो जिनमन्दिरे ॥

तत्र च ।

विहितानेककर्तव्याः पूजयित्वा जगद्गुरुम् ।
आचार्येभ्यो निजाकूतं ते सर्वेऽप्याचचक्षिरे ॥
ततोऽभिनन्दितास्तेऽपि सूरिभिः मधुरया गिरा ।
सर्वं विज्ञप्तितेनाथ प्रचार इति भाषिताः ॥

ततः प्रवचनोक्तेन विधिना धूतकल्मषे।
सर्वे ते क्षणमात्रेण दीक्षिता गुरुभिर्गुणा॥
अथ संवेगवृद्ध्यर्थं कल्पोऽयमिति वा क्षणम्।
कृता समच लोकस्य सूरिभिर्धर्मदेशना॥

तद्यथा।

अनाद्यनन्तसंसारे जन्ममृत्युभयाकरे।
मौनीन्द्री दुर्लभा सत्त्वै प्रव्रज्येयं सुनिर्मला॥

यत।

तावद्दुःखान्यनन्तानि तावद्रागादिसन्ततिः।
प्रभवः कर्मणस्तावत्तावज्जन्मपरम्परा॥
विपदस्तावदेवैतास्तावत्तत्र विडम्बना।
तावद्दीनानि जल्पन्ति नरा एव पुरो नृणाम्॥
तावद्दौर्गत्यसद्भावस्तावद्रोगसमुद्भवः।
तावदेष बहुक्लेशो घोरसंसारसागरः॥
यावदेषा न भावेन प्रव्रज्या परिपालिता।
एषा न लभ्यते जीवैः प्रव्रज्यात्यन्तदुर्लभा॥
प्रसादाल्लोकनाथस्य स्वकर्मविवरेण च।
यदा तु सम्यग्लभ्येत प्रव्रज्येयं जिनोदिता॥
[illegible] पापानि यान्ति ते परमां गतिम्।
[illegible] पूर्णा नि[illegible]क्लेशप्रव्रजिताम्॥
[illegible] भोक्ता सर्वेऽपि [illegible]।
[illegible] दूरपापा भवन्ति ते॥

किं च।

इहापि भो भवन्त्येते प्रमादात्पतिताः पिनः ॥
प्रमादपापिनो जीवा निर्बाधा दुःखपूरिताः ॥
या च भागवती दीक्षा युष्माभिरधुना स्फुटम् ।
अवाप्ता तेन यत्नेन यत्नस्य भवोदधौ ॥
केवलं सततं यत्नः प्रमादपरिवर्जितैः ।
यावज्जीवं विधातव्यो भवद्भिरिदमुच्यते ॥

यतः ।

नाधन्याः पारमेतस्या गच्छन्ति पुरुषाधमाः ।
ये तु पारं व्रजन्त्यस्यास्त एव पुरुषोत्तमाः ॥
ततस्ते प्रणताः सर्वे जगदुः सूरिपुङ्गवम् ।
इच्छामोऽनुग्रहं नाथ कुर्मो नाथानुशासनम् ॥
अमितानन्दयोगेन सुखवासितया मुदा ।
यथाकारे कृतं मन्त्र प्रभुर्नस्त्वयाधुना ॥

कथम् ।

विज्ञानं निर्मलं धीरं गम्भीरं दर्पवर्जितम् ।
दयापरीतं निर्विघ्नं देहाभिमुखवर्जितम् ॥
स्थितिमज्जगदानन्दं यदा बाह्याचरान्वितम् ।
कथमीदृग्भवेच्चित्तं नाथ यादृङ् ममोदितम् ॥
यच्च चेतितमाकर्ण्य त्रिविधोऽप्यमलात्मना ।
एते सर्वं वच श्रुत्वा श्रीमान् यथारम्भारम्भात् ॥
रस्ताव ।

भदन्त किं वा मो सन्ति मध्यबुद्धेः सहोदराः ॥

सूरिणाभिहितं । बहुतमास्ते विद्यन्ते । यतः ।

ये बालचरिताः केचिन्मनीषिचरिताश्च ये ।
एतेभ्यो ये परे सत्त्वाः सर्वे तेऽमुष्य सोदराः ॥
ये केचिच्छुभसाधाराः समा मध्यमबुद्धिना ।
युताः सामान्यरूपायास्ते जीवा भुवनोदरे ॥
सकाशादितराभ्यां ते गण्यमाना जगत्त्रये ।
अनन्तगुणितास्तेन प्रोक्ता भूरितमा मया ॥

राजर्षिरुवाच । भदन्त यद्येव ततो मम चेतसि परिस्फुरति । एवं व्यवस्थिते सत्येतदापन्नं यदुत ।

भार्यात्रयेण जनितं जघन्योत्तममध्यमम् ।
तस्य कर्मविलासस्य जगदेतत्कुटुम्बकम् ॥

सूरिरुवाच ।

बाढं नैवात्र सन्देहः सम्यगार्येण लक्षितम् ।
मार्गानुसारिणी बुद्धिर्भवत्येव भवादृशाम् ॥

तथाहि ।

जघन्यमध्यमोत्कृष्टाः सर्वयोनिषु जन्तवः ॥
विद्यन्ते केवलं मूले व्यक्तभावा भवन्ति ते ।

ततश्च ।

नरत्वेऽपि विनिर्दिष्टं व्याप्येदं कुटुम्बकम् ।
यच्च विदुषा कार्यं तदिदानीं निबोधत ॥
त्याज्यं बालचरितं न कार्यस्तत्समागमः ।

मनीषिचरिते यत्नः कर्तव्यः सुखमिच्छता ॥
यतोऽत्र बहवो जीवाः प्रायो मध्यमबुद्धयः।
ते च सम्यगनुष्ठानात् सपद्यन्ते मनीषिणः ॥
एतद्विज्ञाय भो भव्याः सर्वेऽपि गदिता मया।
कार्यं सदनुरोधेन वृत्तमस्य मनीषिणः ॥
वर्जनीयश्च यत्नेन पापमित्रैः समागमः।
यतः स्पर्शनसम्पर्कात् स बालो निधनं गतः ॥
वर्जनेन पुनस्तस्य मनीषी सुपरिस्फुटाम्।
लोके शेखरतां प्राप्य जातोऽयं मोक्षसाधकः ॥
कल्याणमित्रैः कर्तव्या मैत्री पुंसा हितैषिणा।
इहामुत्र च विज्ञेया सा हेतुः सर्वसम्पदाम् ॥
दोषायेह कुसंसर्गः सुसंसर्गो गुणावहः।
एतच्च द्वयमप्यत्र मध्यबुद्धौ प्रतिष्ठितम् ॥
तथा हि।
बालस्पर्शनसम्बन्धाद्दोषोऽभूद्दुःखभाजनम्।
युक्तोऽभूत्ततताह्लाद एष एव मनीषिणा ॥
तदिदं भो विनिश्चित्य बहिरङ्गान्तरे सदा।
न कार्या दुर्जनैः सङ्गः कर्तव्यः सुजनैः सह ॥
ततश्च।
इदमाकर्ण्य सौमीन्द्र वचनं सुमनोहरम्।
प्रबुद्धा बहवः सत्त्वा जाता धर्मपरायणाः ॥
प्राप्ता देवा निजं स्थानं स्थितो राज्ये सुलोचनः।

गतोऽन्यत्र विहाराय सूरिः शिष्यगणैः सह ॥

ततश्च ।

विहृत्य कालं भूयांसमागमोक्तेन वर्त्मना ।
पर्यन्तकाले सम्प्राप्ते विधाय सकलं विधिम् ॥
ज्ञानध्यानतपोवीर्यवह्निनिर्दग्धकल्मषः ।
मनीषी निर्वृतिं प्राप्तो हित्वा स्वं देहपञ्जरम् ।
ये तु मध्यमवीर्यास्ते तनूभूतकर्मकाः ।
गता मध्यमबुद्ध्याद्या देवलोकेषु साधवः ॥
बालस्य तु यदादिष्टं भदन्तैर्भाविचेष्टितम् ।
तत्तथैवाखिलं जातं नान्यथा मुनिभाषितम् ॥

॥ मध्यमकथानकं समाप्तम् ॥

विदुर उवाच । कुमार तदिदं मया च कथानकमाकर्णित-माकर्णयतश्च मम गलितं दिनं । तेन युष्मत्समीपे नागतोऽस्मि । मयाभिहितं । भद्र सुन्दरमनुष्ठितं । यतोऽतिरमणीयमिदं कथानकं बुध्यत एव श्रोतुम् । अहो अत्यन्तदुरन्तं पापमित्रसम्बन्धो यतस्तस्य बालस्य स्पर्शनसम्पर्कादिहामुत्र च निबिडविडम्बनागर्भा दुःखपरम्परैव केवलं सम्पन्ना नान्यत्किञ्चनेति । विदुरेण चिन्तितं । बुद्धस्तावदनेन कथानकतात्पर्यार्थ इति । भविष्यति मे वचनावकाशः ॥ इतश्च तत्रावसरे मत्ता नातिदूरे वर्तते वैश्वानरः । श्रुतं तेन मामकीनं वचनं । चिन्तितमनेन । अये विरूपको नन्दिवर्धनस्यालापो । उत्पादितप्रायोऽयमनेन विदुरेण । तत्र सुन्दर-

मिदं वर्त्तते दृष्टं खल्वेष विदुरो ज्ञापयिष्यत्यस्य मदीयवृत्त-
मिति। साम्प्रतं सपक्षो वैश्वानरः॥ विदुरेणाभिहितं। कुमा
सत्यमिदं सम्यगवधारितं कुमारेण। अन्यच्च। प्रकृतिरेषा इह
प्राणिनां यथा यत्र कुत्रचित्किञ्चन दृष्टं श्रुतं वा तत्रात्मानं
योजयन्ति। ततो मयापीदं कथानकमनुस्मृत्य स्वहृदये चिन्तितं।
यदुत यदि कुमारस्य कदाचिदपि पापमित्रसम्बन्धो न भवि
ततः सुन्दरं सम्पद्यते। मयाभिहितं। भद्र किमत्र चिन्तनीयं।
नास्त्येव मे नापि भविष्यति पापमित्रसम्बन्धगन्धोऽपीति। विदुर
प्राह। वयमप्येतावदेवार्थयामहे। ततः स्थितो मदीयकक्ष्या
विदुर। शनैः शनैरभिहितं चानेन। यदुत केवलमेषोऽपि
वैश्वानरो लोकवार्त्तया दुष्टप्रकृतिः श्रूयते। तदयं सम्यक्परि-
वर्जनीयः कुमारेण। मा भूदेष स्पर्शनवद्बालस्य पापमित्र-
भूतोऽनर्थपरम्पराकारणमिति।

निरीक्षते च तस्मिन्नवसरे वैश्वानरः साकूतं मयाभिमुखं
मदीयवदनं। लक्षितोऽहमनेन मुखविकारतस्तैर्विदुरवचनैर्दूयमान
ततः कृता वैश्वानरेण मां प्रति सा पूर्वभाषितिका संज्ञा। भक्षि
मया क्रूरचित्ताभिधानं वटकं। ततस्तत्प्रभावान्मे जनितो
ऽन्तस्तापः। समुत्पन्नाः स्वेदबिन्दवो जातं गुञ्जार्धसन्निभं लो
सपद्य विषमदष्टोष्ठं भ्रूभङ्गकुटिलतरङ्गमतिकरालं वक्त्रकुहरं। भ
भद्रे अगृहीतसङ्केते तथा वैश्वानरवटकप्रभावाभिभूतात्मना
पापकर्मणानाकर्ण्य तस्य वचनमनाभोग्य।
सपद्य चिरपरिचयं परित्यज्य दोषभावमुररीकृत्य दुर्भना आ

निपुणवचनैर्निरस्तगतोऽसौ विहृत्य । तदनन्तरे दूरागत्य निजतम मां शास्त्रस्य सम्प्रति सदाशिवप्रभावोदेन परमोपकारकमना रक्षित । वैराग्य सदाशिवदृष्टकाशोपम मन्त्र । वररामस्य च मधुमार विहृतस्य सदा हता कपोलदारणो चपेटो । सवीता नरसकल अवतीर्णस्यावोऽस्य । ततो मदातिरेकमकलमानमगावधहि सदो विहृत । समसमयतोऽपि । कथित समस्तोऽपि दृष्टाज । ततो निदित समनपि मानेन । तदा न प्रकृत एव कथञ्चिदपि दृष्ट ते विलोकयितुमेतत्कारे वामरपायमिथाहिति । तदेव स्थिते तद्विहस्तागैरालाभिमांनिमेव स्वातु दुःखमिति स्थापितस्तातेन विहाय ।

एवं निर्विघ्नेन मया कलापदत । ततो भवति समस्तादिन । तत्रोपोऽस्य कलाप्रासादप्रासादैरन्तमपमीप । पुञ्जित कलाचार्यो ...तानि सदारामानि कारितो मयोत्सव । अभिनन्दितोऽस्य मानमात्मादिभि देवल केव । वितीर्णा मे दृष्टगावाचक । यथा-प्रसमास्यतेव इति कृत्वा तातेन नियुक्त परिजन । समुप-करणानि मे भोगाय भूपोपकरणानि । स्थितोऽस्य छत्रकुमारबहल-मान । ततस्त्रिभुवनविलोभनीयोऽमृतरस इव सागरस्य सकल-लोकनयनानन्दजननश्चन्द्रोदय इव प्रदोषस्य बहुरागविकारभङ्गुर सुरचापकलाप इव जलधरसमयस्य मकरध्वजायुधभूत कुसुम-शर इव कल्पपादपस्य अभिव्यज्यमानरागरमणीय सूर्योदय इव कमलवनस्य विविधलास्यविलासयोग्य कलाप इव शिखण्डिन प्रादुरभूत् मे यौवनारम्भ । उपचमतिरमणीय शरीर । विस्तीर्ण-

भूत वच स्थल। परिपूरितमुरुदण्डद्वय अगमत्तनुतां मध्यदेश। प्राप्त प्रथिमान नितम्बभाग। प्रतापवदारूढा रोमराजि। वैस्त मवाप्ते लोचने। प्रलम्बतामुपागत भुजयुगल। यौवनमहायेनैवाधि ष्ठितोऽह मकरध्वजेन॥ इतश्च स्वभवनाच्चिमन्ध्य मजामि स्म राजकुले गुरूणा पादवन्दक। ततोऽन्यदागत प्रभाते। स्त तातस्याम्बादीनां च पादपतन। अभिनन्दितस्तैराशीर्वादेन। स्थि तस्तत्समीपे कियन्तमपि चण। समागत स्वभवने निविष्टो विष्ट यावदकाण्ड एवोच्छलितो राजकुले बहल कलकल। तत किमेतदित्यलचिततन्निमित्ततया जातो मे सम्भ्रम। प्रस्थितस्त भिमुख यावत्तूर्णमागच्छन्नालोकितो मया धवलाभिधान सर्व बलाधिकृत। प्राप्तो मदन्तिक। प्रणतोऽहमनेन। आह च। कुमार देव समादिशति। यदुतैतो निर्गतमात्रस्य ते मत्समीपे दूतो। निवेदित च तेन। यथा कुशावर्त्तपुरात् कनक चूडराजसूनु कनकशेखरो नाम राजकुमारो जनकापमाना भिमानात्त्वत्समीपमागतो गव्यूतमात्रवर्तिनि मलयनन्दने कानन तिष्ठत्येतदाकर्ण्य देव प्रमाणमिति। ततोऽह प्रत्यासन्नबन्धुतया महापुरुषतया च प्रत्युद्गमनमर्हति कनक शेखर कुमार इति आस्थानस्थायिभ्यो राजवृन्देभ्य एष समुच्चलित स्वय तदभिमुख। कुमारेणापि मौ मित्यच प्रहितो युष्मदाह्वानाय। तच्छ्रुत्वा प्रस्थातुमर्हति यदाज्ञापयति तात इति ब्रुवाणश्चलितोऽह सपरिकरो। मार्गमध्ये पृष्टो मया धवल। कथमेष

)

वस्तुरिति। धवलेनाभिहितं। यतो मन्दाया कनकचूडसहोदरी भवति तेन ते मातुलसूनुरेष भ्रातेति। प्राप्तास्तत्समीपं। कृतं कनकशेखरेण तातस्य पादपतनं। समालिङ्गितस्तातेन मया च। कृतोचिता प्रतिपत्तिः। प्रवेशितो नगरे महानन्दविमर्देन। अभिहितश्च तातेनाहमथ च कनकशेखरो। यथा कुमार सुन्दरमनुष्ठितं यदात्मीयवदनकमलदर्शनेन जनितोऽस्माकं मनो रथानामप्यगम्यो महाधिमानन्द। तदेतदपि कुमारस्य पैतृकमेव राज्यं। तस्मादत्र कुमारेण तिष्ठता विकल्पो विधेय इति। अभिनन्दितं तातान्नावचनं कनकशेखरेण। समर्पितस्तातेन मदीय भवनाभ्यर्णवर्ती कनकशेखरस्य महाप्रासादः। स्थितस्तत्रासौ। जातोऽस्य मया सह स्नेहभावः। समुत्पन्नो विश्रम्भः। अन्यदा रहसि पृष्टोऽसौ मया। यदुत मयाकर्णितं। किल जनकाप-मानाभिमानाद्भवतामिहागमनमभूत्कीदृशो जनकेन भवतो-ऽपमानो विहित इति श्रोतुमिच्छामि। कनकशेखरेणाभिहितं। आकर्णय।

तातेन चूतमञ्जर्या जनन्यात्यन्तलालितः।
कुशावर्तपुरे तावदहमास कुमारकः॥
अन्यदा मित्रवृन्देन युक्तः केलिपरायणः।
गतः प्रमोदं नाम काननं नन्दनोपमम्॥
तत्र माधविले देशे रक्ताशोकतलस्थितः।
दृष्टो मया महाभाग प्रशान्तो मुनिसत्तमः॥
क्षीरसागरगम्भीरस्तपनीयगिरिस्थिरः।

दिवाकरमहातेजा शुद्धस्फटिकनिर्मल ॥
तत प्रादुर्भवद्भक्तिरह गत्वा तदन्तिकम्।
प्रणम्य चरणौ तस्य निषण्ण शुद्धभूतले ॥
